# " संस्कृतख्रिस्टीयसाहित्यनभसि श्री-जान्-म्यूर-(John Muir)-वर्यस्य सारस्वतमवदानम् "

**[John Muir's Scholastic Contribution to the Sanskrit Christian Literature]**

***यादवपुर-विश्वविद्यालयस्य कलासंकायस्य संस्कृतविभागे***
***'पिएइच्.डि.' इत्युपाधिप्राप्तये प्रदत्तो गवेषणाभिसन्दर्भः***

**अनुसन्धाता – सौम्यजित्-सेनः**

निबन्धनसंख्या – A00SA1100116
वर्षम् – 2016 - 2017

**तत्त्वावधायिका – प्रफेसर्-(ड.)-ऋता-चट्टोपाध्यायः**

भूतपूर्वा इउ.जि.सि. एमेरिटास्-फेलो तथा वरिष्ठा प्राध्यापिका
संस्कृत-विभागे
यादवपुर-विश्वविद्यालयस्य

संस्कृत-विभागः
यादवपुर-विश्वविद्यालयः
कोलकाता - ७०००३२

२०२१

# “Saṁskṛtakhrisṭīyasāhityanabhasi Śrī-Jān-Myūra-(John Muir)-varyasya Sārasvatam Avadānam”

**[John Muir’s Scholastic Contribution to the Sanskrit Christian Literature]**

***A Thesis Submitted to the Faculty of Arts of Jadavpur University***
***in Partial Fulfilment for the Award of the Degree***
***of***

**DOCTOR OF PHILOSOPHY**

**in**

**SANSKRIT**

by

**Soumyajit Sen**

Registration No.: A00SA1100116
Session: 2016 – 2017

**Under the Supervision of**

**Prof. (Dr.) Rita Chattopadhyay**
Former U.G.C. Emeritus Fellow & Retired Professor
Department of Sanskrit; Jadavpur University

Department of Sanskrit
Jadavpur University
Kolkata – 700032

2021

# Certificate

Certified that the thesis entitled **"संस्कृतख्रिस्टीयसाहित्यनभसि श्री - जान् - म्यूर - (John Muir) - वर्यस्य सारस्वतमवदानम्" [Saṁskṛtakhrisṭīyasāhityanabhasi Śrī - Jān - Myūra - (John Muir) - varyasya Sārasvatam Avadānam]** submitted by me for the award of the Degree of **Doctor of Philosophy** in **Arts** at **Jadavpur University** is based upon my work carried out under the Supervision of **Prof. (Dr.) Rita Chattopadhyay**, Former U.G.C. Emeritus Fellow and Retired Professor of the **Department of Sanskrit**, **Jadavpur University**; And that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere / elsewhere.

R Chattopadhyay

Countersigned by the Supervisor

Prof. (Dr.) Rita Chattopadhyay

Dated: 15.04.2021

Prof. Dr. Rita Chattopadhyay
Ex Emeritus Fellow & Retd. Professor
Deptartment of Sanskrit
Jadavpur University
Kolkata 700032

Soumyajit Sen

Candidate

Soumyajit Sen

Dated: 15.04.2021

# “ संस्कृतख्रिस्टीयसाहित्यनभसि श्री-जान्-म्यूर-(John Muir)-वर्यस्य सारस्वतमवदानम् ”

गवेषकः – सौम्यजित्-सेनः

# ।। श्रद्धाञ्जलिः ।।

सततमाशिषो याभ्यां वर्ष्यन्ते मयि निश्चितम् ।

पितृभ्यामर्प्यते ताभ्यां शोधोऽयं श्रद्धया मया ।।

# ।। मङ्गलशंसा ।।

“दिव्यप्रशान्तोज्वलवैभवश्रीः
पवित्रभव्यानुपमापदानः ।
महामहिम्नां धुरि कीर्त्तनीयः
स येशुदेवोऽस्तु जगद्विभूत्यै ॥”

( श्री-सोमवर्मराजा *श्रीयेशुसौरभे* )

[Let Christ be there for the welfare of the world, who is divine, calm, shining and wealthy and whose fame is praised by all and who is foremost among all the venerated.]

# ।। प्रास्ताविकम् ।।

तदानीमासमहमधीती एम.फिल.-कक्षायाः सितच्छत्रितकीर्तिमण्डले समेधितविद्याबले यादवपुरविश्वविद्यालयीये संस्कृतविभागीयपरिमण्डले। तत्र द्वितीये हायने प्रवराध्यापिकां प्रफेसर्-ऋता-चट्टोपाध्यायवर्यां गवेषणाया मे तत्त्वावधायिकात्वेनापम्। 'संस्कृतखृष्टीयसाहित्यमि'ति नवीनां विषयाश्रितां द्राक्षारसादप्यधिकमधुरां प्रसादगुणगुम्फितां तदीयां वैदग्ध्यभङ्गीभणितिमाकर्ण्यातिशयेन विमुग्धेन मयका तदैव स्थिरीकृतं यद्विषयमिममुपजीव्यैव मदीयं गवेषणाकर्म प्रवर्तितं स्यादिति। प्राचार्यवर्यायाः प्राप्तानुमतिर्यदा प्रागुक्तविषयमाश्रित्य गवेषणायां व्रत्यभवम्, तदैव समापतन्महत्यापत्, संस्कृतखृष्टीयकाव्यानां दुष्प्राप्यत्वात्।

तदा मदाचार्याया एव सकाशात्समवाप्तस्य प्रख्यातयशसा ज्ञानपीठ-पुरस्कार-प्रापकेण श्रीसत्यव्रतशास्त्रिणा प्रणीतस्य *Modern Christian Literature in Sanskrit* इत्याख्यस्य प्रबन्धस्याध्ययनमनु संस्कृतभाषायां विरचितानां खृष्टीयकाव्यानां सुविस्तृता सूचिका काचिन्मया प्रस्तुता। ततो बह्वन्वेषणं कृत्वा मया न्यूनातिन्यूनतया संस्कृतखृष्टीयवाङ्मयस्य पञ्चाशत्संख्यकानि ग्रन्थरत्नानि समवाप्तानि। तेषु पाश्चात्यप्राच्यविद्वद्भिर्विरचितानां मौलिकसंस्कृतकाव्यानां संख्या प्रायः त्रिंशत्।

गच्छता कालेन साक्षात्कारो मे सञ्जातः प्रख्यातप्राच्यतत्त्वविदुषां स्कटल्याण्डवास्तव्यानां प्राध्यापकप्रवराणां श्री-जान्-म्यूर-वर्याणां सारस्वतकृतिभिः समम्। हृदयं मे चिन्तातल्पमञ्चति, वेगारम्भिणा विषाक्तेन शल्यशकलेन विद्धं शतधा च प्रयाति, यदा मनसि सम्यगाकलय्य विचार्यते यदेतेषां प्रकाण्डपण्डितानां जान्-म्यूर-पादानामेकमप्यपूर्वं संस्कृतकाव्यग्रन्थमाश्रित्याद्यावधि किमपि गवेषणादिकार्यं न तथा सञ्जातमिति। केवलं जान्-म्यूरस्य *मतपरीक्षा* इति ग्रन्थमाश्रित्य प्रख्यातैतिहासिकेन श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण स्वीयगवेषणाकर्म कृतमिति सश्रद्धं स स्मर्यतेऽत्र। परवर्तिनि तद्गवेषणाकार्यं *Resistant Hinduism: Sanskrit Sources on Anti-Christian Apologetics in Early Nineteenth-Century India* इति नाम्ना ग्रन्थाकारं दधत् भियेनातः १९८१-संवत्सरे प्रकाशितम्। तेनैव श्री-आनन्द-अमलादासेन साकं प्रणीतः *The Indian Christiad: A Concise Anthology of Didactic and Devotional Literature in Early Church Sanskrit* (१९९५) इति ग्रन्थो गवेषणापरिसरेऽस्मिन् सर्वमान्यत्वं भजते।

अपि च, Avril A. Powell-वर्याभिः म्यूरभ्रातृद्वयेन (John Muir & William Muir) प्रणीतान्याङ्गलाभाषाबद्धानि कानिचित्पुस्तकान्यालम्ब्य *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire* इत्याख्यं पुस्तकं निरमायीत्यमूल्यः कश्चन ग्रन्थः समवाप्यते गवेषणापरिसरेऽस्मिन्, यत्र तयोर्म्यूरभ्रात्रोर्भारतवर्षीयं कर्मजीवितमेव ग्रन्थकर्त्र्या तथ्यपुरःसरं प्राधान्येन परिवेशितम्। परन्तु म्यूर-वर्याणां संस्कृतभाषाबद्धानि मौलिकसंस्कृतकाव्यान्युपजीव्याद्यावधि कश्चन गवेषणाभिसन्दर्भो नैव केनचिदपि विद्वता विरचितः, यत्र तेषां काव्यानां साहित्यिकं मूल्यं समीक्षितमभवदिति इति मे दृढा मतिः।

मामकीने गवेषणाबन्धेऽस्मिन् साकल्येन षडध्यायाश्चकासति। 'उपोद्घाता'वतरणादपि पूर्वं मया प्रकृते गवेषणाबन्धे मङ्गलाचरण-प्रास्ताविक-कार्तज्ञ्यनिवेदन-शब्दसंकेतसूचिका-चित्रवीथिकादयः केचन विषया यथाप्रसङ्गं प्रस्तुताः। समाप्तौ च 'उपसंहृतिः' इत्यत्र गवेषणाया अस्या वैशिष्ट्यानि सम्यक् प्रतिपाद्य भाव्यगवेषणावकाशविषयोऽपि विवेचितो मया।

'उपोद्घाता'ख्ये प्रथमाध्याय आदावेव गवेषणाबन्धस्य सारं प्रकटीकृत्य गवेषणाविषयावाप्तिविषये चर्चा कृता मया। ततश्च गवेषणाबन्धस्य नामान्वर्थ्यं समासेन प्रस्तुतं गवेषणाशीर्षकस्य प्रतिपदव्यावृत्तिपूर्वकम्। तदनु गवेषणाबन्धस्य प्रतिपाद्यविषयानेकैकशः समुल्लिख्य गवेषणापारिमित्यमपि निर्दिष्टम्। गवेषणायां साक्षात् सहायतां प्रददतां केषाञ्चन ग्रन्थानां समीक्षणमप्यत्रैव सूक्ष्मेक्षिकया विहितं मया। कया पद्धत्या गवेषणेयं पल्लवितेति विषयमपि सयत्नं विश्लिष्य वर्णविन्यासविधिरपीहैव प्रदर्शितः।

'संस्कृतखृष्टीयसाहित्यमि'त्युक्ते द्वितीयाध्याये कीदृक् साहित्यं मम गवेषणायामभिप्रेतमिति विषयिणी चर्चा विहिता। अत्रैव मया विस्तरशो व्याख्यातं यत्कथं पाश्चात्यविद्वद्भिरेषां काव्यानां रचनायां मनः प्रदत्तमिति। संस्कृतखृष्टीयसाहित्यस्य भाषाविषयिण्यालोचनापि कृताधिबन्धम्। तत्रापि कथं सुरवागेव तैराश्रिता, तया साकमन्यासां कासां भाषाणां व्यवहारस्तैर्विहितः कथञ्चेत्यादिविषया अपि व्याख्याताः।

किञ्च, वाङ्मयेऽस्मिन् केषां केषां काव्यानामन्तर्भुक्तिः सम्भवेति विषये चर्चा ततो मया कृता। तदर्थं मयादौ संस्कृतखृष्टीयसाहित्यस्य महाकाव्यानां, ततश्च खण्डकाव्यानां, ततश्च गद्यकाव्यानां तथा अनूदितकाव्यानाम् अन्ते च विविधकाव्यानां काचनानुक्रमणिका सुविस्तृता प्रस्तुता। अध्यायस्यान्तिमे भागे मया काव्यकृतां तेषामुल्लेखो विहितः, ये खलु समग्रमपि साहित्यमिदं सृष्टवन्तस्तथा पल्लवितवन्तः – अभारतीया भारतीया वा कवयः।

'श्री-जान्-म्यूरः (John Muir)' इति तृतीयेऽध्याये श्री-जान्-म्यूरस्य जन्मनः आरभ्य मृत्युपर्यन्तं सम्पूर्णमपि जीवितं सतथ्यं विवृतम्। तस्य बाल्यशिक्षातः जीवनस्य सर्वस्मिन्नपि परिसरे कुत्र कुत्र कदा कदा वा तेन शिक्षा स्वीकृता तत्सर्वमपीह प्रस्तुतम्। ततश्च कर्मजीवनविषयेऽपि एकैकं वृत्तमत्र मया वर्णितम्। म्यूरवर्य इस्ट-इण्डिया-कम्पानी इति संस्थायाः सेवकरूपेण समागतो भारतम्, विविधकाले विविधपदञ्च स्वीकृत्य सेवानिरतश्चासीत्सः। तत्सर्वमपि तथ्यं मयेह सप्रमाणं समुल्लिखितम्।

ततश्चाध्यायेऽस्मिन् श्रीम्यूरवर्यस्य सारस्वतजीवनमाश्रित्य मया चर्चा कृता। आदौ तेन प्रणीतानां संस्कृतकाव्यानां नामोल्लेखपुरःसरं तत्तत्काव्यविषये समासेनालोचना विहिता, ततश्च तेन आङ्गलभाषया प्रणीतानां ग्रन्थानां विषयः सङ्क्षेपेण समुपन्यस्तः, अन्तिमे च तद्रचितानां प्रबन्धानां नामान्युल्लिख्य तेषां विषयोऽप्यालोचितो मया।

श्री-जान्-म्यूर-प्रणीतं जगत्प्रभोर्येष्वः शिष्येष्वन्यतमस्य श्रीपौलस्य जीविताश्रितं *श्रीपौलचरित्रम्* इत्याख्यं काव्यरत्नमेकं समाश्रित्य संस्कृतालङ्कारिकदिशा समीक्षणं कर्तुहमचेष्टिष्यधिगवेषणं '*श्रीपौलचरित्रम्* – जान्-म्यूर-प्रणीतं महाकाव्यम्' इति चतुर्थाध्याये। मया काव्यस्यास्य महाकाव्यत्वविचारः संस्कृतालङ्कारिकदृष्ट्या विस्तरेण विहितः। एवञ्च मयात्र काव्यस्यास्य गुण-रचनाशैली-छन्दोऽलङ्कार-व्याकरणगतवैशिष्ट्यादिविषयेऽपि सुतरामेव सावधानं समीक्षा विहिता ययास्य काव्यस्य सामग्रिकं विश्लेषणं सुकरं स्यात्, संस्कृतसाहित्ये विशेषतया संस्कृतखृष्टीयसाहित्ये काव्यस्यास्य गुणमानमपि निर्धारितं भवेत्।

विविधशास्त्रनिष्णातानां विमलप्रतिभानशालिहृदयानां तत्रभवतां प्रख्यातप्राच्यतत्त्वज्ञानसमृद्धानां श्रीजान्-म्यूर-पादानां ज्ञानं कीदृग् गभीरं विशालं प्रशस्तञ्चास्तीत्यत्र तत्प्रणीतानि प्रायः

त्रयोदशसङ्ख्यकानि संस्कृतगिरा प्रणीतानि काव्यान्येव साक्ष्यमावहन्तीति मन्नयः। तथाहि 'श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा' इत्याख्ये पञ्चमाध्यायेऽस्मिन् *श्रीयेषूखृष्टमाहात्म्य* – *मतपरीक्षा* – *पापमोचनीययथार्थोपायप्रदर्शन* – *शर्म्मपद्धति* – *निस्तारमार्गदीपिका* – आख्यानां पञ्चानां खृष्टीयमतपल्लवितानां संस्कृतकाव्यानां सूक्ष्मेक्षिकया विमृष्टिरिह विहिता मया संस्कृतालङ्कारिकदिशा तथा च धर्मतत्त्वगतदिशा।

'जान्-म्यूर-कृतं संस्कृतसाहित्यम् - सामग्रिकं मूल्यायनम्' इति षष्ठाध्याये प्राथम्येन म्यूरमतेन धर्मतत्त्वमीमांसा सविस्तरं पल्लविता। तत्र खृष्टधर्मेण समं भारतीयसनातनधर्मस्य तुलनात्मकमालोचनमपि स्थानं प्राप्तम्। ततश्च प्राग्भूतानां कवीनां प्रभावोऽपीह यथासाध्यं स्पष्टीकृत इत्यस्या गवेषणायाः काचन विशिष्टा दिक्, यत्र कवीनां शास्त्रकाराणां वा मिथः चेतःसाम्यं क्वचिद्वा वैमत्यमपि नूनमेव ज्ञातुं शक्यते। तदनु श्री-जान्-म्यूरस्य जीवनदर्शनस्य विविधा दिशः सुष्ठु प्रतिपादनपुरःसरं प्रायः सर्वेष्वेव शास्त्रेषु तस्य दाक्ष्यमपि शोधबन्धेऽस्मिन् प्रकाशितम्।

गवेषणाबन्धस्यान्तिमे परिशिष्टाख्यांशो मया चतुर्धा विभक्तः। आदौ श्रीजान्-म्यूर-वर्यस्य सम्पूर्णा काचन वंशतालिका मयात्र प्रस्तुता। ततश्च द्वितीये भागे म्यूरकवेः काव्यग्रन्थेभ्यः सुभाषितानि सङ्गृह्य कश्चन सुभाषितरत्नकोशः प्रस्तुतः। तृतीये च विविधानां पारिभाषिकशब्दानामपि काचन तालिका प्रदत्ता। अन्तिमे कमलाकान्तविद्यालङ्कारेण प्रणीता संस्कृतखृष्टीयसाहित्यस्य प्रणेतृप्रशस्तिः साङ्गलानुवादं प्रस्तुता। गवेषणाबन्धस्यान्ते च परिशीलितानां ग्रन्थानां गवेषणाबन्धानां च काचन विस्तृतानुक्रमणिका परिवेशिता, यस्याः समवलोकनमात्रमेव संस्कृतखृष्टीयसाहित्यसम्बन्धिनां प्रायः समेषां ग्रन्थानां ज्ञानमपि भवेत्, भविष्यति गवेषणादिकर्मण्यनुसन्धातॄणां महानुपकारोऽपि जायेतेति मे सुनिश्चितः समयः।

अतो विषयवैचित्र्येण नितरामेव नूत्नोऽयं गवेषणाप्रबन्धः 'संस्कृतखृष्टीयसाहित्या'त्मिकामिमां गौरवमयीमैतिह्यधारां समेषामेव विदुषां तथानुसन्धित्सूनां च विद्यार्थिनां समक्षमवश्यं प्रकाशयेत्, येन च विश्वसाहित्यसंस्कृतिर्नवीनमेकं यात्रापथं प्राप्नुवन्ती विश्वकल्याणं साधयेदिति तु निश्चप्रचम्।

यद्वा भवतु, 'संस्कृत-खृष्टीय-साहित्य'स्य विशालस्य महोदधेः सन्तरणं तु प्रायोऽसम्भवपरमेव। तेन सम्यगेव समुपलब्धिर्मे जाता यत् –

'तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।' इति। (रघुवंशम्, १/२)

परिशेषे त्ववश्यं वक्तव्यं यद्गवेषणाभिसन्दर्भान्तर्गतास्त्रुटयस्तु नैव मेऽनैकाग्र्यस्य परिचायिकाः, अपि त्वज्ञताया एव मे निदेशिकाः। तस्मात्तासां संशोधन-परिवर्तन-परिवर्धनादिविचाराश्च कृतज्ञतापुरःसरं स्वीकरिष्यन्त इत्यत्र न काचित् संशीतिः। संस्कृतानुरागिणां छात्राणां न्यूनामपि जिज्ञासातृष्णां यद्ययं गवेषणाप्रबन्धः समेधत, तर्हि श्रमो मे फलेग्रहिः। अन्तिमे कालिदासभणितिमनुसरता सहृदयहृदयानां परिशीलितचिन्तनमाकाङ्क्षमाणेनोच्यते –

'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा' (रघुवंशम्, १/१०) इति शिवम्।

इति

यादवपुरम्, कोलकाता — विद्वद्वशंवदः,

१५.०४.२०२१ (बङ्गीयं नववर्षम्) — **सौम्यजित्-सेनः।**

# ।। कार्तज्ञ्यनिवेदनम् ।।

"योऽन्धं करोत्यक्षिमन्तं यश्च बालं प्रबोधयेत्।

तमेवाध्यापकं मन्ये तदन्ये नामधारिणः।।"

विद्यावारिधौ निमिमङ्क्षुं सन्तरणमजानन्तमन्धमिव मा सज्ज्ञानप्रभोद्भासेन चक्षुष्मन्तं विधाय याः खलु सततं सुविशाले सुगभीरे च काव्यशास्त्रार्णवे तर्त्तुमशिक्षिषत, यासां चानन्यामनुप्रेरणां सङ्गीकृत्याद्यास्मिन् 'संस्कृतखृष्टीयसाहित्या'त्मके सुधासागरे सन्तरणेप्सुरहं, यासां किल छात्रवात्सल्येनात्मीयभावनया च कृतार्थोऽहं सुविस्तृतेऽस्मिन् जीवनयात्राध्वनि पश्चादनभिमुखी सन्नियतमेवाग्रे चलितुं शिक्षामाप्नवम्, ता निश्चयेनैव मदीयगवेषणाबन्धस्यास्य निदेशिका मातृसमा मे गुरुवर्या यादवपुरविश्वविद्यालयस्य संस्कृतविभागस्य ख्यातकीर्तयः प्रवराध्यापिकास्तत्रभवन्त्यः प्रफेसर्-ऋता-चट्टोपाध्यायमहाभागाः। ताभिरेव प्राध्यापिकाभिर्निर्दिष्टोऽयं गवेषणाविषयः। अतस्ताः प्रति साम्प्रतं मामकमाधमर्ण्यं सविनयं प्रकाश्य तच्चरणकमलयुगले श्रद्धापूर्णां प्रणतिं च विज्ञाप्य मत्प्रणीतेन श्लोकेन वक्तुमीहे –

"सारस्वतार्चनासक्तां संस्कृतज्ञानदां शिवाम्।

ऋतार्चिकामृतासंज्ञां वन्देऽध्यापिकां पराम्।।" इति।

"सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।"

- इति शास्त्रवाचं स्मारं स्मारं पितरौ प्रति मेऽकुण्ठं श्रद्धानिर्भरं प्रेम विज्ञाप्यते। गवेषणाकर्मणो निर्विघ्नपरिसमाप्तये भगवतः सकाशे तयोर्निरन्तरप्रार्थनाया एव फलमिदं प्रस्तुतं गवेषणाकार्यमिति सम्पूर्णमिदं गवेषणाकर्म ताभ्यामेव मे पितृभ्यां समुत्सर्गीक्रियते। वस्तुतस्तयोः शुभाशिषं तथां प्रेमपूरितामनुप्रेरणामन्तरा मज्जीवनमेव व्यर्थतामियादिति तयोश्चरणाब्जयोर्नमःपूर्वं स्मर्यते च शास्त्रोक्तिः –

"मातृपितृकृताभ्यासो गुणितामेति बालकः।

न गर्भच्युतिमात्रेण पुत्रो भवति पण्डितः।।" इति।

'क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्।' इति। (कुमारसम्भवे, ६/१३)

समेषामेव मनुजनूनां जीविते केषाञ्चिन्मनुष्याणामवदानं तु शब्दैर्व्याकर्तुं न शक्यम्। तादृशी एव काचिन्महीयसी नारी भवति मे सहधर्मिणी पम्पाभिधाना, यस्याः प्रेमपूरितेन वचोविन्यासेन सदुपदेशेन च मामकीनं कृत्यं कर्म दिनं दिनं सुकरं भवति, यस्या अनुप्रेरणया मज्जीवितं सततमेव धर्माध्वनि प्रवर्तितं भवति, यस्याश्च शुभचिन्तया प्रत्यक्षसाहाय्येन च मदीयं सार्वत्रिकं कल्याणं सदैव भवतीति तां प्रति हृदयोत्सारितान् धन्यवादान् विज्ञाप्य तस्याः सर्वविधां संसिद्धिश्च वाञ्छता मया वाल्मीकिवाचं किञ्चित्परिवर्त्य वक्तुं शक्यते –

'पत्नीहीनस्तु यः स्वामी न स शक्ष्यति जीवितुम्।' इति।

'A Good teacher teaches; a talented teacher makes you understand, and a great teacher inspires.'

- इति मदीयाचार्यायाः प्रफेसर्-ऋता-चट्टोपाध्यायमहाभागाया वाचमनुसरता वक्तुमलं यद् येषां प्रोद्बोधिका गीः सन्ततं मामनुप्रेरयति गवेषणाकर्मणि, येषां चात्मजप्रेम सर्वदा मयानुभूतम्, येषां साक्षात्साहाय्यं विविधानां शास्त्राणामर्थावगतये मया सदैवावाप्तम्, ते खलु भवन्ति महान्तोऽध्यापकाः प्रफेसर्-अयनभट्टाचार्यचरणाः, ड.सत्यव्रतपाहाडीमहोदयास्तथा च ड.साबिर-आलि-महाभागाः। अतस्तेषां समेषामेव पादपद्मेषु प्रणतिं सश्रद्धां विज्ञाप्य शास्त्रवचनमुच्चार्यते –

"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।" इति।

गवेषणाकर्मण्यस्मिन् नैकेषां ग्रन्थानां प्रबन्धानां तथ्यानां च समवाप्तये येषां वैदेशिकानामाचार्याणां विदेशस्थितानां वा बान्धवानां महदवदानमवश्यमानतशिरसा स्वीकार्यम्, ते भवन्ति आमेरिका-

देशस्य प्रिन्सटन-थिओलजिकल-सेमिनारीत्यस्य ख्याताः प्राचार्याः प्रफेसर्-रिचार्ड-फक्स-इयङ्ग-वर्याः, इंलण्डदेशस्य लण्डनविश्वविद्यालयस्य इतिहासविभागस्य प्रख्याताः प्राध्यापिकाः प्रेफसर्-एभ्रिल-ए-पाओयेल-वर्याः, नेदारल्याण्ड-देशस्य लाइडेन-विश्वविद्यालयस्य संस्कृतस्य प्राध्यापकाः प्रफेसर्-पिटार-बिशप-वर्याः, फ्रान्स-देशस्य प्यारिस-विश्वविद्यालयस्य संस्कृतस्य प्रख्याताः प्राचार्याः प्रफेसर्-जान-हुवेन-वर्याः, स्कटल्याण्ड-देशस्य एडिनवार्ग-विश्वविद्यालयस्य संस्कृतस्य प्राध्यापकचराः प्रफेसर्-पल-डानडास-वर्याः, अस्ट्रिया-देशस्य भियेना-विश्वविद्यालयस्य ड.आलेक्सान्द्रा-स्कुबा-वर्याः, इंलण्ड-देशस्य अक्सफोर्ड-विश्वविद्यालयस्य संस्कृतस्य गवेषकः भलतार्स-नेग्रिव्स-महोदयः, कानाडा-देशस्य अलवार्टा-विश्वविद्यालयस्य गवेषकः ममाग्रजतुल्यः श्रीदीप्रचक्रवर्ती, आमेरिका-देशस्य निउ-इयर्क-देशस्य तुलनात्मकसाहित्यविभागस्य गवेषको मे सुहृत् श्रीतुहिनभट्टाचार्यश्च। सर्वेभ्यस्तेभ्यः प्राचार्येभ्यः बन्धुवर्येभ्यश्च यथाक्रमं प्रणतिततिं तथा मामिकां हार्दां कृतज्ञताञ्च विज्ञापयामि।

येषां ग्रन्थागाराणां साहाय्यं व्यतिरिच्यास्य गवेषणाभिसन्दर्भस्य समाप्तिः कदापि न सम्भवेत्, ते भवन्ति इंलण्ड-देशस्य विश्वविख्यातं ब्रिटिश-लाइब्रेरी, अक्सफोर्ड-विश्वविद्यालयस्य बोडलियन-लाइब्रेरी, भारतवर्षस्य कोलकातास्थितः जातीय-ग्रन्थागारः, कोलकातायाः एशियाटिक-सोसाइटि-इत्यस्य ग्रन्थागारः, कोलकातास्थायाः संस्कृतसाहित्यपरिषदो ग्रन्थागारश्च। एतेषां ग्रन्थागाराणां कार्यकर्तृभ्यो विनिवेद्यन्ते भूरिशो धन्यवादाः।

यस्य खल्वग्रजस्य नामस्मरणमात्रेणैव चिन्ताव्यग्रं मे मनः सदैव प्रशान्ततामेति, स हि मदीयः शिक्षकस्तथाग्रजस्तथा च ‘MCKV Institute of Engineering’ इत्याख्यस्य महाविद्यालयस्याध्यापकः श्री-आशिष-कुमार-वसु-वर्यः। एवमेव यस्याग्रजस्यामनुप्रेरणया तथा प्रत्यक्षसाहाय्येनाहं गवेषणाकर्मणि सदैव प्रचोदितो भवामि, स हि गौडबङ्ग-विश्वविद्यालयस्य संस्कृतविभागस्याध्यापकस्तथा च मामकः स्वीयो ज्येष्ठभ्राता श्री-शुभ्रजित्-सेनः। तयोरुभययोः पादयोः प्रणतिं विज्ञाप्य, निरामयं दीर्घजीवनं तथा समुत्तमा सारस्वती ऋद्धिश्च काम्येते। गवेषणाकार्यस्य समाप्तौ यस्य प्रोत्साहनं सर्वाधिकमासीत्, येन च बहुसमयव्ययेनास्य गवेषणाबन्धस्य प्रतिपदपाठपूर्वं यथासाध्यं मुद्रणादिदोषपरिष्कारः कृतः, स भवति मेऽपरोऽग्रजः सहकर्मी सहयोद्धा कोचविहारपञ्चाननवर्माविश्वविद्यालयस्य संस्कृतविभागस्याध्यापकः

ड.अभिजित्-मण्डलः। तं प्रत्यपि कार्तज्ञ्यं धन्यवादांश्च विनिवेद्य तस्य सर्वथोन्नतिः काम्यते। किञ्च, श्रुतिसंज्ञकाया मदीयायाः सोदर्यायाः प्रेमपूर्णैर्वचनैः सर्वदैव गवेषणाकार्यभाराक्रान्तं चित्तं मे नितरामेव प्रशान्तिमवाप्नोदीति तस्या भाविकल्याणमवश्यमाकाङ्क्ष्यते।

गवेषणाकार्यमिदं सम्पादयितुं येषां प्रत्यक्षस्तथा परोक्षः प्रभावोऽवश्यं स्वीकार्यस्ते हि भवन्ति मदग्रजसम्मिताः श्री-शमीकबिन्दु-आब्दुलमतिन-सन्तुसिंह-विवेककर्मकार-अनिरुद्धकराः तथा बान्धवतुल्या दिगन्तभट्टाचार्य-मलयदे-श्यामलपण्डा-देवव्रतसरकार-माधुरीघोष-तथागतमण्डल-प्रभृतयो मदीया बान्धवाः। तेषां मनोवाक्कायकर्मभिर्विहितं साहाय्यं स्मारं स्मारं तेभ्यो हार्दिकान् धन्यवादान् निवेद्य सुतरामेव तेषामभ्युदयः सार्वजनीनः काम्यते।

परिशेषे तु परमात्मनः कृपा सर्वेष्वपि मनुष्येषु नियतं प्रावर्षेतेति भूयो भूयः सम्प्रार्थ्यात्रैव विरम्यते मयेति शिवम्।

इति

यादवपुरम्, कोलकाता — विनीतः,

१५.०४.२०२१ (बङ्गीयं नववर्षम्) — **सौम्यजित्-सेनः।**

# ।। विषयानुक्रमणिका ।।


विषयाः — पृष्ठाङ्काः

- मङ्गलशंसा — **ii**
- प्रास्ताविकम् — **iii - vii**
- कार्तज्ञ्यनिवेदनम् — **viii - xi**
- विषयानुक्रमणिका — **xii - xv**
- शब्दसंकेतसूचिका — **xvi - xviii**
- चित्रवीथिका — **xix - xx**
- श्री-जान्-म्यूरस्य जीवितचर्यासारः — **xxii**
- प्रथमोऽध्यायः - १.०. उपोद्घातः — **1 -15**
  - १.१. गवेषणाबन्धस्य सारः — 2 - 5
  - १.२. गवेषणाविषयावाप्तिः — 5 - 7
  - १.३. गवेषणाबन्धस्य नामान्वर्थ्यम् — 7 - 8
  - १.४. गवेषणाबन्धस्य प्रतिपाद्यविषयाः — 8
  - १.५. गवेषणापारिमित्यम् — 8 - 9
  - १.६. ग्रन्थसमीक्षणम् — 9 - 12
  - १.७. पद्धतिविज्ञानम् — 12 - 13
  - १.८. वर्णविन्यासविधिः (Orthography) — 13 - 15
- द्वितीयोऽध्यायः - २.०. संस्कृतखृष्टीयसाहित्यम् — **18 - 51**
  - २.१. उपोद्घातः — 19 - 20
  - २.२. किं तावत् संस्कृतखृष्टीयसाहित्यम् ? — 20 - 24
  - २.३. संस्कृतखृष्टीयसाहित्यस्य भाषाविमर्षः — 24 - 26
  - २.४. संस्कृतखृष्टीयसाहित्ये काव्यानि — 26 - 49
    - २.४.१. महाकाव्यानि — 27 - 36

२.४.२. खण्डकाव्यानि 36 - 40

२.४.३. गद्यकाव्यानि 40 - 42

२.४.४. अनूदितकाव्यानि 42 - 44

२.४.५. विविधकाव्यानि 44 - 49

२.५. संस्कृतखृष्टीयसाहित्ये कवयः 49 - 51

२.५.१. अभारतीयकवयः 50

२.५.२. भारतीयकवयः 50 - 51

- तृतीयोऽध्यायः - ३.०. श्री-जान्-म्यूरः **(John Muir)** **54 - 69**

३.१. कर्मजीवितम् 55 - 62

३.२. सारस्वतजीवितम् 62 - 69

३.२.१. संस्कृतकाव्यग्रन्थग्रामाः 63 - 65

३.२.२. आङ्गलग्रन्थग्रामाः 65 - 67

३.२.३. प्रबन्धनिचयाः 67 - 69

- चतुर्थोऽध्यायः - ४.०. *श्रीपौलचरित्रम्* – जान्-म्यूरप्रणीतं महाकाव्यम् **71 - 106**

४.१. हस्ताधिगतं संस्करणम् 73

४.२. महाकाव्यस्य विषयवस्तु 73 - 86

४.२.१. प्रत्यध्यायं सारः 74 - 86

४.३. अन्वर्थसंज्ञात्वम् 86 - 88

४.४. आलङ्कारिकदृष्ट्या महाकाव्यत्वविश्लेषणम् 88 - 93

४.४.१. सर्गबन्धत्वम् 88 - 89

४.४.२. इतिवृत्तम् 89

४.४.३. नायकः 89 - 90

४.४.४. रसतत्त्वम् 90 - 91

४.४.५. चतुर्वर्गफलत्वम् 91

४.४.६. वस्तुनिर्देशः 91 - 92

४.४.७. सर्गसंख्या 92 - 93

४.५. गुणसमीक्षा 93 - 95

४.६. रचनाशैली 95 - 98

४.७. छन्दोविचारः 98 - 100

४.८. अलङ्कारविमर्शः 100 - 103

४.९. व्याकरणगतं वैशिष्ट्यम् 103 - 105

४.१०. काव्यप्रशस्तिः 105 - 106

- पञ्चमोऽध्यायः - ५.०. श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा **111-160**

५.१. *श्रीयेषूखृष्टमाहात्म्यम्* 112 - 132

५.२. *मतपरीक्षा* 132 - 146

५.३. *पापमोचनीययथार्थोपायप्रदर्शनम्* 146 - 151

५.४. *शर्म्मपद्धतिः* 151 - 155

५.५. *निस्तारमार्गदीपिका* 156 - 160

- षष्ठोऽध्यायः - ६.०. जान्-म्यूर-कृतं संस्कृतसाहित्यम् - सामग्रिकं समीक्षणम् **163 - 183**

  ६.१. समीक्षकसमीक्षा 165 - 166

  ६.२. धर्मतत्त्वमीमांसा – श्रीजान्म्यूरदिशा 167 - 170

  ६.३. प्राग्भवानां कवीनां शास्त्राणां च प्रभावः 171 - 176

  ६.४. श्री-जान्-म्यूरस्य जीवनदर्शनम् 177 - 178

  ६.५. प्रकाण्डज्ञाननिधिः श्री-जान्-म्यूरः 178 - 183

- उपसंहृतिः **189 - 199**
  - ➢ ऐतिह्याधुनिकतयोः समन्वयः 193 - 196
  - ➢ भाव्यगवेषणावकाशः (Scope of Further Research) 196 - 199

- परिशिष्टानि **201 - 216**

  क) श्री-जान्-म्यूर-वंशतालिका (Geneology of Muir Family) 201

  ख) श्रीजान्-म्यूर-प्रणीते संस्कृतखृष्टीयसाहित्ये सुभाषितानि 202 - 209

  ग) शब्दनिर्घण्टः 210 - 212

  घ) संस्कृतखृष्टीयसाहित्यकर्तृप्रशस्तिः 213 - 216

- परिशीलितग्रन्थानुक्रमणिका **217 - 242**

# ।। शब्दसंकेतसूचिका ।।

- **अग्नि. पु.** --- *अग्निपुराणम्*, (सम्पा.) पञ्चानन-तर्करत्नः, नवभारत-पाब्लिशार्स, कलिकाता, १३८९ (वङ्गाब्दः).
- **उत्तर. राम.** --- *उत्तररामचरितम्* (भवभूति-प्रणीतम्), (सम्पा.) सारदारञ्जन-रायः, सारदारञ्जन-कृत-*मितभाषिणी*-टीकोपेतम्, (संशोधितं परिवर्धितं च) कुमुदरञ्जन-रायः, अरफन प्रेस, १९२४ (षष्ठ-संस्करणम्).
- **औचित्य.** --- *औचित्यविचारचर्चा* (क्षेमेन्द्राचार्य-कृता), काव्यमाला-संस्करणम्, १९२९.
- **का. आ.** --- *काव्यादर्शः* (दण्ड्याचार्यविरचितः), प्रेमचन्द्रतर्कवागीश-भट्टाचार्य्य-विरचितः *मालिन्यप्रोञ्छनी* -टीकासहितः, (सम्पा.) चिन्मयी चट्टोपाध्याय, पश्चिमबङ्ग राज्य पुस्तक पर्षत्, कोलकाता, १९९५.
- **का. अ. (भामह.)** --- *काव्यालङ्कारः* (भामह-प्रणीतः), (सम्पा.) रमणकुमारशर्मा, विद्यानिधिः, दिल्ली, १९६५.
- **का. प्र.** --- *काव्यप्रकाशः* (मम्मटाचार्य-विरचितः), (सम्पा.) वामनाचार्यझालकिकारः, भाण्डारकर ओरियेण्टाल रिसार्च इनस्टिटिउट, पुणा, १९६५.
- **का. मी.** --- *काव्यमीमांसा* (राजशेखर-रचिता), (सम्पा.) सि. डि. दालालः तथा आर. ए. शास्त्री, (संशोधिता परिवर्धिता च) के. एस. रामस्वामी शास्त्री शिरोमणिः, ओरियेण्टाल इन्सटिटिउट, बडोदा, १९३४ (तृतीयसंस्करणम्).
- **का. सू. वृ.** --- *काव्यालङ्कारसूत्रवृत्तिः* (वामनाचार्य-कृता), श्रीवाणीविलास शास्त्र सिरिज – ५, श्रीरङ्गम्, १९०९.

- **खृष्टसाहित्य.** --- Shastri, Satya Vrat. "Modern Christian Literature in Sanskrit." *Veva-vāṇī-suvāsaḥ (Rama Kant Felicitation Volume)*, New Delhi, Devavani Parishad, 1991, pp. 5.313 – 5.325. (An Article).
- **ना. शा. (नागर.)** --- *नाट्यशास्त्रम्* (भरत-प्रणीतम्), (प्रथमतः चतुर्थखण्डः), (सम्पा.) आर. एस. नागरः, परिमल पाब्लिकेशन, देह्ली (अधुना दिल्ली), २००३ (पुनः प्रकाशितम्).
- **ना. शा. (पारस.)** --- *नाट्यशास्त्रम्* (भरतप्रणीतम्), (प्रथमतः चतुर्थभागः), (सम्पा.) पारसनाथद्विवेदी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, १९९२.
- **पा. सू.** --- पाणिनीयसूत्रम् (अष्टाध्यायीस्थम्)
- **पापमोचन.** --- *पापमोचनीययथार्थोपायप्रदर्शनम् – The Inefficacy of the Ganges to Wash Away Sin, with a Statement of the True atonement, etc.* (जान्-म्यूर-प्रणीतम्), ब्याप्टिस्ट-मिशन-प्रेस, कलिकाता, १८४०.
- **व. जी.** --- *वक्रोक्तिजीवितम्* (कुन्तक-रचितम्), स्वोपज्ञवृत्तिसमेतम्, (सम्पा.) सुशीलकुमार दे, फार्मा. के. एल. मुखोपाध्याय, कलिकाता (अधुना कोलकाता), १९६१ (तृतीया अङ्कनावृत्तिः).
- **श्री. पौ. च.** --- *श्रीपौलचरित्रम् – A Short Life of the Apostle Paul with a Summary of Christian Doctrines as Unfolded in His Epistles* (जान्-म्यूर-प्रणीतम्), एनसाइक्लोपिडिया प्रेस, कलिकाता, १८४९.

- श्री. येषू. मा. --- *श्रीयेषूखृष्टमाहात्म्यम्* - *The Glory of Jesus Christ: A Brief Account of Our Lord's Life and Doctrines* (जान्-म्यूर-प्रणीतम्), आमेरिकान मिशन प्रेस, बोम्बे, १८५२ (प्रथम-बोम्बे-संस्करणम्).
- सा. द. (हरिदास.) --- *साहित्यदर्पणः* (विश्वनाथ-रचितः), *कुसुमप्रतिमा* - टीकोपेतः, (सम्पा.) हरिदाससिद्धान्तवागीशः, सिद्धान्तविद्यालयः, कलिकाता, १८७५ (पञ्चमं संस्करणम्).
- **Ind. Christ.** --- Amaladass, Anand, and Richard Fox Young. *The Indian Christiad: A Concise Anthology of Didactic and Devotional Literature in Early Church Sanskrit*. Anand, Gujarat Sahitya Prakash, 1995.
- **Sans. Bib.** --- Dhavamony, Mariasusai. "The Lord's Prayer in the Sanskrit Bible." *Gregorianum*, vol. 68, 1987, pp. 639-670.

# ।। चित्रवीथिका ।।


| चित्रम् | पृष्ठम् |
|---|---|
| 1. **Epitaph** of **John Muir**. | 120 |
| 2. **Ferdinand Kittel** (1832-1903). | 53 |
| 3. **James R. Ballantyne** (1813-1864). | 52 |
| 4. **John Muir** (1810-1882). | xxi |
| 5. **Roberto de Nobili** (1577-1656). | 16 |
| 6. Title Page of ***A Trip to Kedernath and Other Parts of the Snowy Range of the Himalayas in the Autumn of 1853 with Some Account a Journey from Agra to Bombay by Way of Ajanta, Ellora, and Carlee in 1854*** by John Muir. | 188 |
| 7. Title Page of ***Original Sanskrit Texts on the Origin and History of the People of India, Their Religion and Institution*** (Vol. - First) by John Muir. | 185 |
| 8. Title Page of ***Reasons for the Establishment of a Sanskrit Chair in the University of Edinburgh*** by John Muir. | 186 |
| 9. Title Page of ***Religious and Moral Sentiments: Metrically Rendered from Sanskrit Writers*** by John Muir. | 187 |
| 10. Title Page of ***The Holy Bible in the Sanscrit Language***. | 161 |

11. Title Page of ***The New Testament of Our Lord and Saviour Jesus Christ in Sanscrit***. 162

12.Title Page of *ईश्वरोक्तशास्त्रधारा* by John Muir. 108

13. Title Page of *क्रिस्तुभागवतम्* by P.C. Devassia. 184

14.Title Page of *मतपरीक्षा (भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः)* by John Muir. 110

15.Title Page of *शर्म्मपद्धतिः* by John Muir. 109

16.Title Page of *श्रीपौलचरित्रम्* by John Muir. 70

17.Title Page of *श्रीयेषूखृष्टमाहात्म्यम्* by John Muir. 107

18.**William Hodge Mill** (1792-1853). 17



**John Muir**

**(05.02.1810 – 07.03.1882)**

[Photo Courtesy: Oil Painting of John Muir by John Henry Lorimer,
The University of Edinburgh, Art Collection, 1881.]

## ।। श्री-जान्-म्यूर-जीवनचर्यासारः*** ।।

- १८१० : जन्म, ग्लासगो, स्कटल्याण्डः ।
- १८२०-३ : इरभिन-अकाडेमी (विद्यालयः), आइरशायारः ।
- १८२३-६ : ग्लासगो-महाविद्यालयः (विश्वविद्यालयः), कलाविभागः ।
- १८२६-७ : इस्ट-इण्डिया-कम्पानी-प्रशिक्षण-महाविद्यालयः, हेइलीवारी ।
- १८२७ : नियुक्तिः, बङ्गीय-जानपद-सेवायाम्, इस्ट-इण्डिया-कम्पानी ।
- १८२९ : फोर्ट-उइलियाम-महाविद्यालयः, क्यालकाटा ।
- १८२९ : मुख्य-समाहर्तुः सहायकः, नदीया, अधःस्थ-बङ्गप्रदेशः ।
- १८३०-३ : मुख्य-समाहर्तुः सहायकः, फारुखावाद, उत्तर-पश्चिम-प्रदेशः ।
- १८३३-७ : सहायक-सचिवः, राजस्व-विभागः, एलाहवादः ।
- १८३७-४२ : विशिष्टायोगिकः, भूम्यनुसन्धान-विभागः, मिराटस्तथा साहारानपुरः।
- १८४२-३ : कार्यनिवृत्तिः, स्कटल्याण्ड इउरोपश्च ।
- १८४४-५ : अध्यक्षः, भिक्टोरिया-महाविद्यालयः (कुइन्स-कलेज), वाराणसी ।
- १८४५ : मुख्य-समाहर्ता, आजमगडः ।
- १८४६ : मुख्य-समाहर्ता, गोरखपुरः ।
- १८४७-९ : मुख्य-समाहर्ता, आजमगडः ।
- १८५० : मुख्य-समाहर्ता, देहली ।
- १८५०-३ : जानपदविचारकस्तथा दण्डाधिकरणिकः, फतेहपुरः ।
- १८५३ : विविक्तवृत्तिः, एडिनवार्गः ।
- १८५५ : डि. सि. एल. (अक्सफोर्ड-विश्वविद्यालयतः) ।
- १८६१ : एल. एल. डि. (एडिनवार्ग- विश्वविद्यालयतः) ।
- १८७८ : सि. आइ. इ. (भारतीय-साम्राज्य-आदेष्टा) ।
- १८८२ : तनुत्यागः, एडिनवार्गः, स्कटल्याण्डः ।

[*** तालिकेयं ड.एभ्रिल.ए.पाओयेल-वर्यया प्रणीतस्य *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire* (२०१०) इति ग्रन्थस्य ‘Career Summaries’ इत्यंशान्मया सकार्तज्ञ्यं संगृहीता, संस्कृतेन च तामनूद्यात्र समुपस्थापिता।]

# प्रथमोऽध्यायः

## ।। उपोद्धातः ।।

# ।। उपोद्घातः ।।

## १.१. गवेषणाबन्धस्य सारः

संस्कृतभाषा निखिलविश्वस्य वाङ्मयेषु प्राचीनतमेष्वन्यतमा सर्वदेशव्यापिका सभ्यमात्रगौरवास्पदीभूता भारतमातुर्मौलिभूता भाषा विद्यते। न केवलं भारतीयाः, वैदेशिका अपि विद्वांसः संस्कृतभाषामविनाशिनीममरीं च मन्यन्ते। तस्मादेव यदा खृष्टधर्मप्रचारकाः समाजग्मुर्भारतवर्षं, तदा तैरवगतं यद् भारतीये समाजे खृष्टधर्मस्य तथाङ्गलानां चिरस्थायिप्रभावस्य स्थापनहेतोरादावेव भारतीयसंस्कृतेस्तथा भारतीयसाहित्यानां सम्यग् ज्ञानमत्यावश्यकमिति। यतस्तदानीमपि भारतीयायाः संस्कृतेश्चिन्ताधारायाश्च प्रधानभूतमाध्यमत्वेन संस्कृतमेव सर्वैर्विद्वन्मूर्धन्यैस्तथा सामाजिकैः समस्वरेण स्वीक्रियते स्म। अतः सूक्ष्मेक्षिकया सर्वं पर्यवेक्ष्य तैः खृष्टधर्मप्रचारकैः सिद्धान्तितं यद् भारतीयचिरन्तनैतिह्यस्य मूलस्तम्भभूतस्य संस्कृतस्याध्ययनं तु नितरां प्रयोजनमिति।

भारतभूमौ स्थापितचरणानां वैदेशिकानां विशेषत आङ्गलानां प्रधानतया द्वे उद्देश्ये स्तः। प्रथमतो व्यवसायिकप्रतिष्ठा अपरतश्च खृष्टधर्मप्रचार इति। अतो ब्राह्मणैः समं समाजे प्रभावोपेता जना यदि खृष्टधर्मं प्रति मनागप्याग्रहान्विता भवेयुस्तदा साधारणजनेष्वस्य धर्मस्य प्रचारः सुतरां निरलसतयैव सम्भवपरः स्यादित्येवं विचिन्तयद्भिस्तैः प्रचारकैर्भारतीयपण्डितानां सकाशात् संस्कृताध्ययनं समारब्धम्। गच्छता कालेन भाषायामस्याश्चाप्तव्युत्पत्तयस्ते संस्कृतभाषां द्वारीकृत्यैव खृष्टधर्मस्य प्रधानभूतानां *बाइबेला*दीनां धर्मग्रन्थानामनुवादकर्मणि कायमनोवाक्यैः प्रवृत्ता अभूवन्। न केवलमनुवाद एव स्वारसिकास्तेऽपि तु व्याकरणग्रन्थानां तथा चाभिधानग्रन्थानां रचनायामपि तेषामाग्रहः सुतरामेव वर्धित इत्यत्र नास्ति सन्देहलेशः। खृष्टधर्मस्योपजीव्यभूतानां ग्रन्थानां यथा – *Bible - Old and New Testaments - Sermon on the Mount* – इत्यादिकानां स्वल्पेनैव कालेन संस्कृतानुवादोऽपि प्रकाशितस्तैः। अत्रापि तेषां रचनाक्रिया न स्तब्धा, ते तदा तेषामिष्टभगवतो

येषूखृष्टस्य पवित्रं जीवनमाश्रित्य बहूनि काव्यानि सुरगिरा विरचयामासुः। गद्यमयानां तथा च पद्यमयानां तादृशानां काव्यानां संख्या न तु स्वल्पा, नूनमेवाङ्गुल्यगण्या।

अतः संजज्ञे संस्कृतसाहित्ये नितरामनालोचितावहेलिता विस्मृतप्राया परन्त्वविस्मरणीया काचिद्धारा, सा हि – '**संस्कृतखृष्टीयसाहित्यमि**'त्यभिधयाभिधीयते।

संस्कृतवाङ्मयमिव यद्यपि संस्कृतखृष्टीयसाहित्यवपुर्न विशालं, तथापि खृष्टधर्ममाश्रित्य प्रवर्तमानेयं संस्कृतसाहित्यात्मिका मधुधारा नैकानि सहृदयहृदयानि ह्लादयितुमलमित्यत्र नास्ति काचिद्विप्रतिपत्तिः। मया समवाप्तानां तथ्यानामनुसारं न्यूनातिन्यूनतया प्रायः त्रिंशत्संख्यकानि येषूखृष्टविषयकाणि संस्कृतभाषोपनिबद्धानि काव्यानि पाश्चात्यैः प्राच्यैश्च विद्वद्भिरूनविंश-विंशशतकयोर्विरचितानि, यानि खलु निश्चयेन संस्कृतसाहित्यजगतोऽसामान्यसम्पद्रूपेण विशिष्टामेकां धारां संसर्जयन्ति जनगणमानसं च मोहयन्ति वरीवर्तन्त इत्यत्र किं चित्रम् ?

'**संस्कृतखृष्टीयसाहित्यमि**'ति पदेन मयका खृष्टधर्मावलम्बिभिरन्यैर्वा विद्वद्भिर्विरचितानि श्रीयेषूखृष्टविषयकाणि तद्धर्मस्यान्येषां खृष्टीयमतप्रचारकाणां वा जीविताश्रितानि संस्कृतकाव्यकुसुमानि तथा च खृष्टधर्मस्य मूलभूततत्त्वान्युपजीव्य प्रणीतानि संस्कृतकाव्यान्येव बोधयितुमिष्यन्त इत्यवधेयम्।

इत्थमिदम्प्रथमतया कवितासुरधुन्या समुपप्लावयन्तः पृथ्वीं, संवर्धयन्तोऽनेककविकुलकमलान्, विकासयन्तश्च परस्सहस्राणि सहृदयहृदयमनःकैरवाणि जेजीयन्ते संस्कृतखृष्टसाहित्यसर्जकास्ते प्राच्यपाश्चात्याः कोविदकवयोऽजरामरेण यशःकायेन।

स्कटल्याण्डदेशस्य ग्लासगोवास्तव्यानां विविधशास्त्रनिष्णातानां विमलप्रतिभानशालिहृदयानां तत्रभवतां प्रख्यातप्राच्यतत्त्वज्ञानसमृद्धानां श्रीजान्-म्यूर-पादानां ज्ञानं कीदृग् गभीरं विशालं प्रशस्तञ्चास्तीत्यत्र तत्प्रणीतानि काव्यप्रबन्धादिकान्येव साक्ष्यमावहन्तीति मन्नयः। कारयित्री-भावयित्र्योरुभययोः प्रतिभयोरसामान्याधारत्वेन जान्-म्यूर-वर्याणां विदुषां संसदि प्रकाश इत्यत्र

किं चित्रम् ? तथाह्यत्र सहृदयानां मनसि प्रश्नः समुदियाद्यत्कानि तावत्काव्यानि तेन कविना प्रणीतानि, यान्यधिकृत्य गवेषणाप्रबन्धरचनायां कश्चन व्रती भवतीति। अतः समेषामनुसन्धित्सूनां सहृदयहृदयानामवगतयेऽधस्तात्तावत् प्रदीयते श्रीम्यूरपादानां समग्रेऽपि जीविते रचितानां संस्कृतकाव्यग्रन्थानां काचित्तालिका -

॥ श्री-जान्-म्यूरस्य रचनानुक्रमणिका ॥

१. *पापमोचनीययथार्थोपायप्रदर्शनम् – The Inefficacy of the Ganges to Wash away Sin, With a Statement of the True Atonement*, Baptist Mission Press, Calcutta, 1840.

२. *ईश्वरोक्तशास्त्रधारा – The Course of Divine Revelation; A Brief Outline of the Communication of God's Will to Man and of the Evidences and Doctrines of Christianity with Allusions to Hindu Tenets*, Baptist Mission Press, Calcutta, 1846.

३. *श्रीयेषूखृष्टमाहात्म्यम् – The Glory of Jesus Christ; A Brief Account of Our Lord's Life and Doctrines*, Ostell and Lepage, 1848.

४. *श्रीपौलचरित्रम्* or *श्रीयेषूखृष्टप्रेरितपौलचरित्रम् – A Short Life of the Apostle Paul with a Summary of Christian Doctrines as Unfolded in His Epistles*, Encyclopaedia Press, 1849.

५. *मतपरीक्षा – भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः, An Examination of Religions; Containing a Consideration of the Hindu Sastras*, Orphan Press, Mirzapore, 1852 (1st Ed. 1939).

*मतपरीक्षा – ख्रिस्तीयमतप्रदर्शनात्मको द्वितीयः खण्डः – Examination of Religions; Being an Exposition of the Evidences of Christianity for Hindus*, Bishop's College Press, Calcutta, 1854.

६. *निस्तारमार्गदीपिका – A Light for the Way of Salvation.* प्रकाशनकालोऽनुल्लिखितः।

७. *नूतनोदन्तोदोत्सः – The Fountain of Water of Fresh Intelligence: A Description of England*, Bishop's College Press, Calcutta, 1839.

८. *शर्म्मपद्धतिः – The Way of True Happiness: A Sketch of the True Theory of Human Life*, Richard Watts, London, 1841.

९. *परमात्मस्तवः – A Christian Hymn in Sanskrit Verse and Hindee Prose*, Allahabad Mission Press, Allahabad, 1853.

१०. *मानसधर्मदीपिका* – 1840.

११. *इतिहासदीपिका – A Sketch* of the History of India, Bishop's College Press, Calcutta, 1840. [Based on H.H. Wilson's Manual of History and Chronology.]

१२. व्यवहारालोकः – *Brief Lectures on Mental Philosophy and Other Subjects delivered in Sanskrit to the Students of the Benares Sanskrit College with an Address to the Pandits and Students*, Presbyterian Mission Press, Allahabad, 1845.

१३. *श्रीविद्याचमत्कारिका* – प्रकाशनकालोऽनुल्लिखितः।

अधिगवेषणमैदम्प्राथम्येन श्रीजान्-म्यूर-प्रणीतानि खृष्टीयविषयाश्रितानि संस्कृतकाव्यानि समीक्षितानि संस्कृतालङ्कारिकदिशा। तत्रापि प्रधानतया मया तदीयं *श्रीपौलचरित्रम्* इत्याख्यं महाकाव्यं सप्रपञ्चं व्याख्याय तावकानि खृष्टीयानि संस्कृतकाव्यान्तराण्यपि समासेन विश्लेषितानीति विषयनावीन्यमेवास्य गवेषणाविषयत्वेन ग्रहणप्रयोजकमिति समीक्षकैरस्मिन् ध्यानं देयं, न तु हेयधिया त्याज्यम्।

## १.२. गवेषणाविषयावाप्तिः

तत्त्वावधायिकया मे प्रफेसर्-ऋता-चट्टोपाध्याय-वर्यया निर्दिष्टोऽयं गवेषणाविषयः, तयैव विषयमिममुपजीव्य गवेषणाकर्मकरणायाहमादिष्ट इति तस्यै मामकमाधमर्ण्यं सविनयं विज्ञाप्यते। नावीन्यं त्वस्य विषयस्य श्रवणमात्रमेवाधिगम्यते। तस्या एव सकाशात्समवाप्तस्य प्रख्यातयशसा

श्रीसत्यव्रतशास्त्रिणा प्रणीतस्य *Modern Christian Literature in Sanskrit* इत्याख्यस्य प्रबन्धस्याध्ययनमनु संस्कृतभाषायां विरचितानां खृष्टीयकाव्यानामेका सुविस्तृता सूचिका मया प्रस्तुता। ततो बह्वन्वेषणं कृत्वा मया न्यूनातिन्यूनतया संस्कृतखृष्टीयवाङ्मयस्य प्राच्यपाश्चात्यविद्वद्भिर्विरचितानि त्रिंशत्संख्यकानि काव्यानि समवाप्तानि।

गच्छता कालेन साक्षात्कारो मे सञ्जातः प्रख्यातप्राच्यतत्त्वविदुषां स्कटल्याण्डवास्तव्यानां प्राध्यापकप्रवराणां श्री-जान्-म्यूर-वर्याणां सारस्वतकृतिभिः समम्। हृदयं मे चिन्तातल्पमञ्चति, वेगारम्भिणा विषाक्तेन शल्यशकलेन विद्धं शतधा च प्रयाति, यदा मनसि सम्यगाकलय्य विचार्यते यदेतेषां प्रकाण्डपण्डितानां म्यूर-पादानामेकमप्यपूर्वं संस्कृतकाव्यमाश्रित्याद्यावधि गवेषणादिकार्यं नैव सञ्जातमिति। केवलं Avril A. Powell-पादाभिः म्यूरभ्रातृद्वयस्य (John Muir & William Muir) मुख्यतया कर्मजीवनमाश्रित्य *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire* (२०१०) इत्याख्यं पुस्तकं निरमायीति ग्रन्थः समवाप्यते। परन्तु श्री-जान्-म्यूर-वर्याणां संस्कृतभाषानिबद्धं सम्पूर्णमपि संस्कृतखृष्टीयसाहित्यमुपजीव्याद्यावधि कश्चनाभिसन्दर्भो नैव केनचिदपि विद्वता विरचितो यत्र तेषां काव्यानां साहित्यिकं मूल्यं समीक्षितमस्तीति मे दृढा मतिः। यद्यपि म्यूरस्य *मतपरीक्षा* इति ग्रन्थमाश्रित्य प्रख्यातैतिहासिकेन श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण स्वीयगवेषणाकर्म कृतमिति सश्रद्धं स स्मर्यतेऽत्र। परवर्तिनि तद्गवेषणाकार्यं *Resistant Hinduism: Sanskrit Sources on Anti-Christian Apologetics in Early Nineteenth-Century India* इति नाम्ना ग्रन्थाकारं दधद् भियेनातः १९८१-संवत्सरे प्रकाशितम्। तेनैव प्रणीतम् *The Indian Christiad: A Concise Anthology of Didactic and Devotional Literature in Early Church Sanskrit* (१९९५) इति ग्रन्थो गवेषणापरिसरेऽस्मिन् सर्वमान्यत्वं भजते।

अतो विषयवैचित्र्येण नितरामेव नूत्नोऽयं गवेषणाप्रबन्धः 'संस्कृतखृष्टीयसाहित्या'त्मिकामिमां गौरवमयीमैतिह्यधारां समेषामेव विदुषां तथानुसन्धित्सूनां च विद्यार्थिनां समक्षमवश्यं प्रकाशयेत्, येन च मुख्यतया नवनवोन्मेषशालिप्रतिभावतः श्री-म्यूर-वर्यस्य तथा चान्येषामपि

संस्कृतखृष्टीयसाहित्यस्रष्टृणां कविकलापानां नाम विश्वसाहित्यचित्रवीथिकायां स्वर्णाक्षरैरङ्कितं स्यादिति तु सहृदयमाशासे।

### १.३. गवेषणाबन्धस्य नामान्वर्थ्यम्

मम गवेषणाबन्धे यानि यानि पदानि सन्ति, तानि सर्वाण्येवान्वर्थानि। गवेषणायाः प्रधानो विषयो वर्तते श्री-जान्-म्यूरस्य सारस्वतकृतिविषयिणी समीक्षेति। तस्याश्च चर्चायाः परिसरो भवति संस्कृतखृष्टीयसाहित्यमिति। तथाहि खृष्टमतमाश्रित्य प्रवर्तमानानि तत्प्रणीतानि संस्कृतकाव्यान्येव मे गवेषणाया मूलभूतश्चर्च्यो विषयः। तस्मान्मम गवेषणाबन्धस्य 'संस्कृतख्रिस्टीयसाहित्यनभसि श्री-जान्-म्यूर-(John Muir)-वर्यस्य सारस्वतमवदानम्' इति नाम निर्धारितम्। अस्मिन् शीर्षके विद्यमानं पदमाद्यं भवति 'संस्कृतख्रिस्टीयसाहित्यनभसि' इति। अतः सप्तम्यन्तं पदमिदं कमर्थं बोधयतीति मया द्वितीये 'संस्कृतखृष्टीयसाहित्यमि'त्यध्याये सप्रपञ्चं व्याख्यातम्। अत्र खृष्टीय-पदस्य गवेषणाशीर्षके *ख्रिस्टीय*- इत्येवंप्रकारेण वर्णविन्यासः कथं कृत इति सविस्तरमस्यैवाध्यायस्य *१.८. वर्णविन्यासविधिः* इत्यंशे प्रपञ्चितमिति सुधिभिस्तत्र द्रष्टव्यं कृपया। प्रसङ्गेऽस्मिन्नवधेयं यत् 'तस्येदम्'[1] इत्यर्थे 'वृद्धाच्छः'[2] इति सूत्रेण खृष्टस्येदं खृष्टसम्बन्धि इदमिति वार्थे खृष्टपदात् छप्रत्यये ततश्च 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'[3] इति सूत्रेण ईयादेशे खृष्टीय इति रूपम्। ततश्च श्री-जान्-म्यूर-विषयकं सर्वमपि तथ्यजातं मया तृतीयेऽध्याये प्रपञ्चितम्। सरस्वती देवतास्येति अण्प्रत्यये सारस्वतेति रूपम्। सरस्वत्या इदमिति वार्थे 'तस्येदमि'ति अणि सारस्वतम्। सरस्वतीसम्बन्धि इत्यर्थः। अव-पूर्वाद् दो-धातोः ल्युट्प्रत्यये अवदानमिति रूपनिष्पत्तिः। अवदानं नाम वृत्तं कर्म वा। यत् 'प्रशस्तमथ च निर्व्यूढं कर्म' तदवदानमिति शब्दकल्पद्रुमः। यस्मिन् कर्मणि

---

[1] पा. सू., ४.३.१२०.

[2] तत्रैव, ४.२.११४.

[3] तत्रैव, ७.१.२.

प्रवर्तिते सर्वैः प्रशस्यते तत्समास्तं कर्मैवावदानमिति ज्ञेयम्। अतो जान्-म्यूरस्य 'सारस्वतमवदानमु'पजीव्य मम गवेषणाबन्धस्य चतुर्थस्तथा पञ्चमोऽध्यायः प्रवर्तित इत्यनुसन्धित्सुभिस्तत्र तत्रानुसन्धेयम्।

## १.४. गवेषणाबन्धस्य प्रतिपाद्यविषयाः

क) संस्कृतखृष्टीयसाहित्यान्तर्गतानां काव्यानां रचनोद्देश्यसमीक्षणम्।

ख) संस्कृतखृष्टीयकाव्यानां सम्पूर्णानुक्रमणिकायाः सहृदयसमक्षं प्रस्तुतीकरणप्रयत्नः।

ग) संस्कृतखृष्टीयसाहित्यस्य कवीनां जीवितावलोकनम्।

घ) खृष्टीयमतान्युपजीव्य प्रणीतेषु काव्येषु ऐतिहासिकतथ्यानां याथार्थ्यविचारः।

ङ) संस्कृतालङ्कारिकदृष्ट्या काव्यानां परीक्षणम्।

च) काव्येषु भाषागतवैशिष्ट्यविचारः।

छ) प्राग्भवानां संस्कृताङ्गलादिकवीनां प्रभावविमर्शः।

ज) प्राच्यपाश्चात्यमतमालम्ब्य धर्मतत्त्वमीमांसा।

## १.५. गवेषणायाः पारिमित्यम्

गवेषणायाः परिमितिस्तु सुतरामेव सुचिन्तिततया संयमिता। अस्मिन् बन्धे मया केवलमेव श्री-जान्-म्यूर-वर्येण प्रणीतानां संस्कृतकाव्यकुसुमानां समीक्षणं विहितम्। अन्ये च ये खलु संस्कृतखृष्टीयसाहित्यस्य कवयः सन्ति, तेषां काव्यानामुल्लेख एव मयात्र कृतः, परं विस्तरशो व्याख्यानं नैव विहितम्। किञ्च, श्री-म्यूर-वर्यस्य समेषामपि संस्कृतकाव्यानां विचारो नैवेह सुलभः। केवलमेव तेषामेव संस्कृतकाव्यानां विमर्शनमत्र प्राप्तुं शक्यं, यानि किल खृष्टीयमतमाश्रित्यैव प्रणीतानीति विशेषः। तत्रापि मुख्यतया *श्रीपौलचरित्रम्* इति दशसर्गात्मकं महाकाव्यमाश्रित्यैव मदीयगवेषणाभिसन्दर्भस्य सम्पूर्णोऽध्याय एकः प्रवर्तितो ग्रन्थस्यास्य महत्त्वाद्विशालत्वाच्च। तत्र संस्कृतालङ्कारशास्त्रदृष्ट्या काव्यस्य महाकाव्यत्वविमर्शनं कृतमिति विशेषः। प्रसङ्गगत्या व्याकरणप्रयोगच्छन्दोऽलङ्कारादीनां महत्त्वपूर्णानां विषयाणां विश्लेषणमपि विहितम्। अपि च, अन्येषां म्यूरकविकृतानां संस्कृतखृष्टीयखण्डकाव्यानामप्यालोचनं मया विहितं समासेन

संस्कृतालङ्कारिकाणां मतान्यनुसृत्यैव, यद्यपि प्रसङ्गसङ्गत्या ऐतिहासिकतथ्यसमृद्धं भाषाव्याकरणादिविषयकमालोचनमप्यत्र द्रष्टुमलम्।

**१.६. ग्रन्थसमीक्षणम्**

गवेषणाकार्यावसरे मया भूयांसो ग्रन्थास्तथा प्रबन्धबन्धाः समवाप्तास्तथा चाधीताः। तत्र ये च ग्रन्थास्तथा प्रबन्धा मामकीनेन विषयेण समं साक्षात्सम्बद्धाः, तेषामेव केवलं मौलिभूतानां केषाञ्चन ग्रन्थानां गवेषणाप्रबन्धानां च समासेन समीक्षात्राधस्ताद्विधीयते –

१. Amaladass, Anand, and Richard Fox Young. *The Indian Christiad: A Concise Anthology of Didactic and Devotional Literature in Early Church Sanskrit.* Anand, Gujarat, Gujarat Sahitya Prakash, 1995, pp. xvii + 378.

संस्कृतं यदि समेषां भारतीयधर्मीयसम्प्रदायानां प्रधानभूता भाषा भवितुं शक्यते, तदानया तु खृष्टधर्मस्य प्रचारोऽपि सम्भव इति धिया संस्कृतेनादौ खृष्टीयतत्त्वाश्रितानि काव्यानि प्रधानतया इउरोपीयैः पण्डितैः प्रणीतानि। तेषामितिहासतथ्यसमृद्धं वृत्तमस्मिन् ग्रन्थे प्राञ्जलभाषया प्रतिपादितम्। मिलपादस्य, म्यूरवर्यस्य ब्रह्मबान्धव-उपाध्यायस्य च खृष्टीयकाव्यानां निर्वाचिताः श्लोका अप्यत्र ग्रन्थकाराभ्यां सानुवादं समुपस्थापिताः। ग्रन्थान्ते च प्रदत्ता नितान्तमेव विस्तृता काचना ग्रन्थानुक्रमणी वर्तते, यद्धि ग्रन्थस्यास्य सर्वोत्कृष्टो विषय इति मामकीनं मतम्। अध्येतारः ग्रन्थेनानेन सुतरामेव उपकृता भवेयुः, गवेषणार्थश्च बहूनां विषयाणामपि ज्ञानमितो जायेतेति।

२. Dodson, Michael S. *Orientalism, Sanskrit Scholarship, and Education in Colonial North India, ca. 1775-1875.* A Dissertation submitted for the degree of Ph.D. (History) in the University of Cambridge, January 2003, pp. x + 269.

अस्मिन् गवेषणाबन्धे ब्रिटिश-शासनसमये भारतवर्षे विशेषतया वाराणस्यां संस्कृताध्ययनस्य या परम्परासीत् तस्याः सुन्दरतया व्याख्यानं प्रपञ्चितं गवेषकेण। तदानीन्तन-वाराणसी-महाविद्यालये (अधुना सम्पूर्णानन्द-विश्वविद्यालयः) या शिक्षाविषयिणी तर्कसभा समायोज्यते स्म, तस्या अपि वर्णनमत्र प्राप्यते। म्यूरवर्येण तत्राध्यक्षत्वेन या या व्यवस्था तदानीं संस्कृतस्याभ्युन्नतये स्वीकृता, तस्या अपि परिचय इतः प्राप्तुं शक्यत इति महनीयोऽयं गवेषणाभिसन्दर्भः।

३. Goel, Sita Ram. “Encounter with Sanskrit Pandits.” *History of Hindu-Christian Encounters (AD 304 to 1996)*. 6th Reprint, New Delhi, Voice of India, 2020, pp. 62 - 77.

प्रबन्धोऽयं १८३९-१८४५-संवत्सरमध्ये भारतीयसनातनधर्मस्य प्रखरपण्डितानां खृष्टीयधर्मस्य विद्वद्भिः साकं मतद्वैधमाश्रित्य प्रवर्तितः। नूत्नं विषयमुपजीव्य रचितोऽयं गवेषणाधर्मी प्रबन्धो नूनमेव गम्भीरविषयाणां मोक्षादीनां विवेचको यत्रोभययोः हिन्दु-खृष्ट-धर्मयोर्मतानि तौलात्मिक्या दृष्ट्या परिवेशितानि। श्री-जान्-म्यूर-कृताया *मतपरीक्षा*याः भारतीयशास्त्रविचारात्मके प्रथमे खण्डे परिवेशितानि मतानि सहेतु खण्डयितुकामास्त्रयः प्रख्याताचार्याः सम्मुखं समायाताः। ते तावत् –

क) सोमनाथः (सुबाजि-बापुः) – *मतपरीक्षाशिक्षा* (१८३९)

ख) हरचन्द्रतर्कपञ्चाननः – *मतपरीक्षोत्तरम्* (१८४०)

ग) नीलकण्ठशास्त्री-गोरे – *शास्त्रतत्त्वविनिर्णयः* (१८४४)

त्रयाणां काव्यानामेव मूलविषयानत्रोपस्थाप्य प्रबन्धकृता स्वमतमपि प्रस्तुतम्। प्रसङ्गसङ्गत्या प्रख्यातविदुषां श्रीरिचार्ड-इयङ्ग-वर्याणां मतमपि खण्डितमित्यप्यस्य प्रबन्धस्य विशेषता। किञ्च, म्यूरमतं समर्थयता श्रीकृष्णमोहनव्यानार्जीपादेनापि हरचन्द्रमतं खण्डितमपि तद् हास्यास्पदमेव भाति। तदीयं बङ्गभाषामयं पुस्तकं तावत् – *सत्य स्थापन ओ मिथ्या नाशन* इति।

खण्डनग्रन्थानां त्रयाणामेतेषां म्यूरं प्रति कीदृशः प्रभाव आसीदित्यपि सीतारामगोयेलपादेन स्पष्टतया प्रपञ्चितम्। तथाहि स्वदेशं स्कटल्याण्डं प्रति प्रत्यावर्तनात्परं पुनरपि म्यूरपादैः तदीया *मतपरीक्षा* संस्कृता पुनश्च प्रकाशिता। ततश्च संस्कृतकाव्यरचना कदापि तैर्न विहिता। किन्तु आङ्गलभाषया *Original Sanskrit Texts* इति नाम्ना पञ्चखण्डोपेतं विशालाकारविशिष्टं शास्त्रमेकं प्रणीतं यत्र तेन भारतीयशास्त्राणां जयगाथैव गीतेत्यवश्यमेव भारतवर्षस्य गभीरशास्त्रीयतत्त्वनिचयानां माहात्म्यम्।

४. Powell, Avril A. *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire*. Woodbridge, The Boydell Press, 2010, pp. xvii + 318.

श्रीजान्-म्यूरस्य बाल्यादारभ्य शिक्षादिकं, भारतमागत्य तस्य पदोन्नतिः, विविधैः प्राच्यैः तथा पाश्चात्यैः पण्डितैः तस्य साक्षात्कारः, संस्कृतकाव्यानां रचनायामुत्साहः इत्यादिविषयमाधारीकृत्य ग्रन्थकर्त्र्या सुतरामेव प्रशंसार्हं कार्यं कृतम्। किञ्च, जान्म्यूरस्य भ्रातुः श्री-उइलियम-म्यूरस्यापि शिक्षाजीवनं कर्मजीवनं चोपजीव्य तयानतिसाधारणं पाण्डित्यपूर्णं च गवेषणाकर्म प्रस्तुतम्। इङ्गलण्डदेशे भारते च प्राच्यतत्त्वज्ञानप्रदानाय हेयलीवरीसंस्थायास्तथा फोर्ट-उइलियम-महाविद्यालयस्य महत्त्वमपि तया नितान्तं प्राञ्जलेन वचोविन्यासेन प्रतिपादितमित्यस्य ग्रन्थस्य गुरुत्वमनन्यम्।

५. Shastri, Satya Vrat. "Modern Christian Literature in Sanskrit." *Devavāṇī-suvāsaḥ' (Rama Kant Felicitation Volume)*. New Delhi, Devavani Parishad, 1991, pp. 5.313 – 5.325.

भारतवर्षे प्राथम्येन संस्कृतखृष्टीयसाहित्यमुपजीव्य यच्चर्चा, सा तु प्रबन्धादस्मादेव प्रारब्धा। के के प्रतीच्याः के वा प्राच्याः कवयः साहित्येऽस्मिन् काव्यानि रचयामासुः, तेषां नामग्राहं रचनोद्देश्यं तथा च तत्तत्काव्यानामपि समासेन वर्णनं संस्कृतालङ्कारिकदृष्ट्या महत्त्वञ्चापि तत्र प्रतिपादितम्। अयमेव प्रबन्धो मदीयगवेषणाकर्मणः सूत्रात्मको वर्तते, इत एवान्येषां काव्यानां नामान्यपि मया प्राप्तानि, येन परवर्तिनि काले श्रीम्यूरवर्यस्य तथा च संस्कृतखृष्टीयसाहित्यस्यान्येषां कवीनां काव्यानां संग्रहोऽपि सम्भवपरोऽभवत्। प्रबन्धान्ते या ग्रन्थानुक्रमणी वर्तते, सापि सुतरामेव गवेषणासाध्या प्रशस्या चेति भारते साहित्यमिदमाश्रित्य यदल्पमपि गवेषणाकर्माभवत्, तस्य सम्पूर्णमपि श्रेयः श्रीसत्यव्रतशास्त्रिवर्यस्यैवेति दृढा मे मतिः।

६. Young, Richard Fox. *Resistant Hinduism: Sanskrit Sources on Anti-Christian Apologetics in Early Nineteenth-Century India* (Publications of the De Nobili Research Library; v. 8). Vienna, De Nobili Research Foundation, 1981, pp. 200.

श्रीजान्-म्यूरेण प्रणीतं संस्कृतकाव्यमाधारीकृत्याद्यावधि गवेषणात्मकमेकमेव कार्यं जातम्, यस्य साक्षात् फलं श्रीरिचार्ड-फक्स-इयङ्ग-वर्यस्यायं ग्रन्थः। समग्रेऽपि विश्वे प्राथम्येन विषयमिममाश्रित्यासामान्यं कर्मानेन पण्डितप्रवरेण कृतम्। यद्यपि केवलं म्यूरवर्यस्य *मतपरीक्षा* इति ग्रन्थमाश्रित्यैव तदीयोऽयं ग्रन्थः पल्लवितः, तथापीतः तदानीन्तने काले प्राच्य-प्रतीच्य-पण्डितानां मिथः यन्मतानैक्यान्वितं वृत्तजातं श्रूयते, तत्सर्वं यथातथ्यं ग्रन्थकृतेह परिवेशितम्। श्री-जान्-म्यूर-कृताया *मतपरीक्षाया*ः *भारतीयशास्त्रविचारात्*मके प्रथमे खण्डे परिवेशितानि मतानि सहेतु खण्डयितुकामास्त्रयः प्रख्याताचार्याः सम्मुखं समायाताः। ते तावत् –

घ) सोमनाथः (सुबाजि-बापुः) – *मतपरीक्षाशिक्षा* (१८३९)

ङ) हरचन्द्रतर्कपञ्चाननः – *मतपरीक्षोत्तरम्* (१८४०)

च) नीलकण्ठ-घोरे – *शास्त्रतत्त्वविनिर्णयः* (१८४४)

परन्तु म्यूरमतं समर्थयता श्रीकृष्णमोहनव्यानार्जीपादेनापि हरचन्द्रमतं खण्डितम्। तदीयं बङ्गभाषामयं पुस्तकं तावत् – *सत्य स्थापन ओ मिथ्या नाशन* इति। एतेषां समेषां विषये ग्रन्थकृता नूनमेव विस्तरशो व्याख्यानं विहितं यद्धि मामकीनकार्यस्य प्रपञ्चने सुतरामेव साहाय्यकरं सञ्जातमिति श्री-इयङ्गवर्योऽवश्यमेव प्रशस्यः प्रणम्यश्च।

## १.७. पद्धतिविज्ञानम्

समग्रेऽस्मिन् गवेषणाबन्धे विश्लेषणात्मिका विवरणात्मिका तथा च तुलनात्मिका व्याख्यानरीतिः सावधानमनुसृता। तत्रादौ श्री-जान्-म्यूर-वर्यस्य संस्कृतकाव्यानां विश्लेषणात्मिका समीक्षा मया कृता संस्कृतालङ्कारिकाणां नयानुसारेण। ततश्च तत्र विद्यमानानां तथ्यानां तथा च धर्मीयतत्त्वानां विवरणात्मिका व्याख्या विहिता। तदनु च भारतीयसनातनधर्मीयतत्त्वततिभिः साकं जान्-म्यूर-प्रोक्तानां खृष्टीयतत्त्वानां तुलनात्मिका समीक्षा मयकात्र साधिता।

मदीये सम्पूर्णेऽस्मिन् गवेषणाकर्मणि मया ‘Modern Language Association’ (MLA) इत्यस्य अष्टमसंस्करणभूतं (8th Edition) प्रारूपमेवानुसृतम्। परन्तु विशेषोऽयमेवात्र यत्

'परिशीलितग्रन्थानुक्रमणिका' इत्यत्र प्रकाशनस्थानस्य नाम मया प्रदत्तं, यद्यपि M.L.A. - इत्यस्य अष्टमसंस्करणानुसारं प्रकाशनस्थाननाम न प्रदीयते। अत्र कारणतया वक्तुं शक्यते यत् संस्कृतविषयस्य गवेषणायां विशेषतया मामकीनगवेषणाया विषये प्रकाशनसंस्थानां स्थानस्य गुरुत्वमस्त्येव यतो हि ऐतिहासिकदृष्ट्या तत्स्थानं तादृशसाहित्यरचनायाः पीठस्थानत्वेन परिगण्यते। यथोदाहरणरूपेण ऊनविंशशतकस्य प्रथमार्धे संस्कृतखृष्टीयसाहित्यरचनायां कलिकाताया गुरुत्वं महनीयमासीत्, तत एव प्रायः सर्वाण्येव काव्यानि प्रकाशितान्यभवन्निति हेतोः।

अपि च, परिशीलितग्रन्थानुक्रमणिकायां संस्कृतग्रन्थानां प्राचीनानां नामोल्लेखनावसरे मया मदीयतत्त्वावधायिकाया निदेशानुसारं ग्रन्थानामकारादिक्रमेण नाम्नैव सूचिका तेषां काचन प्रस्तुता। ग्रन्थकाराणां नाम्ना ग्रन्थसूची न स्थिरीकृतेत्येव केवलमत्र विशेषः।

संस्कृतभाषया यदालिखिता तदा देवनागरीलिपिराश्रिता। तदर्थञ्च मया 'Arial Unicode MS' इत्यस्य चतुर्दशमात्रात्मको वर्णालेखाकारो (Size 14) व्यवहृतः। यदा च आङ्गलभाषया लिखिता, तदा पुनः 'Times New Roman' इत्यस्य चतुर्दशमात्रात्मको वर्णालेखाकारो (Size 14) मया प्रयुक्तः। प्रतिपृष्ठमन्ते पादटीकाः (Footnotes) मया प्रदत्ताः। द्वयोः पङ्क्त्योरन्तरा अर्धाधिकैकमात्रात्मकं (1.5 lines) व्यवधानं समग्रेऽस्मिन् गवेषणाप्रबन्धे मयानुसृतम्। किञ्च, प्रतिपृष्ठमुपरि नीचैस्तथा दक्षिणस्यां दिशि अर्धाधिकैकपरिमितं (1.5 cm) स्थानं तथा च वामपार्श्वे गवेषणासन्दर्भस्य प्रत्येकं पत्रस्य बन्धनहेतोः अर्धाधिकद्विपरिमितं (2.5 cm) स्थानं त्यक्तं मया।

### १.८. वर्णविन्यासविधिः (Orthography)

'नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते[4]' इति भगवन्मल्लिनाथवचः स्मारं स्मारं तथा च नामं नामं मयापि मामकीनेऽस्मिन् गवेषणाभिसन्दर्भे वर्णविन्यासाय सर्वत्रैव मूलमेवानुसृतम्। अत्र मूलमित्युक्ते मम गवेषणाकर्म यानि काव्यान्यधिकृत्य प्रवर्तितं, तानि म्यूरप्रणीतानि काव्यानीति बोधयितुमिष्यते। तत्र पारिभाषिकशब्दानां तथा च विविधानां खृष्टीयपात्राणां नामोल्लेखनावसरे

[4] *कुमारसम्भवम्*, मल्लिनाथमङ्गलाचरणम्, श्लोकः. - ४, पृ. १.

यो वर्णविन्यासविधिः कविनाश्रितः, स एव विधिर्मयात्राप्यनुसृतो मदीयतत्त्वावधायिकाया मतानुसारम्। यथा दिङ्मात्रमुदाहरणमत्र प्रदीयते – आङ्गलशब्दयोः ‘Christ’ ‘Christian’ इत्यनयोः कृते बहवो वर्णविन्यासप्रकाराः सम्भवन्ति। परन्तु यथा मया प्रागेव भाषितं, तदनुसरता मया केवलमिह श्रीजान्-म्यूर-प्रयुक्तो वर्णविन्यासविधिरेवाश्रितः। तथाहि, यतो हि तेन ‘खृष्टः’ ‘खृष्टीयः’ इत्येवम्प्रकारेण शब्दयोरनयोः वर्णविन्यासो विहितस्तस्मान्मयाप्यत्र स एव विधिर्गृहीतः। अत्रेदमवश्यं वक्तव्यं यन्मम गवेषणाबन्धस्य शीर्षकं यन्निर्धारितं, तत्र खृष्टीयेति पदस्य ‘ख्रिस्टीय’ - इत्येवम्प्रकारेण वर्णविन्यासः कृतोऽस्तीत्यालक्ष्यते, यतो विश्वविद्यालयस्य विभागीयकर्तृभिस्तादृश एव वर्णविन्यासविधिर्निबन्धीकृतो यस्य परिवर्तनं परवर्तिनि समयेऽपि न सम्भवपरमभवत् पौनःपुण्येनानुरोधात्परमपीति मे महान् खेदः। ततो मम तत्त्वावधायिकाया निदेशेन गवेषणाबन्धस्य शीर्षकं व्यतिरिच्यास्याभिसन्दर्भस्य मध्ये सर्वत्र खृष्टीयेत्येव वर्णविन्यासविधिरनुसृत इति विशेषः। स्वयं विश्वकविः श्रीरवीन्द्रनाथठाकुरोऽपि खृष्टविषयाश्रितानां प्रबन्धानां रचनावसरे पूर्वोक्तमिमं (खृष्ट) वर्णविन्यासविधिमेवाङ्गीचकारेत्यप्यनुसन्धेयमिह। किञ्च, ‘Jesus’ इत्यस्य कृतेऽपि कविना व्यवहृतो ‘येषूः’ इत्येवं वर्णविन्यास एव स्वीकृतो मया। यथा कविना स्वयमेव स्वप्रभोः श्रीयेष्वः पूतं जीवितमाश्रित्य प्रणीतस्य संस्कृतकाव्यस्य नाम प्रदायि – *श्रीयेषूखृष्टमाहात्म्यम्* इति।

अपि च, खृष्टधर्मसम्बन्धिनां बहूनां शब्दानां संस्कृतायितं रूपं किं भवेत्तेषां पुनः वर्णविन्यासः कथं स्यादित्यादिविषयमाश्रित्य चर्चा पूर्वमेव संस्कृतखृष्टीयसाहित्ये पाश्चात्यविद्वद्भिर्विहिता। तथाहि प्रसङ्गेऽस्मिन् यस्य ग्रन्थस्य नामावश्यं स्वीकर्तव्यं, स तावद्भवति १८२८-संवत्सरे कलिकातायाः बिशप-कलेज-प्रेस – इत्यतः प्रकाशितः श्री-उइलियम-हज-मिल-पादेन तथा श्री-होरेस-हेयम्यान-उयिलसन-वर्येण च प्रणीतः *Proposed Version of Theological Terms with a View to Uniformity in Translations of The Holy Scriptures, etc., into the Various Languages of India* (Part the First: Sanskrit) इति ग्रन्थः। तथाहि मयापि खृष्टीयपदानां वर्णविन्यासावसरे ग्रन्थोऽयमेव सश्रद्धमनुसृत इत्यत्र किं चित्रम् ?

किञ्च, मम गवेषणायाः प्राणभूतो यो हि कविस्तस्य नाम्नो वर्णविन्यासावसरेऽपि यदा मतानैक्यं समापतितं, तदा मया तेनैव संस्कृतभाषया देवनागरीलिप्या कृतं स्वाक्षरं तस्यैव *मतपरीक्षा* इति ग्रन्थस्य पाण्डुलिपितोऽधिगतम्। तत्र तेन 'जान्-म्यूरः' इत्थमेव स्वनाम टङ्कितमिति तद्वर्णविन्यासप्रकार एव मया स्वीकृत इत्यत्र मन्ये न स्यात् कस्यापि विप्रतिपत्तिः।

इति

समाप्तः प्रथमोऽध्यायः।

# संस्कृतखृष्टीयसाहित्यस्य कविः




**Roberto de Nobili**

(1577-1656)

संस्कृतखृष्टीयसाहित्यस्य महाकविः



**William Hodge Mill**

(1792-1853)

# द्वितीयोऽध्यायः

## ।। संस्कृतखृष्टीयसाहित्यम् ।।

# ।। संस्कृतखृष्टीयसाहित्यम् ।।

## २.१. उपोद्घातः

तदानीमासीदष्टादशशताब्द्याः प्रारम्भः। प्रतीच्या वाणिज्यप्रसाराय तथा धर्मप्रसाराय क्रमेण भारतवर्षमायातुमारेभिरे, भारतस्य विविधेषु प्रान्तेषु स्वस्ववसतिं च ते स्थापयामासुः। ततः प्रारभ्य ऊनविंशशताब्द्या मध्यभागं यावद् भारतवर्षस्य संस्कृतसाहित्यजगति किञ्चनापूर्वं संघटितं यद्धि कालगत्या यद्यपि प्रायो विलुप्तं जातं, तथापि संस्कृतसाहित्यकलेवरविवृद्धये नूनमेव तच्छक्तमासीदित्यत्र नास्ति काचिद्विप्रतिपत्तिः। वस्तुतः संस्कृतभाषायां नितरामेव नूत्नस्य कस्यचित् काव्यवाङ्मयस्य समुद्भवस्तथा च क्रमेण तस्य विकाशस्तदानीं समभवदिति तु मन्ये बुहुभिरेव विद्वद्भिरश्रुतपूर्वमस्ति। वाङ्मयस्यास्य विशेषतात्रैव वर्तते यदिदं हि वाङ्मयं खृष्टमतावलम्बिभिः कविभिः सृष्टमिति। यावज्ज्ञायते काव्यकवनधारेयमादौ न तु खृष्टमतानुयायिभिर्भारतीयैरारब्धा, अपि तु प्रधानतया प्रतीच्यभवैः खृष्टमतप्रचारकैः इउरोपीयैरेवास्याः प्रारम्भो विहितः। भारतीयेषु खृष्टीयमतस्य विस्ताराय, स्पष्टताख्यापनाय तथा च सौन्दर्यायनाय प्रसिद्धा ग्रीक्-ल्याटिनादयः खृष्टीयविश्वासप्रकाशिका भाषा इव संस्कृतमपि तैः सहृदयहृदयहारिभिः प्रतीच्यकविभिः न केवलं सानन्दं स्वीकृतं, किन्तु व्यापकतया व्यवहृतमपीत्यत्र किं चित्रम् ? तेन सम्पूर्णं वाङ्मयमदो भाषायामस्यां सृष्टमभवत्, यस्य प्रधानो वर्ण्यो विषयो बभूव भारतीयेषु खृष्टधर्मस्य प्रचारस्तथा प्रसार इति।

अत्रेदमवधेयं यद्वैदेशिकानां मूलतया इउरोपीयानां मातृभाषा नैवासीत् संस्कृतमिति। तथापि संस्कृतभाषया खृष्टमतप्रकाशनाय काव्यप्रणयनकर्मणि खृष्टीयधर्मग्रन्थानां संस्कृतानुवादकर्मणि च ते लिप्ता अभवन्निति तु सुतरामेवाश्चर्यावहो विषयः। परन्तु तदर्थं तेषां समयः खल्वासीदपेक्षितः। आदौ तु संस्कृतभाषा सम्यक्तया तैरधिगता भारतीयपण्डितानां सकाशात्। तदनु काव्यप्रणयनकौशलमप्यायत्तीकृतं तैः। अत्रापि भारतीयविदुषामवदानमनस्वीकार्यम्। अपि च, तेषां संस्कृतकाव्यानां भारतस्य विविधासु प्रान्तीयभाषासु अनुवादविधानेऽपि भारतीया विद्वांस एव प्राधान्येन साहाय्यं विहितवन्तः। अत्र तु पण्डितप्रवरस्य श्रीकृष्णमोहन-व्यानार्जी-महोदयस्य नाम

पौनःपुण्येन सश्रद्धं स्वीकृतं प्रख्यातसंस्कृतखृष्टीयकविवर्येण श्रीजान्-म्यूर-पादेन। सुरगिरा काव्यकवनविधावस्मिन् संस्कृतमातुः प्रख्यातसूनूनां कालिदासभारव्यादीनां महाकवीनां काव्यानामपि प्रभावो वाचामगोचरः, तेषां सावधानं सयत्नं चाध्ययनेनैव काव्यकवनकौशलाधिगमत्वादित्यत्र नास्ति विप्रतिपत्तिः।

## २.२. किं तावत् संस्कृतखृष्टीयसाहित्यम् ?

संस्कृतेन साकं महिष्ठो नः सम्बन्धः। न केवलं भारतीयाः, वैदेशिका अपि विद्वांसः संस्कृतभाषाम् अविनाशिनीममरीं च मन्यन्ते। स्थिरत्वं सर्वदेशव्यापित्वं जगन्मान्यत्वं बहुविज्ञानाश्रयत्वं साम्प्रतिकविशेषविज्ञानज्ञानजनकत्वञ्चेत्यादयोऽसंख्याः संस्कृतगिरो गुणास्त्वनन्यसाधारणाः। तस्मादेव यदा खृष्टधर्मप्रचारकाः समाजग्मुर्भारतवर्षं, तदा तैरवगतं यद् भारतीये समाजे खृष्टधर्मस्य तथाङ्गलानां चिरस्थायिप्रभावस्य स्थापनहेतोरादावेव भारतीयसंस्कृतेस्तथा भारतीयसाहित्यानां सम्यग् ज्ञानमत्यावश्यकमिति। यतस्तदानीमपि भारतीयायाः संस्कृतेश्चिन्ताधारायाश्च प्रधानभूतमाध्यमत्वेन संस्कृतमेव सर्वैर्विद्वन्मूर्धन्यैस्तथा सामाजिकैः समस्वरेण स्वीक्रियते स्म। अतः सूक्ष्मेक्षिकया सर्वं पर्यवेक्ष्य तैः खृष्टीयधर्मप्रचारकैः सिद्धान्तितं यद् भारतीयचिरन्तनैतिह्यस्य मूलस्तम्भभूतस्य संस्कृतस्याध्ययनं तु नितरां प्रयोजनमिति। यतस्तदानीन्तने समाजे येषां प्राधान्यमासीद्वाचामगोचरम्, उच्चस्तरीयास्ते समाजे सर्वजनमान्या विविधगूढतत्त्ववेत्तारो ब्राह्मणाः सर्वकर्मसाधनभूतभाषात्वेन भाषान्तरापेक्षया संस्कृतमेवाधिकाधिकतया व्यवहारञ्चक्रिरे।

भारतभूमौ स्थापितचरणानां वैदेशिकानां विशेषत आङ्गलानां प्रधानतया द्वे उद्देश्ये स्तः। प्रथमतो व्यवसायिकप्रतिष्ठा अपरतश्च खृष्टधर्मप्रचार इति। अतो ब्राह्मणैः समं समाजे प्रभावोपेता जना यदि खृष्टधर्मं प्रति मनागप्याग्रहान्विता भवेयुस्तदा साधारणजनेष्वस्य धर्मस्य प्रचारः सुतरां निरलसतयैव सम्भवपरः स्यादित्येवं विचिन्तयद्भिस्तैः प्रचारकैर्भारतीयपण्डितानां सकाशात् संस्कृताध्ययनं समारब्धम्।

गच्छता कालेन भाषायामस्याश्चाप्तव्युत्पत्तयस्ते संस्कृतभाषां द्वारीकृत्यैव खृष्टधर्मस्य प्रधानभूतानां *बाइबेला*दीनां धर्मग्रन्थानामनुवादकर्मणि कायमनोवाक्यैः प्रवृत्ताः। खृष्टधर्मस्योपजीव्यभूतानां ग्रन्थानां यथा – *'Bible'* - *'Old and New Testaments'* - *'Sermon on the Mount'* – इत्यादिकानां स्वल्पेनैव कालेन संस्कृतानुवादोऽपि प्रकाशितस्तैः। न केवलमनुवाद एव स्वारसिकास्तेऽपि तु तदीयव्याकरणग्रन्थानां तथा चाभिधानग्रन्थानां रचनायामपि तेषामाग्रहः सुतरामेव वर्धित इत्यत्र नास्ति संदेहलेशः। परन्तु समग्रस्यापि साहित्यप्रणयनस्य प्रधानं लक्ष्यं त्वासीद् भारतवर्षस्य साधारणानां जनानां खृष्टीयधर्मान्तरमिति। तथाह्युच्यते *The Indian Christiad* इति ग्रन्थस्य प्रस्तावनायाम् –

"This was a literature that was, to be entirely forthright, part and parcel of the evangelical attempt to convert India to the Christian faith and the Church, the community of believers that Church Sanskrit was likewise meant to serve."[5] इति।

संस्कृतभाषायां खृष्टीयसाहित्यस्य विविधविधानां रचना नूनमेवाधुनिकसंस्कृतसाहित्यस्य वैशिष्ट्येष्वन्यतमा। साहित्यस्यास्येतिहासो द्विशतवर्षेभ्योऽपि प्राचीनः। भारतवर्षे खृष्टीयधर्ममतप्रचाराय प्रयोजनीयानुमतिः खृष्टीयधर्मीयसम्प्रदायैः १८०३-संवत्सरे समवाप्ता। ततश्च खृष्टधर्मस्य प्रचारस्तथा प्रसारो सुतरामेव तीव्रगत्यात्र प्रवर्तितः। अद्यापि यस्य प्रवाहो न स्तब्धः। आदावेव भारते खृष्टधर्मप्रचाराय कलिकातायाः पार्श्वे श्रीरामपुरे खृष्टीयसम्प्रदायः स्वधर्मस्य पूततमग्रन्थानामनुवादकर्मणि प्रवृत्तोऽभवत्। प्रख्यातप्राच्यतत्त्वविदुषः श्री-उइलियम-केरी-वर्यस्य तत्त्वावधानेन १८०८-१८११-संवत्सरमध्ये खण्डत्रयेण मूलग्रीक्-भाषातोऽनूदितोऽभवत् संस्कृतगिरौ *The New Testament of Our Lord and Saviour Jesus Christ* इति ग्रन्थः, श्रीरामपुर-मिशन-प्रेस इत्यतश्च प्रकाशितः। १८२१-संवत्सरे पुनः श्रीरामपुरत एव संस्कृतभाषायां *The Old and The New Testaments* इति ग्रन्थावनूद्य प्रकाशितौ। तदनु १८४३-संवत्सरे कलिकातातः क्यालकाटा-व्याप्टिस्ट-सम्प्रदायेन मूल-हिब्रू-भाषातः संस्कृतभाषायां *The Book of*

[5] Ind. Christ., p. xi.

*Genesis and Part of Exodus* इत्येको विशिष्टो ग्रन्थोऽनूदितः। ततश्च School Book Society's Press तथा च Baptist Mission Press इति प्रकाशनासंस्थाद्वयेन यथाक्रमं १८४२-संवत्सरे तथा च १८४६-संवत्सरे *The Proverbs of Solomon* इति ग्रन्थोऽनूद्य प्राकाश्यं नीतः। एवमेव १८४५-संवत्सरे कलिकातात एव व्याप्टिस्ट-मिशन-प्रेस इत्यस्मात् *The Book of the Prophet Isaiah in Sanskrit* इति ग्रन्थोऽपि प्रकाशितः। अपि च, १८६०-संवत्सरे प्रख्यातविद्वता जे. आर. व्यालाण्टाइन्-वर्येण लण्डनदेशात् *The Bible for the Pandits, the first three Chapters of Genesis commented in Sanskrit and English* इति ग्रन्थः प्रकाशितो यस्य चर्चा समग्रेऽपि भारते तदानीमभवत्। इत्थमेवानुवादरचनाधारा या खलु ऊनविंशशतके प्रारब्धा सा विंशशताब्द्यामपि प्रचलितासीत्। यथा १९६२-संवत्सरे वेङ्गालूरूतः *The New Testament* इत्यस्य ग्रन्थस्य नूतनं कञ्चन संस्करणं प्रकाशितं संस्कृतभाषायां The Bible Society of India इति संस्थया *प्रभुणा यीशुखृष्टेन निरूपितस्य नूतनधर्मनियमस्य ग्रन्थसंग्रहः* इति नाम्ना।

खृष्टीयसाहित्यस्य सुरगिरानुवादप्रकल्पेऽस्मिन् कलिकातास्थाया व्याप्टिस्ट-मिशन-प्रेस इत्यस्याः संस्थायाः प्रशस्यमवदानमवश्यमुल्लेखार्हम्। तत एव १८७८-संवत्सरे चतुर्णां खृष्टीयदेवदूतानां प्रचारितनीतिततिसंग्रहः प्राकाश्यं नीतः खण्ड एकस्मिन्नेव *खृष्टचरितम् – अर्थतो मथि-मार्क-लूक-योहनि-र्विरचितं सुसंवादचतुष्टयम्* इति शीर्षकेण। मथिना मार्केण तथा च लूकेन निगदितः सुसंवादः प्रत्येकं भिन्नभिन्नग्रन्थाकारेणापि प्रकाशितोऽभवत्। तथाहि १८७७-संवत्सरे मथिकथामृतमाश्रित्य *मथिलिखितः सुसंवादः* प्रकाशितः। मार्ककथामृतञ्चोपजीव्य यथाक्रमेण १८७८-संवत्सरे तथा च १८८४-संवत्सरे *मार्कलिखितः सुसंवादः* इति *सत्यधर्मशास्त्रम् – मार्कलिखितः सुसंवादः* इति च ग्रन्थद्वयं प्रकाशितं व्याप्टिस्ट-मिशन-प्रेस इति संस्थाया आनुकूल्येन। लूककथामृतञ्चाधिकृत्य १८७८-संवत्सरे *लूकलिखितः सुसंवादः* इति ग्रन्थः प्रकाशितः। किं बहुना, म्याङ्गालूरूतः १८७६-संवत्सरे प्रभोः योहनस्य कथामृतमाश्रित्य Basel Mission Press इत्यतः प्रकाशितो ग्रन्थः *योहनलिखितः सुसंवादः* इति।

*बाइबेल*-धर्मपुस्तकस्य *Sermon on the Mount* इत्यंश एव सर्वाधिकतया संस्कृतकवीन् तथानुवादकानाकृष्टवन्तः। तदर्थमस्य न्यूनातिन्यूनतया त्रयोऽनुवादग्रन्थास्तथा चेममुपजीव्य मौलिकं संस्कृतकाव्यमपि प्रणीतमभवदिति विशेषः। तथाहि १९७४-संवत्सरे व्याङ्गालूरूतः The Bible Society of India इति संस्थयास्यानुवादग्रन्थः प्राकाश्यं नीतः *गिरिप्रभाषणम्* इति शीर्षकेण। तस्मिन्नेव खृष्टाब्दे के. पी. उर्मीस्-वर्येण *गिरिगीता* इति नाम्नास्यानुवादः प्रकाशितः त्रिवान्द्रम-नगरीतः। ततश्च श्रीलछमीधरशास्त्रिमहोदयेन १९८२-संवत्सरे दिल्लीतः *भगवतो जीससः पार्वती शिक्षा* इति नाम्नास्यानुवादोऽपरः प्रकाशितः। प्रख्यातविदुषा श्रीसुरेशचन्द्र-रय-महाशयेन *The Ordo Missae* इत्यस्याप्यनूदितो ग्रन्थः प्रकाशितः कलिकातायां मूलल्याटिनभाषातः १९२६-संवत्सरे *खृष्टयज्ञविधिः* इति नाम्ना।

किञ्च, अनुवादरचनायामेव ते न स्तब्धाः, अपि तु तेषामिष्टभगवतो येषूखृष्टस्य पवित्रं जीवनमाश्रित्य बहूनि काव्यानि सुरगिरा विरचयामासुस्ते। गद्यमयानां तथा च पद्यमयानां तादृशानां मौलिकसंस्कृतकाव्यानां संख्या न तु स्वल्पा, नूनमेवाङ्गुल्यगण्या। तेनैव संजज्ञे संस्कृतसाहित्ये नितरामनालोचितावहेलिता विस्मृतप्राया परन्त्वविस्मरणीया काचित्साहित्यधारा, सा हि – **'संस्कृतखृष्टीयसाहित्यम्'** इत्यभिधयात्राभिधीयते।

'संस्कृतखृष्टीयसाहित्यम्' इति पदेन मयका खृष्टधर्मावलम्बिभिरन्यैर्वा विद्वद्भिर्विरचितानि श्रीयेषूखृष्टविषयकाणि तद्धर्मस्यान्येषां खृष्टीयमतप्रचारकाणां वा जीविताश्रितानि संस्कृतकाव्यकुसुमानि तथा च खृष्टधर्मस्य मूलभूततत्त्वान्युपजीव्य प्रणीतानि संस्कृतकाव्यान्येव बोधयितुमिष्यन्त इत्यवधेयम्।

अत्रेदमवधेयं यत्संस्कृतखृष्टीयसाहित्यमिदं श्रीमद्ब्रामानन्द-अमलादास-रिचार्ड-फक्स-इयङ्ग-वर्याभ्यां 'Church Sanskrit' इत्यभिधयाभिहितम्।

संस्कृतगिरा खृष्टीयविश्वासानां खृष्टीयमतानां वा प्रकाशेन सृष्टं सारस्वतं वाङ्मयमेव संस्कृतखृष्टीयसाहित्यत्वेन प्रसिद्धतां गतम्। परन्तु 'Buddhist Hybrid Sanskrit' इत्यभिधया

प्रसिद्धं यत्साहित्यं तदपेक्षयेदं वाङ्मयं वैभिन्न्यं बिभर्त्ति। यतोऽत्र भाषाविज्ञानस्य व्याकरणस्य प्रख्याततत्त्वानां वा परिवर्तनं नालक्ष्यते। खृष्टीयत्त्वाश्रितं वाङ्मयमदः पूर्णतयैव लौकिकसंस्कृतसाहित्यमेवानुकरोति। प्रख्यातविदुषां एम.धवमोणि-वर्याणां नये – "न केवलमत्र हिन्दुधर्मीयतत्त्वावगमनप्रयत्नं तत्सर्जकाः कृतवन्तोऽपि तु तत्तत्त्वानां स्वाधीनतया चिन्तनेन तत्र हिन्दुधर्मीयतत्त्वानां प्रधानशब्देषु खृष्टीयभावावेगानामनुप्रवेशमपि कारितवन्तः सुचारुतये"ति। तथाहि भणितं तेन –

"...it is not only a question of comprehending the meaning of the Hindu religious terms but a question of thinking creatively and interpreting them in order to infuse the Christian meaning into the religious insights of the Hindu words."[6] इति।

## २.३. संस्कृतखृष्टीयसाहित्यस्य भाषाविमर्षः

समाजे प्रभूतप्रभावोपेतानां प्रशिक्षितानां हिन्दुपण्डितप्रवराणां परिषदि सुतरां समादृता या खल्वासीत् संस्कृतभाषा, तयैव संरचितमिदं साहित्यमिति त्वेतादृशसाहित्यस्य नाम्न एव प्रतीयते। किन्तु किं तावत्कारणं स्यादस्या एव भाषायाश्चयने तथा च व्यवहारे ?

भारतवर्षे तदानीं संस्कृतज्ञानां संख्या सुतरामेवाङ्गुलिगण्यैवासीदिति तु समेषां विदितचरमेव। परं संख्यायां स्वल्पानामपि प्रभावेण प्रतिपत्त्या च तेषां समकक्षतां कर्तुं तदा तु नासीत् कोऽपि समर्थः। अपि च, समग्रेऽपि भारतवर्षे ते चासन् प्रसारिताः। तदर्थं तेषामवहेलनं कदापि नोचितमिति मन्यमानैः प्रतीच्यैस्तैश्चिन्तितं यत्ते प्रभावशालिनो ब्राह्मणास्तेषामेव प्रियतमया संस्कृतभाषया सम्बोध्या इति। तेन तेषां भारतीयपण्डितानां सन्तुष्टिर्यथा स्यात्तथैव खार्ष्टकैर्विरचितानि संस्कृतखृष्टीयसाहित्यानि प्रत्यपि तन्मनांसि समाकृष्टानि भवेयुः। किञ्च, ये खलु प्रान्तीयभाषासु विदग्धाः पण्डिताः संस्कृते न तथा पारङ्गमास्तेषां सौविध्याय संस्कृतमूलैः साकं कयाचिदपि प्रान्तीयभाषया तत्साहित्यानामनुवादो यदि दीयेत, तदा प्रायः सर्वेऽपि समाजस्योच्चस्तरीयाः

[6] Sans. Bib., pp. 668-669.

पण्डितप्रमुखाः खृष्टीयसाहित्यकृतीर्न केवलं जानीयुरपि तु सम्यगवगच्छेयुरित्यासीत् खृष्टीयमतप्रचारकाणां सुनिश्चितो राद्धान्तः।

अत्रेदमपि वक्तव्यं यन्न केवलं संस्कृतखृष्टीयकाव्यानां प्रान्तीयभाषाभिरनुवादस्तैर्विहितोऽपि तु तमेव विषयं तदितरविषयञ्चाश्रित्य तासु भाषासु बहूनि पुस्तकानि तैः प्रणीतानि, यथा प्रधानतया समाजस्य प्रत्येकं जनानां मनःसु खृष्टीयमतविषयकं ज्ञानं जायेत। प्रसङ्गेऽस्मिन् श्रीरामपुरस्थस्य श्रीमत उइलियम-केरी-वर्यस्य बङ्गीयव्याकरणादिपुस्तकप्रणयनं तत्प्रकाशनञ्चावश्यमेव प्रशंसार्हम्। परन्तु स्वल्पसंख्यकानामपि तेषां सुमेधसां विशेषतः कोलकातायाः तत्परितो वा निवसतां शिक्षितानां यूनां युवतीनां च कृते तद्धर्मप्रचाराय आङ्गलभाषाया अपि व्यवहारः समुचित आसीदिति तेषां मतिः। किं बहुना, कृतञ्च तदेव तैः। तेषां त्वेवमेवाभीप्सासीद्यदेकदा समग्रेऽपि भारते सर्वे आङ्गलभाषामेव व्यवहरेयुः, विशेषतया उच्चतरशिक्षावाप्तिस्तथा च समाजस्य संस्कृतेश्च विविधविषयाणां ज्ञानमनयैव भाषया ते लभेरन्निति। नितरां खेदावहं किन्तु सत्यमिदं तथ्यं यत्तेषां तदभिसन्धौ नूनमेव साफल्यमधिगतवन्तस्त इत्यत्र साम्प्रतिकी भारतीया शिक्षाव्यवस्था कर्मव्यवस्था वा प्रमाणमिति। हा धिक् ! अस्माभिस्तु प्राचीनास्माकिनी संस्कृतिर्विस्मृताद्यत्वे।

विषयेऽस्मिन्नेतदप्यस्माभिरनुसन्धेयं यदाङ्गलभाषायाः शिक्षया समं तैः खार्ष्टकैः संस्कृतभाषाया अप्यध्ययनं तथा ज्ञानार्जनमावश्यकमिति परामृष्टम्; विशेषतया तेषां कृते, येषां ह्याङ्गलभाषायाः समुत्कृष्टं ज्ञानमासीत्। कथमेवं तैश्चिन्तितमित्याकाङ्क्षायां प्रधानतया यत्कारणं नयनयोर्मे पान्थायते तद्धि समधिगतविद्यानां तेषां भारतीयानां संस्कृतज्ञानेन साकं यद्याधुनिकभाषाज्ञानमपि भवेत्तदा प्राचीनगूढधर्मज्ञानगर्वगर्वितानां समाजस्य प्रभाववतां पुरोहितानां ब्राह्मणानां गर्वध्वंसः सुतरामेव सम्भवीति। अतोऽस्माभिर्दरीदृश्यते यदाङ्गलभाषानुवादपुरस्कृतानि संस्कृतखृष्टीयकाव्यानि तदानीं बहुलतया तामिल-माराठी-बङ्गादिप्रान्तीयभाषासु अप्यनूदितानीति।

वस्तुतस्तु भाषा भवति विश्वस्मिन्नपि विश्वे वसतां समेषां मनुजनूनां हृदयावगतयेऽन्यतमः कश्चन मार्ग इत्यत्र नास्ति संशीतिः। सा विश्वसंस्कृतेरेवोत्पन्नं कञ्चनाङ्गं यन्माध्यमेन सत्यस्य प्रकाशो जायते, विश्वभावना च प्रतिफलिता भवति। भाषामाध्यमेनैव द्विविधयोः संस्कृतयोर्मिथो भावानां विश्वासानां नीतीनामादानप्रदानादिकार्यं सम्भवति। एवमेव खृष्टीयमतानां तत्रस्थानां

धर्मीयविश्वासानां हिन्दुसंस्कृतौ प्रवेशविधानाय भाषाया एव प्रयोजनं सर्वाधिकमासीत्। तदर्थं तैः खार्ष्टकैः संस्कृतमेव चितं, येनैकतो भारतीयभूमौ खृष्टीयमतानां भित्तिप्रस्तरं प्रोथितं भवेत्, अपरतः खृष्टीयमतविश्वासादीनां समुन्नतये भारतीयसंस्कृतेर्योगदानमपि सम्भवेत्। तथाह्याह एम. धवमोणि-महोदयः –

"Inculturation in this context is the process of infusing the Gospel message, the Christian faith and life, in the soul of a culture, so that the Christian message and life is communicated and expressed in its language which in turn adopts the Christian way of viewing and living. This process of inculturation involes a double movement: infusion in order that the Christian message may take root in the soil of the new culture, and transculturation which implies a recognition of what is valuable in the new culture which can contribute to the enriching of the Christian experience and expression."[7] इति।

अतः सुरगिरा खृष्टीयमतप्रकाशेन यदपूर्वं संघटितं तद्भवति खृष्टीयविश्वासस्य संस्कृतायनं, संस्कृतस्य च खृष्टायनमिति। श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण तस्मादेवागादि –

"...what resulted in the case of Sanskrit might be called its Christianization, and by the same token what resulted in the case of Christian faith might be called its Sanskritization."[8] इति।

## २.४. संस्कृतखृष्टीयसाहित्ये काव्यानि

संस्कृतवाङ्मयमिव यद्यपि संस्कृतखृष्टीयसाहित्यवपुर्न विशालं, तथापि खृष्टधर्ममाश्रित्य प्रवर्तमानेयं संस्कृतसाहित्यात्मिका मधुधारा नैकानि सहृदयहृदयानि ह्लादयितुमलमित्यत्र नास्ति काचिद्विप्रतिपत्तिः। मया समवाप्तानां तथ्यानामनुसारं न्यूनातिन्यूनतया प्रायः त्रिंशत्संख्यकानि येषूखृष्टविषयकाणि संस्कृतभाषोपनिबद्धानि काव्यानि पाश्चात्त्यैः प्राच्यैश्च विद्वद्भिरूनविंश-

---

[7] Sans. Bib., p. 666.

[8] Ind. Christ., p. 1.

विंशशतकयोर्विरचितानि, यानि खलु निश्चयेन संस्कृतसाहित्यजगतोऽसामान्यसम्पद्रूपेण विशिष्टामेकां धारां सर्जयन्ति जनगणमानसं च मोहयन्ति वरीवर्तन्त इत्यत्र किं चित्रम् ?

इत्थमिदम्प्रथमतया कवितासुरधुन्या समुपप्लावयन्तः पृथ्वीं, संवर्धयन्तोऽनेककविकुलकमलान्, विकासयन्तश्च परस्सहस्राणि सहृदयहृदयमनःकैरवाणि जेजीयन्ते संस्कृतखृष्टीयसाहित्यसर्जकास्ते प्राच्यपाश्चात्याः कोविदकवयोऽजरामरेण यशःकायेन।

अत्र प्राच्य-पाश्चात्य-कविवरैः प्रणीतानां संस्कृतखृष्टीयसाहित्यस्य मौलिभूतानां महाकाव्यानां, खण्डकाव्यानां, गद्यकाव्यानाम्, अनूदितकाव्यानां तथा च विविधकाव्यानामेकैकशः समुल्लेखपुरःसरमालोचना समासेन विधीयते। अनेन समग्रस्याप्यस्य वाङ्मयस्य विशालत्वं महत्त्वं तथा च नूतनत्वं प्रतीयमानं स्यादिति निश्चप्रचम्।

## २.४.१. महाकाव्यानि

१. *श्रीखृष्टसंगीता – येषूत्पत्तिपर्व*; *Christa-Sangītā, or the Sacred History of Our Lord Jesus Christ, in Sanskrit Verse*, William Hodge Mill, Bishop’s College, Calcutta, 1831.

| | अध्यायनाम | श्लोकसंख्या |
|---|---|---|
| १. | *शब्दावतारः* | २३ |
| २. | *धन्यनमस्कारः* | २८ |
| ३. | *महा'योहन्नि'जन्मोपाख्यानम्* | ५० |
| ४. | *पेतृकसंविदुपाख्यानम्* | ७४ |
| ५. | *दाविद्वंशावलिः* | ९५ |
| ६. | *कुमारीप्रसवनम्* | ४९ |
| ७. | *मोक्तृनामकरणम्* | २६ |
| ८. | *सन्नायकनक्षत्रोदयः* | ५१ |

| | | |
|---|---|---|
| ९. | *अस्मत्सहेश्वरप्रतिष्ठा* | ८४ |
| १०. | *नरमुक्तिप्रतिश्रवः* | ८० |
| ११. | *अनघशिशुवधः* | ६४ |
| १२. | *राज्यविकारः* | ६२ |
| १३. | *शास्त्रवर्णनम्* | ११४ |
| १४. | *प्रभुयात्राकथनम्* | ८५ |
| १५. | *अवतीर्णपर्व्ववर्णनम्* | ३८ |
| १६. | *ईश्वपुत्रस्तोत्रम्* | ६२ |
| **षोडशाध्यायाः** | | **साकल्येन - ९८५** |

२. ***श्रीखृष्टसंगीता – पुत्राभिषेकपर्व*** ; *Christa-Sangītā, or the Sacred History of Our Lord Jesus Christ, in Sanskrit Verse*, William Hodge Mill, Bishop's College, Calcutta, 1834.

| **अध्यायनाम** | | **श्लोकसंख्या** |
|---|---|---|
| १. | *दूतप्रेरणम्* | १९ |
| २. | *प्रान्तरघोषणम्* | ५८ |
| ३. | *ऐश्वरसंस्कारः* | १९ |
| ४. | *परीक्षकपराजयः* | ४१ |
| ५. | *प्रभुसाक्ष्यसंवादः* | ३९ |
| ६. | *विवाहोत्सवप्रभावः* | २० |
| ७. | *ईशार्चकविभावनम्* | ७२ |
| ८. | *महाजन्यानन्दपूरणम्* | ५३ |
| ९. | *समार्यामृतोपदेशनम्* | ८६ |

| | | |
|---|---|---|
| १०. | *'गलीला'भिधानम्* | ४८ |
| ११. | *नरसंग्रहः* | ४४ |
| १२. | *पर्व्वतीयोपदेशः* | १११ |
| १३. | *मोचकवाङ्माहात्म्यम्* | ३८ |
| १४. | *दुर्व्विधार्थसुवार्ता* | ५६ |
| १५. | *दयालयपुष्करणी* | ६० |
| १६. | *वरदयाप्रकाशः* | ७१ |
| १७. | *शान्तविचारः* | ३५ |
| १८. | *स्वर्गीयदृष्टान्तस्यार्थः* | १२५ |
| १९. | *भूतोपसर्गदमनम्* | ३५ |
| २०. | *सदग्रचरशिरश्छेदः* | ४६ |
| २१ | *शस्यच्छेदकप्रेरणम्* | ४० |
| २२. | *'गलीला'पुरभर्त्सनम्* | ३९ |
| २३. | *अनन्तजीवनान्नम्* | ११८ |
| **त्रयविंशत्यध्यायाः** | | **साकल्येन - १२७३** |

३. ***श्रीखृष्टसंगीता – सत्पालकचरित्रपर्व***; *Christa-Sangītā, or the Sacred History of Our Lord Jesus Christ, in Sanskrit Verse*, William Hodge Mill, Bishop's College Press, Calcutta, 1838.

| | | |
|---|---|---|
| | **अध्यायनाम** | **श्लोकसंख्या** |
| १. | *परिचारकगणनिर्याणम्* | ३२ |
| २. | *बाह्यधर्म्मनिरसनम्* | २९ |

| | | |
|---|---|---|
| ३. | *भक्ष्यावशेषः* | ९८ |
| ४. | *खृष्टीयमण्डलीनिर्माणपरिसरः* | ३६ |
| ५. | *पुत्रैश्वर्यविभासनम्* | ३१ |
| ६. | *शिष्यमलनिरोधः* | १०६ |
| ७. | *शान्तधर्म्मप्रशंसा* | ७४ |
| ८. | *मुक्त्याकरप्रदर्शनम्* | ८१ |
| ९. | *जगत्प्रकाशः* | १२४ |
| १०. | *लोभादिविरोधनम्* | ५२ |
| ११. | *नाशनिवारणहितसमयादेशः* | २६ |
| १२. | *'गलीला'न्तिमभ्रमणम्* | ३४ |
| १३. | *ईश्वराह्वानम्* | ४२ |
| १४. | *अपचितातिहर्षः* | ३४ |
| १५. | *विश्वस्तभृत्यसद्धनम्* | ५६ |
| १६. | *सत्प्रार्थनाविवेकः* | ४८ |
| १७. | *पितृपुत्रैकत्वोपदेशः* | ३७ |
| १८. | *निर्मलराज्यशासनम्* | २८ |
| १९. | *विशिष्टाल्पत्वोपाख्यानम्* | ४४ |
| २०. | *मृत्युविजयनिदर्शनम्* | ६२ |
| २१ | *भव्यमृत्युसूचनम्* | ३५ |
| २२. | *अन्धादिविमुक्तिः* | २४ |
| २३. | *यात्राशेषः* | ५३ |
| **त्रयविंशत्यध्यायाः** | | **साकल्येन - ११८६** |

४. ***श्रीखृष्टसंगीता – मोक्तृमाहात्म्यपर्व***; *Christa-Sangītā, or the Sacred History of Our Lord Jesus Christ, in Sanskrit Verse*, William Hodge Mill, Bishop's College Press, Calcutta, 1838.

| अध्यायनाम | | श्लोकसंख्या |
|---|---|---|
| १. | *मुमूर्षुदेहाभ्यञ्जनम्* | ५१ |
| २. | *सद्राजप्रवेशः* | ३१ |
| ३. | *सर्व्वान्वियप्रार्थनालयशोधनम्* | २७ |
| ४. | *सद्धन्तृमन्दगुरुपराजयः* | १४४ |
| ५. | *नरपुत्रद्वितीयागमनादेशः* | ११२ |
| ६. | *अभिषिक्तघातकालप्रस्तुतिः* | ८७ |
| ७. | *सद्भोजनाशीर्व्वादः* | १४८ |
| ८. | *महामध्यस्थचरमोपदेशः* | ८९ |
| ९. | *उद्यानीयव्यथनम्* | ५० |
| १०. | *वरोपलनिराकृतिः* | ७२ |
| ११. | *पापिहस्ते प्रभुसमर्पणम्* | १२१ |
| १२. | *महायज्ञसंपूरणम्* | १३९ |
| १३. | *आर्य्यदेहनिखातार्पणम्* | ६१ |
| १४. | *परमविश्रामः* | ४० |
| १५. | *तमोबलपराजयः* | ११४ |
| १६. | *मृत्युजयप्रदर्शनम्* | ४६ |
| १७. | *सत्प्रत्ययप्रशंसा* | २३ |
| १८. | *नित्यपालकावभासनम्* | ४४ |

| | | |
|---|---|---|
| १९. | *स्वर्गारोहणम्* | ३७ |
| २०. | *सदात्मशासितमण्डलीप्रबन्धः* | १३२ |
| २१ | *सर्व्वशक्तिमन्मोक्तृस्तोत्रम्* | १० |
| **एकविंशत्यध्यायाः** | | **साकल्येन - १५७८** |

वस्तुतश्चतुर्षु पर्वसु विभक्तस्य मिलपादैर्विरचितस्य *श्रीखृष्टसंगीता* इति महाकाव्यस्य त्र्यशीतिसंख्यकेष्वध्यायेषु (८३) साकल्येन सन्ति तावद् द्वाविंशत्यधिकपञ्चसहस्रसंख्यकाः (५०२२) श्लोकाः। परन्तु ग्रन्थानामेतेषामाकारवैपुल्यं तथा प्रकाशनकालवैभिन्न्यं लक्षयता मया विशालाकारकस्य महाकाव्यस्यास्य पर्वचतुष्टयमेवैकैकं भिन्नं भिन्नं महाकाव्यं भवितुमलमिति प्रदर्शयितुमिष्यते। मन्ये समग्रेऽपि लौकिकसंस्कृतसाहित्याकाशे नास्त्येतादृग्विशालमेकमपि महाकाव्यमित्यस्य वैशिष्ट्यमन्यतमम्। न केवलमाकारदिशा, अपि तु महत्त्वादपि संस्कृतखृष्टीयसाहित्यनभसि काव्यमिदं महदवदानं बिभर्ति। किं बहुना, प्रायः सर्वैरेव संस्कृतखृष्टीयसाहित्यकारैरेव मिलवर्योऽयं सश्रद्धं संस्मृतः, क्वचित्पुनः तत्प्रदर्शितकाव्यकवनमार्गोऽपि तैरविकलमनुसृत इति मिलपादस्यावदानमवश्यमानतशिरसा स्वीकार्यम्।

५. ***श्रीयेषूखृष्टमाहात्म्यम्*** – *The Glory of Jesus Christ; A Brief Account of Our Lord's Life and Doctrines*, John Muir, Ostell and Lepage, Calcutta, 1848.

महामोक्तुः श्रीयेषूखृष्टस्य जीवितचरितादिवर्णनपरं प्रख्यातप्राध्यापकैः श्रीजान्म्यूरवर्यैर्विरचितमिदं *श्रीयेषूखृष्टमाहात्म्यम्* इत्यष्टाध्यायान्वितं महाकाव्यम्। साधारणतया महाकाव्येऽध्यायाः सर्गनाम्नैव कथ्यन्त इति तावत् संस्कृतालङ्कारिकाणां वचनम्। परन्त्वस्मिन् खलु सर्गा 'अध्याय'-पदेन निरुक्ताः। अध्यायाष्टके सन्ति खलु साकल्येन सप्तपञ्चाशदधिकाष्टशतसंख्यकाः (८५७) श्लोका अनुष्टुब्वृत्तविनिर्मिताः।

प्रख्यातप्राच्यतत्त्वविदा प्रणीतस्यास्य महाकाव्यस्य विषयस्तु प्राधान्येन श्रीयेषूखृष्टस्य पूतजीविते संघटितवृत्तजातान्युपजीव्य पल्लवितः। अत्र जगतो यो हि गुरुः, यः किल बान्धवः, यस्तावन्मोक्ता,

यश्च प्रभुस्तस्य श्रीयेष्व एव जन्म, जीवनचर्या, सत्कथाकलापाः, अलौकिककर्माणि, मृत्युस्तथा पुनरुज्जीवनमित्यादयो विषया नितरामेव सुललितेन वचोविन्यासेन विन्यस्ताः। श्रीयेषूसम्बन्धिनि विषयेऽस्मिन्ननवहितानां जनानां ज्ञानविवृद्धये तथा च तद्वारा खृष्टधर्मस्य सम्प्रचारायैव कवेरयं प्रयास इति मन्मतिः। काव्यस्यास्य विषये विस्तृततयास्यैव गवेषणाभिसन्दर्भस्य *श्रीजान्-म्यूर-प्रणीतानां संस्कृतकाव्यान्तराणां समीक्षा* इति संज्ञके पञ्चमेऽध्याये वर्णनं विधास्यत इति तत्रैवानुसन्धित्सुभिरवलोकनीयम्।

६. ***श्रीपौलचरित्रम्*** or ***श्रीयेषूखृष्टप्रेरितपौलचरित्रम्*** – *A Short Life of the Apostle Paul with a Summary of Christian Doctrines as Unfolded in His Epistles*, John Muir, Encyclopaedia Press, Calcutta, 1849.

जान्-म्यूरवर्यैर्विरचितेऽस्मिन् महाकाव्येऽस्त्यध्यायदशकम्। तत्रापि सन्ति साकल्येन एकोनविंशत्यधिकनवशतसंख्यकाः (९१९) श्लोकाः।

दशसु अध्यायेष्वादौ खृष्टधर्मस्यान्यतमो विरोधी शौलः (परं पौलनाम्ना ख्यातः) केन प्रकारेण प्रभोर्येष्वो दर्शनमवाप्य खृष्टधर्ममाश्रित्य देशेषु तथा विदेशेषु बहु कष्टं सहमानोऽपि तद्धर्मप्रचाराय प्राणपातमकार्षीत्तथा तदुदीरितखृष्टीयमतान्यत्र कविना नितरां प्राञ्जलगिरा प्रतिपादितानि।

ग्रन्थस्यास्य विषयेऽस्यैव गवेषणाभिसन्दर्भस्य *श्रीपौलचरित्रम्' – जान्-म्यूरीयं महाकाव्यम्* इत्याख्ये चतुर्थाध्याये विस्तरशः समालोचना कृतेति तत्र कृपया द्रष्टव्यम्।

७. ***क्रिस्तुभागवतम् (महाकाव्यम्)*** – *A Mahakavya in Sanskrit based on the Life of Jesus Christ*, P. C. Devassia, Jayabharatam, Trivandrum, 1977.

त्रयस्त्रिंशत्सर्गात्मकेऽस्मिन् महाकाव्ये भगवतः खृष्टदेवस्य पावनं चरित्रं चित्रितं महाकविना देवस्यवर्येण प्रायः द्व्यशीत्यधिकपञ्चशताधिकैकसहस्रसंख्यकैः (१५८२) श्लोकैः। श्रीयेषूखृष्टं महाकाव्यस्यास्य नायकत्वेन परिवेशयता महाकविना यथा संस्कृतालङ्कारिकैरभ्युपगतानि महाकाव्यलक्षणानि प्रायः सर्वाण्येवात्रानुमोद्य व्याख्यातानि तथैव खृष्टचरित्रस्य ऐतिहासिकत्वेऽपि

न विहिता काचन विकृतिरिति देवस्यवर्यः सुमहतीं श्लाघामाप्नोतीत्यत्र किं चित्रम्? तथाह्यधस्तादध्यायानां काचन प्रस्तूयते सूचिका –

| सर्गनाम | | श्लोकसंख्या |
|---|---|---|
| १. | *कन्यकादर्शनम्* | ४५ |
| २. | *प्रतिश्रुतिः* | ३६ |
| ३. | *'सखर्य'स्य दिव्यदर्शनम्* | ५२ |
| ४. | *मङ्गलविज्ञापनम्* | ३८ |
| ५. | *बन्धुगृहाभिगमनम्* | ३८ |
| ६. | *जन्मदेशगमनम्* | ४० |
| ७. | *भगवतो येशोरवतारः* | ३० |
| ८. | *देवालयसमर्पणम्* | २७ |
| ९. | *विद्वदागमनं 'हेरोद'कृतं शिशुमारणं च* | ५६ |
| १०. | *येशोः शैशवम्* | ५३ |
| ११. | *स्नापक'योहन'स्यागमः* | ३१ |
| १२. | *पिशाचस्य प्रलोभनं येशोः शिष्यवरणं च* | ४२ |
| १३. | *विवाहोत्सवे भगवतः प्रथमाद्भुतम्* | ३७ |
| १४. | *समरियाङ्गनावृत्तान्तः* | ३४ |
| १५. | *अद्भुतपरम्परा* | ५७ |
| १६. | *अन्यान्यद्भुतानि द्वादशशिष्यवरणं च* | ४१ |
| १७. | *गिरिप्रभाषणम् – १* | ५२ |
| १८. | *गिरिप्रभाषणम् – २* | ४२ |

| | | |
|---|---|---|
| १९. | *स्नापक'योहन'स्य वधः* | ४७ |
| २०. | *'मग्दलेना'यास्तैलाभिषेकः* | ७७ |
| २१ | *साधोः 'समरीय'स्य दृष्टान्तः* | ८७ |
| २२. | *दुर्व्ययिनः सुतस्य कथा* | ४१ |
| २३ | *गणिकावृत्तान्तः* | ५६ |
| २४. | *'लासर'स्य पुनरुज्जीवनम्* | ३८ |
| २५. | *येशोर्जैत्रयात्रा* | ४४ |
| २६. | *युगान्तस्य लक्षणानि* | ६७ |
| २७. | *अन्तिमभोजनम्* | ६१ |
| २८. | *गदसीमन्यारामे येशोर्यातना* | ४५ |
| २९. | *'यूदास'स्य प्राणत्यागः* | ४० |
| ३०. | *'पीलात'स्य विचारो निर्णयश्च* | ८१ |
| ३१. | *येशोः क्रूशारोपणम्* | ६४ |
| ३२. | *येशोरुत्थानम्* | ४८ |
| ३३. | *स्वर्गारोहणम्* | ३५ |
| **त्रयस्त्रिंशत्सर्गाः** | | **साकल्येन - १५८२** |

अत्रेदमवश्यमुल्लेख्यं यन्महाकविनास्य काव्यस्य रचनायाः स्वीकृतित्वेन १९८० – खृष्टाब्दे **'साहित्य-अकाडेमी'-पुरस्कारेण** सभाजितोऽभूदिति महाप्रमोदकारणम्। अस्य महाकाव्यस्य

विस्तृताध्ययनाय श्री-श्वेता-प्रजापति-वर्यया प्रणीतः *Kristubhāgavatam: A Sanskrit Epic on the Life of Jesus Christ* इत्याख्यः प्रबन्धः कृपयानुसन्धित्सुभिर्द्रष्टव्यः[9]।

### २.४.२. खण्डकाव्यानि

१. *पापमोचनीययथार्थोपायप्रदर्शनम्* – *The Inefficacy of the Ganges to Wash away Sin with a Statement of the True Atonement*, John Muir, Baptist Mission Press, Calcutta, 1840.

अनुष्टुपा छन्दसा विरचितेऽस्मिन् खण्डकाव्ये साकल्येन सन्ति तावत् त्र्यधिकैकशतसंख्यकाः श्लोकाः। यद्यपि स्वयं कविना काव्यस्यास्य कोऽपि विभागो न निरमायि, तथापि सूक्ष्मेक्षिकयास्य पाठेनावज्ञायते यदत्र खल्वस्ति स्पष्टतो विभागद्वयम्।

तत्राद्ये गंगाप्सु स्नानेनाङ्घोमोचनव्यर्थता प्रतिपादिता। गुरुशिष्यास्येन प्रवृत्तेऽस्मिन् कथोपकथने भारतीयशास्त्रेभ्यो विविधाः प्रख्याता उद्धृतयः समुपस्थापिताः कविना। यथा *पूजापद्धतिः* इति भारतीयशास्त्रात् – 'पापोऽहं पापकर्माहं पापात्मा पापसम्भवः' इत्यस्य श्लोकस्य तथा च *प्रायश्चित्ततत्त्वाख्य*ग्रन्थाद् 'आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलमि'त्यस्य श्लोकपादस्य सन्निवेशोऽत्र नयनयोः पान्थायते।

द्वितीये भागे तु श्रीयेषूखृष्टसंसिद्धिमेव यथार्थप्रायश्चित्तोपायत्वेन निर्दिशति कविरयम्। समग्रेऽस्मिन् काव्ये शिष्येण पृष्टानां सप्तसंख्यकानां प्रश्नानामुत्तरप्रदानपुरःसरं गुरुमुखेन कविना प्रामुख्येन प्रतिपादितं यत्तत्त्वं तद्धि – खृष्टे यः कोऽपि विश्वस्यात्, स्वर्गीयानन्दसंयुक्तः खार्ष्टकः सोऽङ्घोमुक्तिसौगम्यान्नाघे कदापि मज्जतीति।

---

[9] द्रष्टव्यम् - Prajapati, Sweta. "Kristubhāgavatam: A Sanskrit Epic on the Life of Jesus Christ." *A Marigold of Modern Sanskrit Literature*. New Delhi, New Bharatiya Book Corporation, 2014.

म्यूरवर्यप्रणीतस्य काव्यस्यास्य विस्तरशो व्याख्यास्यैव गवेषणाभिसन्दर्भस्य *श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा* इत्याख्ये पञ्चमेऽध्याये परिवेशिता भविष्यतीति तत्र कृपया द्रष्टव्यम्।

२. *परमात्मस्तवः – A Christian Hymn in Sanskrit Verse and Hindee Prose*, John Muir, Mission Press, Allahabad, 1853.

ग्रन्थोऽयं मया नावाप्तमिति तद्विषयिण्यालोचनात्र न सुलभेति खेदो मे। यद्यपि भाविन्यस्य ग्रन्थस्यान्वेषणपूर्वं तस्य सम्यगालोचनमवश्यं करिष्यामीति दृढो मे प्रत्ययः।

३. *निस्तारमार्गदीपिका*

ग्रन्थोऽयं मया समवाप्तस्य *ईश्वरोक्तशास्त्रधारा – The Course of Divine Revelation; A Brief Outline of the Communication of God's Will to Man and of the Evidences and Doctrines of Christianity with Allusions to Hindu Tenets* – इति ग्रन्थस्यान्ते पाण्डुलिप्याकारेणैव मुद्रितः समवाप्तः। परन्तु प्रकाशकस्य नाम समयो वा तत्र नास्ति।

गुरुशिष्यसंवादच्छलेन उपजातिवृत्तेन रचितमिदं काव्यम्। अत्र पापोर्मिभिर्निराशाग्रस्ताया भवार्णवक्षुब्धमनुष्यजातेरुद्धारायोपाया एव गुर्वास्येन कविनेह प्रदर्शिता इत्यान्वर्थं काव्यम्। अस्य विस्तृततयालोचना *श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा* इत्याख्ये पञ्चमेऽध्याये विधास्यते।

४. *शर्म्मपद्धतिः – The Way of True Happiness: A Sketch of the True Theory of Human Life*, John Muir, Richard Watts, London, 1841.

आद्यन्तमनुष्टुपा छन्दसा श्रीजान्-म्यूरपादेन विरचितेऽस्मिन् खण्डकाव्ये साकल्येन विद्यन्ते एकोनवत्यधिकद्विशतसंख्यकाः (२८९) श्लोकाः। अत्रापि गुरुशिष्यसंवादमाध्यमेन पुराणग्रन्थानां रचनाप्रक्रियामाश्रित्य कविना खण्डकाव्यमिदं प्रणीतम्। वस्तुतः केन पुरुषार्थेन वास्तविकं शर्माधिगन्तुं शक्यत इति भवति प्रधानः प्रश्नः शिष्यस्य, यस्योत्तरं प्रददता खृष्टीयगुरुणा पारलौकिकानन्दावाप्तयेऽघदण्डमोक्तुः येषूखृष्टस्याश्रय एव सर्वैः प्रार्थनीय इति प्रदत्तः खलु निदेशः।

५. *मतपरीक्षा – भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः*, *An Examination of Religions; Containing a Consideration of the Hindu Sastras*, John Muir, Orphan Press, Mirzapore, 1852.

ग्रन्थोऽयं श्लोकात्मकत्वाद्यद्यपि काव्यसंज्ञात्वमाप्तुमर्हति, तथाप्यस्य वस्तुगतदिशा विचारे विहिते ज्ञायते यदिदं सम्पूर्णतया दर्शनशास्त्रपदवीमाधत्ते। अत्र केनचिद्वेदविद्वता समं कस्यचित्सत्यार्थिनः परस्परमालापः प्रस्तुतः। परन्त्वनेनैवालापेन भारतस्य प्रायः समेषामेव प्रधानशास्त्राणां समालोचनात्मकस्तर्कः पुरतोऽस्मान् समुपस्थितः। वस्तुतो म्यूरपादस्य कृतिरियं भारतीयसंस्कृतेस्तथैतिह्यस्य मूलस्तम्भभूतेषु वेदाद्युपनिषत्पुराणादिषु शास्त्रेषु निहितानां निगूढानां तत्त्वानां सविचारमालोचनामेव प्रस्तुतीकरोति। नानाशास्त्रेभ्यः समाकलितान्युद्धरणान्यतिरिच्यापि नवत्यधिकाष्टशतसंख्यकैरुपजात्यनुष्टुब्भ्यां छन्दोभ्यां प्रणीतेऽस्मिन् काव्यात्मके शास्त्रे विविधभारतीयशास्त्रेभ्यः संगृहीतानां मतनिचयानां विचारात्मिका परीक्षा विहितेत्यस्य *मतपरीक्षा* इत्यन्वर्थसंज्ञा संज्ञितेत्यत्र न स्यात्कापि विप्रतिपत्तिः।

*मतपरीक्षा – ख्रिस्तीयमतप्रदर्शनात्मको द्वितीयः खण्डः* – *Examination of Religions; Being an Exposition of the Evidences of Christianity for Hindus*, John Muir, Bishop's College Press, Calcutta, 1854.

श्रीजान्म्यूरपादैः प्रणीताया मतपरीक्षाया द्वितीयः खण्डः ख्रिस्तीयमतविचारपरः। अत्रापि पूर्ववदेव वेदविद्वता सह सत्यार्थिनः संलापः कविना समुपस्थापितः। परन्त्वस्मिंस्तु विस्तरेण खृष्टवृत्तान्तं तथा तद्धर्मस्योद्भवं वर्णयति कविः सत्यार्थिमुखेन। धर्मस्यास्य सर्वत्र प्रचारः, श्रीयेषूखृष्टस्याद्भुतकर्माणि, तेषां समालोचना, यिहूदीनामितिहासः, येष्व ईश्वरपुत्रत्वतत्त्वं, खृष्टधर्ममाश्रित्य विविधैः खृष्टीयभक्तैः पुस्तकप्रणयनं तन्मतानि च, भारतीयशास्त्रेषु विशेषतया पुराणादिषु प्रख्यातानां दैवतानां मानववासनापूर्तित्वेऽसामर्थ्यं, श्रीयेष्वः श्रीकृष्णादिचरित्रापेक्षया वैलक्षण्यं, वेदान्तिनां भगवता सममेकीभवनतत्त्वस्यासम्भवपरत्वं, जगतो मुक्तिप्रदातुः श्रीयेष्वः शरणागतित्वप्रशंसा तथा तस्य सततं प्रार्थना चेत्यादिको विविधो विषयः कथोपकथनात्मकेन वाग्विन्यासेन नितरामेव विस्तृततया कविना छन्दोभिरनेकाभिर्विचारितो नवत्युत्तरनवशताधिकैकसहस्रसंख्यकैः (१९९०)

श्लोकसमूहैः। काव्यस्यास्य व्याख्यानमस्यैव गवेषणाभिसन्दर्भस्य *श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा* इत्याख्ये पञ्चमेऽध्याये कृतमिति तत्र कृपया द्रष्टव्यम्।

६. *क्रिस्तुसहस्रनाम* – I. C. Chacko, प्रदेशीयपत्रिकायां प्रकाशितम्, केराला, १९१४.

'विष्णुसहस्रनाम' इति रचनाधारेण रचितमिति विद्वभिर्मन्यते। सारस्वतकृतिरियं मन्ये साम्प्रतमपि ग्रन्थाकारेण प्रकाशिता नाभवत्। तथाहि पण्डितप्रवरेण श्रीसत्यव्रतशास्त्रिणास्य पाण्डुलिप्याकारत्वमेव स्वीकृतम्।[10]

७. *श्रीयेशुसौरभम्* – Thekkumcore, A. N. Soma Varma Raja, Geetha Prakashan, Cochin, 1974.

खण्डकाव्येऽस्मिन् सन्ति सर्गाश्चत्वारः। तत्र ३०१-संख्यकश्लोकमयस्यास्य काव्यस्य समाप्तिर्भवति पञ्चभिः स्तोत्रैः। तेष्वाद्ये भजनसप्तकं, द्वितीये पवित्रहृदयवर्णनपरं स्तोत्रं, तृतीये खृष्टप्रशंसात्मकं स्तोत्रं, चतुर्थे श्रीयेष्वः स्तोत्रमन्तिमे च भक्तजिजीविषा इति स्तोत्रपञ्चकं राजते।

लघुकाव्येऽस्मिन् प्रतिच्छत्रं महाकवेः कालिदासस्य प्रभावः परिस्फुट्यते। तथाहि मेरीविलापवर्णनावसरे कवेः मानसपटे कालिदासीयस्य *कुमारसम्भवस्य* रतीविलाप उत वा *रघुवंशस्य* अजविलापो मन्ये प्रतिध्वनितोऽभवत्। अतः कविना मेरीमुखेन विलपितम् –

"गतसंज्ञमवेक्ष्य विह्वला

मरिया स्वाङ्कगतं निजात्मजम्।

विललाप सबाष्पलोचना

समदुःखानखिलांश्च कुर्वती।।"[11] इति।

---

[10] खृष्टसाहित्य., पृ. ५.३२५.

[11] *श्रीयेशुसौरभम्* (सोमवर्मराज-प्रणीतम्), चतुर्थः सर्गः, श्लोकसंख्या – ५२, पृ. ११३.

अपि च, *रघुवंशस्य* प्रख्यातश्लोकमनुसरता कविना काव्यस्यास्य प्रथमसर्गस्य द्वितीयः श्लोकोऽलेखि –

“क्व मे निर्विषया बुद्धिः

क्व श्रीयेशुमहाकथा।

मोहाद्धवाम्यारुरुक्षु-

रामयावी महागिरिम्।।”[12] इति।

२.४.३. गद्यकाव्यानि

महाकाव्यैस्तथा खण्डकाव्यैः समं प्राच्यपाश्चात्यपण्डितैः विरचितानि खलु कानिचित् काव्यानि यानि संस्कृतालङ्कारिकदृष्ट्या यद्यपि न भजन्ते गद्यकाव्यलक्षणानि, तथापि गद्याकारेण प्रणीतानि तानि विशेषतया केषाञ्चिच्चरित्राण्याश्रित्य प्रवर्तितानि। अतस्तानि चरिताश्रितसाहित्यान्तर्भुक्तित्वं गन्तुमर्हन्ति। यथा विश्वकवेः रवीन्द्रनाथस्य ‘चारित्रपूजा’-ग्रन्थे विद्यासागर-राममोहन-देवेन्द्रनाथादीनां चारित्र्यं वर्णितमालक्ष्यते। तथा च भारतमातुर्वीरपुत्रस्य विवेकानन्दस्य सुभाषचन्द्रस्य वा जीवनमाश्रित्य बहुभिर्विद्वद्भिर्विरचितानि काव्य-नाटकादीनि। अतस्तेषां समेषामेव चरिताश्रितसाहित्येऽन्तर्भावो भवितुमलम्। एवमेव भगवतः खृष्टस्य जीवितमाश्रित्य तथा च खृष्टधर्मरहस्यमुपजीव्य प्रणीतानि गद्याकारतामवाप्तानि काव्यानि यथा –

१. *खृष्टधर्मकौमुदी* – J. R. Ballantyne, James Madden, London, 1859.

गद्यकृतिरियं वस्तुतः खृष्टीयमतेन साकं हिन्दुदर्शनस्य तौलात्मकमालोचनम्। अत्र पञ्चाध्यायाः सन्ति। तत्र प्रथमोऽध्यायो भवति विवक्षितसिद्धान्तोद्देश इति संज्ञकः। प्रथमाध्यायस्य प्रतिपादिते तृतीयसूत्रे सिद्धवन्निर्दिष्टं पूर्वोत्तरसंविद्ग्रन्थयोरीश्वरोक्तत्वं व्यवस्थापयितुं द्वितीयाध्यायस्य प्रारम्भः। तृतीयाध्यायस्तु प्रवर्तितः जगत्कर्तुः बुद्धिपूर्वकारित्वं नैयायिकानां सम्मतं वेदान्तिमतपूर्वभूमिकाभूते

---

12 *श्रीयेशुसौरभम्* (सोमवर्मराज-प्रणीतम्), प्रथमः सर्गः, श्लोकसंख्या – २, पृ. ३.

साङ्ख्यशास्त्रे प्रतिषिद्धं व्यवस्थापयितुम्। खृष्टमतरहस्यस्य विवेकार्थं चतुर्थाध्यायः प्रस्तूयते। अन्तिमे पञ्चमाध्याये व्यालाण्टाइन्-वर्येण प्रतिपाद्यते यद् दुःखसत्त्वानुमतिविषयकयादृशानुपपत्तिभिः खृष्टधर्मो बाध्यते तादृशीभिरेव समानकर्तृकोऽयं प्रपञ्चोऽपि बाधितुं शक्यते जगद्बाधकानुपपत्तिभ्यः अधिका अनुपपत्तयः खृष्टधर्मे न सन्तीति।

२. ***खृष्टधर्मकौमुदीसमालोचना*** – Brajalal Mukhopadhyaya, People's Press, Calcutta, 1894.

जे. आर. व्यालाण्टाइन्-सूरिणा विरचितायाः खृष्टधर्मकौमुद्याः समीक्षणपरेयं रचना। तत्र खृष्टधर्मकौमुदीग्रन्थे सन्ति बहवो भ्रमा इति कृत्वा तन्निरासायैव श्रीमता व्रजलाल-मुखोपाध्यायेन सत्यतत्त्वोद्बोधिका पत्रिकेयं प्रणीता। गद्याकारेण प्रणीतेऽस्मिन् ग्रन्थे सन्ति चत्वारोऽध्यायाः साकल्येन।

३. ***येशुचरितम्*** – J. Marcel, L.F.I. Press, Ernakulam, 1969 (Second Edition).

प्रभोः श्रीखृष्टस्य जीविताश्रितमपरमेकं सार्थकं गद्यकाव्यमिदम्। कविरात्मानं मार्सलाचार्यत्वेनात्र समुपस्थापयति। नितरां प्राञ्जलेन वचोविन्यासेन प्रभोः सम्पूर्णमपि जीवनमत्र वर्णितं कविना पञ्चभिरध्यायैः।

४. ***ईश्वरोक्तशास्त्रधारा*** – *The Course of Divine Revelation; A Brief Outline of the Communication of God's Will to Man and of the Evidences and Doctrines of Christianity with Allusions to Hindu Tenets*, John Muir, Baptist Mission Press, Calcutta, 1846.

श्रीम्यूरवर्येण प्रणीतस्य गद्याकारतामापन्नस्यास्य काव्यस्य हिन्द्यां तथाङ्गलभाषायां यथानुवादोऽधिग्रन्थमेव विद्यते तथैव पण्डितप्रवरैः कृष्णमोहनव्यानार्जीपादैः प्रणीतो वङ्गानुवादोऽपि मूलग्रन्थप्रकाशनस्यैकवत्सरात्परम् १८४७ – खृष्टाब्दे प्रकाशितोऽभूत्।

काव्येऽस्मिन् गुरुशिष्ययोः कथोपकथनेन श्रीयेषूखृष्टोदीरितानां धर्मीयतत्त्वानां विषये काचित्सुस्पष्टा प्रतिच्छविः प्राप्यते। भारतीयशास्त्रेभ्यो विविधान्युदाहरणानि समाकलय्य कविनात्र मनुष्यैः साकं

भगवतः संयोगः संस्थापितः। महाभारतस्यारण्यकपर्वणो मत्स्योपाख्यानस्य तथा विष्णु-वाय्वादिपुराणानां विविधश्लोकानां गूढार्थोऽत्र सन्निवेशितः कविनेति तस्य सर्वशास्त्रपारङ्गमत्वं सम्यक् काशते। अपि चात्र गुरुशिष्यसंवादमाध्यमेन मोक्षप्राप्तेरुपाया अपि नितरां प्राञ्जलेन वचोविन्यासेन समुपन्यस्ताः समवाप्यन्त इत्यस्य काव्यस्य मौलिकसंस्कृतकाव्यग्रन्थत्वापेक्षया मोक्षशास्त्रत्वेनैव विचारो विधेयोऽस्माभिः। काव्यस्यास्य समाप्तौ पञ्चत्रिंशत्संख्यकैरनुष्टुब्वृत्तोपेतैः श्लोकसमूहैः परमकारुणिकस्य भगवतः श्रीयेष्वः प्रार्थना विहितेत्यवलोक्यते।

एतानि काव्यान्यतिरिच्यापि स्थातुमर्हन्त्यन्यानि गद्यकाव्यानि खृष्टमतमवलम्ब्य प्रणीतानि। परन्तु मन्दमतिना मया केवलमेवोपर्युक्तानां त्रयाणामेव विषये यत्र तत्र विच्छिन्नतयालोचना समवाप्ता। प्रसङ्गेऽस्मिन् वक्तव्यमवश्यं यदनुवादसाहित्यानामपि प्रायः समस्ता एव रचना गद्यमय्यः। परन्तु मया तेषां भिन्नतया नीचैरुल्लेखो विधीयते।

### २.४.४. अनूदितकाव्यानि

अस्यैवाध्यायस्यादावेव मयका स्पष्टमेवोदीरितं यत्पाश्चात्यपण्डिता भारतमागम्य देवभाषायां प्राप्तव्युत्पत्तयः प्राधान्येनानुवादकर्मणि मनोनिवेशनमकार्षुः। भारतीयपण्डितानां साहाय्येन तेषां पाश्चात्यविदुषां नितान्तमक्लान्तपरिश्रमेण च शीघ्रमेव खृष्टधर्मस्य प्रायः सर्व एव प्रधानग्रन्थाः संस्कृतभाषायामभवन्ननूदिताः। अत्रैतेषां ग्रन्थानां मुद्रणव्यापारे ‘व्याप्टिस्ट-मिशन-प्रेस’ तथा ‘बिशप-कलेज-प्रेस’ इत्येतयोः प्रकाशनसंस्थयोर्भूमिका त्वनस्वीकार्या। नीचैः खृष्टमतावलम्बिनां ग्रन्थानामनूदितसंस्करणानां काचिदनुक्रमणी निर्मीयते –

1. ***The New Testament of our Lord and Saviour Jesus Christ***, *translated into Sanskrit from original Greek,* William Carrey and the Missionaries at Serampore, 3 Volumes, Serampore, 1808-1811.
2. ***The Holy Bible Containing the Old and New Testaments***, *translated into Sanskrit from original Greek,* William Carrey and the Missionaries at Serampore, Serampore, 1821.

3. ***The Book of the Prophet Isaiah in Sanskrit***, Baptist Mission Press, Calcutta, 1845.
4. ***The Bible for Pandits, the first three Chapters of Genesis*** *diffusively and unreservedly commented in Sanskrit and English*, J. R. Ballantyne, James Madden, London, 1860.
5. *प्रभुणा यीशुख्रीष्टेन निरूपितस्य नूतनधर्म्मनियमस्य ग्रन्थसङ्ग्रहः* ***(The New Testament*** *in Sanskrit)*, The Bible Society of India, Bangalore, 1962.
6. *मूसालिखितः आदिग्रन्थः यात्रापुस्तकस्य प्रथमभागश्च* ***(The Book of Genesis and part of Exodus*** *in Sanskrit) translated from Hebrew*, The Calcutta Baptist Missionaries, Calcutta, 1843.
7. *सुलेमनालिखितो हितोपदेशोऽयम् – इब्रीयभाषातो व्याकृतः* ***(The Proverbs of Solomon*** *in Sanskrit) translated from Hebrew*, Baptist Mission Press, Calcutta, 1842.
8. *खृष्टचरितम् – अर्थतो मथि-मार्क-लूक-योहनैः विरचितं सुसंवादचतुष्टयम्*, Baptist Mission Press, Calcutta, 1878.
9. *मथिलिखितः सुसंवादः*, Baptist Mission Press, Calcutta, 1877.
10. *मार्कलिखितः सुसंवादः*, Baptist Mission Press, Calcutta, 1878.
11. *सत्यधर्मशास्त्रम् - मार्कलिखितः सुसंवादः*, Baptist Mission Press, Calcutta, 1884.
12. *लूकलिखितः सुसंवादः*, Baptist Mission Press, Calcutta, 1878.
13. *योहनलिखितः सुसंवादः,* ***The Gospel of St. John*** *in Sanskrit*, Basel Mission Press, Mangalore, 1876.
14. *भगवतो जीससः पार्वती शिक्षा, Translation in Sanskrit of the* ***Sermon on the Mount,*** Lachmi Dhar Shastri, Published by the translator, Delhi, 1982.
15. *गिरिप्रभाषणम् (Translation in Sanskrit of the* ***Sermon on the Mount)***, The Bible Society of India, Bangalore, 1974.

16. *गिरिगीता, (Translation of the* ***Sermon on the Mount*** *in Sanskrit)*, K. P. Urumese, Published by the translator, Trivandrum, 1974.

17. *खृष्टयज्ञविधिः, (The* ***Ordo Missae*** *Translated into Sanskrit from Latin)*, Ambrose Sureschandra Roy, Calcutta, 1926.

18. *महात्यागी*, M. O. Avara, (Translated into Sanskrit from original Malayalam by Narayana Pisharoty), Published by the author (M. O. Avara), N. Perur, 1976.

19. ***करुणाकरीयम् उपदेशामृतम्, (****A Translation into Sanskrit of the first epistle of St. John, with a commentary in English****),*** Harshadeva Sharma & S. Hemraj, Satya Bharati, Ranchi, 1987.

20. *प्रतीतिवाक्यत्रयम्, (Translation into Sanskrit of the* ***Apostles' Creed, Niceo-Constantinopolitan Creed, Athanasian Creed)***, William Hodge Mill, Archives of the United Society for the Proclamation of the Gospel, London, (प्रकाशनकालो नैवावाप्यते).

## २.४.५. विविधकाव्यानि

संस्कृतसाहित्ये प्रणीतानि खलु नैकानि काव्यानि यानि संस्कृतालङ्कारिकैर्निर्दिष्टां काममपि काव्यविधां नैव सम्पूर्णतयानुकुर्वन्ति। अतस्तेषामत्र विविधकाव्यविधायामुल्लेखो विधीयते। एवमेव संस्कृतखृष्टीयसाहित्यपरिसरेऽपि सन्ति कानिचित्काव्यानि येषामत्रान्तर्भुक्तिर्नान्यत्र कुत्रापि महाकाव्ये खण्डकाव्ये गद्यकाव्ये अनुवादकाव्ये भवितुमर्हन्ति। अतस्तेषां विविधकाव्यविधायां स्थितिः साधिता। तथाह्यधस्तात् सहृदयहृदयाह्लादनाय तादृशानां काव्यानां काचनानुक्रमणिका प्रस्तूयते –

१. *नूत्नोदन्तोदोत्सः* – *The Fountain of Water of Fresh Intelligence: A Description of England*, John Muir, Bishop's College Press, Calcutta, 1839.

श्रीजान्म्यूरप्रणीते ऐतिहासिकतथ्यसमृद्धे गद्यपद्यमिश्रिते ग्रन्थेऽस्मिन् प्रधानतया इङ्ग्लण्डदेशस्य विविधविषयाणां वर्णना प्राप्यते। तत्रादौ तेन ज्ञानफलं, मनुष्याणां ज्ञानग्रहणयोग्यताम्, अज्ञानजन्यदोषनिवारणम्, ईश्वरीय-सांसारिकादि-विविधज्ञानप्रकारान् तथा च नीतिविद्यादिकं सर्वमेव प्रपञ्चितम्। ततश्च इङ्ग्लण्डदेशस्य तत्रस्थस्य समाजस्य मनुष्याणाञ्च सविशदं वर्णनं प्रस्तुतम्। तथाह्यधस्तात्तेनाधिग्रन्थं वर्णितानां विषयाणां काचनानुक्रमणिका समुपन्यस्यते –

| | | |
|---|---|---|
| इङ्ग्लण्डराजधानीवर्णनम् | इङ्ग्लण्डदेशीयधर्माधिकरण-वर्णनम् | सैन्यवर्णनम् |
| सेतुवर्णनम् | लोकसंख्यादिवर्णनम् | इङ्ग्लण्डदेशस्य वशीभूतदेशानां वर्णनम् |
| टेम्सनदीस्थविशेषसेतुवर्णनम् | शिल्पकर्मणां वर्णनम् | वाष्पबलप्रकाशकोदाहरणम् |
| मार्गवर्णनम् | वाष्पयन्त्रवर्णनम् | वाष्पीयपोतवर्णनम् |
| आपणवर्णनम् | इङ्ग्लण्डदेशीयवाणिज्य-वर्णनम् | रीतिशिष्टाचारादिवर्णनम् |
| समाजवर्णनम् | महाधनधनोत्थितलाभ-वर्णनम् | दीनदयालुतावर्णनम् |
| रात्रिदीपवर्णनम् | शिक्षावर्णनम् | महाविद्यालयवर्णनम् |
| गासनिर्माणवर्णनम् | स्त्रीशिक्षावर्णनम् | दीनशिक्षादिवर्णनम् |
| गासजलप्रस्तोतृनिरूपणम् | इङ्ग्लण्डस्य खृष्टीयमण्डलीशासनवर्णनम् | स्वयंवरवर्णनम् |
| इङ्ग्लण्डीयापरनगरवर्णनम् | सत्कारोपायवर्णनम् | समाचारपत्रवर्णनम् |
| इङ्ग्लण्डराजनीतिक्रम-वर्णनम् | इङ्ग्लण्डीयशास्त्रवर्णनम् | वाणिज्यकम्पन्याख्यजनसमूहवर्णनम् |

२. *खृष्टपुराण*

थमास-स्टिफेन्स-वर्यैः खृष्टचरित्रमुपजीव्य भारतीयपुराणरचनाशैलीमाश्रयद्भी रचितं संस्कृतायितं माराठीकाव्यमदः। अस्य प्रथमं देवनागरीलिप्यां लिखितं संस्करणं शान्तराम-वन्देलु-पादैः पुनातः प्रकाशितम् १९५६-खष्टाब्दे। ओभि-छन्दसा विरचितस्यास्य काव्यस्य विभागद्वये साकल्येन एकचत्वारिंशदुत्तरषट्शताधिकदशसहस्रसंख्यकाः (१०६४१) श्लोका विद्यमानाः सन्ति। नेलसन-फ्यालकाओ-पादेनास्य काव्यस्य *भारतीय-बाइबेल* इत्यभिधानं प्रदत्तम्।

*३. क्रिस्तायन*

गुरुज्ञानप्रकाशपादस्य काव्यमिदं वस्तुतो हिन्दीभाषया विरचितम्। रामायणाधारेण प्रणीतस्यास्य प्रत्येकमध्यायस्यान्तिमः श्लोकः संस्कृतभाषया विरचित इत्यस्य वैशिष्ट्यमुल्लेख्यम्।[13]

४. *क्रिस्तोपनिषत्*

उपनिषदो रचनाशैलीमनुसृत्य श्रीयेषूखृष्टजीवनञ्चाधारीकृत्य प्रणीता काचिदुपनिषदस्तीति श्रूयत इति सत्यव्रतशास्त्रिणां मतम्। यद्यप्यस्या विषये किमपि तथ्यं तेनापि नाधिगतम्।[14]

***खृष्टोपनिषद्*** (Christ Upanishad) इति नाम्ना कश्चन ग्रन्थो ब्रिटिश-लाइब्रेरी-मध्ये वर्तते, यस्य प्रकाशनमभवत् व्याङ्गालूरूस्थायाः Christian Institute for the Study of Religion and Society इति संस्थायाः १९६५-संवत्सरे। अस्य कर्तृत्वेन तत्र धन्जिभाइ फकिरभाइ इति नाम्ना कस्यचिदुल्लेखो विद्यते।

अपि च, प्रख्यात-बङ्गीय-विदुषा श्रीचिन्ताहरण-चक्रवर्तिना स्वीये बङ्गभाषाबद्धे *आधुनिक संस्कृत साहित्य* इति प्रबन्धे श्रीताराचरण-चक्रवर्ति-प्रणीतस्य ***ख्रीष्टोपनिषत्*** इत्याख्यस्य कस्यचिद् ग्रन्थस्य नामोल्लेखो विहितः।[15]

---

13 खृष्टसाहित्य., पृ. ५.३२५

14 खृष्टसाहित्य., पृ. ५.३२३, ५.३२५.

15 चक्रवर्ती, चिन्ताहरण. “आधुनिक संस्कृत साहित्य”. *भाषा साहित्य संस्कृति*, १३६७ बङ्गाब्द (प्रथम प्रकाश), पृ. ९०.

५. *इतिहासदीपिका* – *A Sketch of the History of India*, John Muir, Bishop's College Press, Calcutta, 1840. [Based on H.H. Wilson's Manual of History and Chronology.]

श्रीजान्-म्यूरविरचिते पद्यमये ग्रन्थेऽस्मिन् भारतीयपुरावृत्तस्य समासतो वर्णनमालक्ष्यते। अत्र भारतीयेभ्यस्तथा च विदेशीयेभ्यो विविधेभ्यः प्रबन्धेभ्यः श्लोका अप्युद्धृताः सन्ति। ऐतिहासिकतथ्यसमृद्धेऽस्मिन् ग्रन्थे साकल्येन सन्ति पञ्चाध्यायाः। तत्राद्योऽध्यायो *मूलपुरावृत्तविकार* इति संज्ञकः। द्वितीयेऽध्याये भारतवर्षस्य पूर्वेतिहाससारः कथितः। तृतीये च भारतीयशास्त्रतत्त्वाविष्कारो विहितः कविना। तुरीयेऽध्याये यवनरौम्यकीर्तिः प्रतिध्वनिता। अन्तिमश्चाध्यायो *भारतवर्षीयोत्तरवृत्तान्तकथन* इति नामधेयः। ग्रन्थेऽस्मिन् साकल्येन त्रयोदशोत्तरपञ्चशतसंख्यकाः श्लोकाः सन्ति। यद्यपि ग्रन्थोऽयं संस्कृतखृष्टीयसाहित्ये नान्तर्याति, तथापि गवेषणाबन्धस्यास्य मूलभूतकविरविणा श्रीमता जान्-म्यूर-वर्येण प्रणीतेयमिति कृत्वात्रास्य सन्निवेशो विहितः।

ग्रन्थस्यास्य प्रथमतोऽध्यायचतुष्टयमादाय कविना *इतिहासतमोमणिः* इति नाम्ना प्रणीतः कश्चन ग्रन्थ आदौ। परवर्तिनि काले पञ्चममध्यायं विरचय्य पुनः परिवर्धितं संस्करणमस्य प्रकाशितं, यस्य नाम तेन *इतिहासदीपिका* इति प्रदत्तम्।

६. *व्यवहारालोकः* – *Brief Lectures on Mental Philosophy and Other Subjects delivered in Sanskrit to the Students of the Benares Sanskrit College with an Address to the Pandits and Students*, John Muir, Presbyterian Mission Press, Allahabad, 1845.

वाराणसी-संस्कृत-महाविद्यालयस्य संस्कृतविद्यार्थिनां कृते प्रदत्तानां भाषणानां संग्रहात्मको ग्रन्थोऽयम्। अत्र विविधा नैतिकदर्शनसम्बद्धा विषया यथा पर्यालोचितास्तथैव संस्कृतेन समं यवन-रौम्यभाषयोरन्योन्यसादृश्यमपि विवेचितम्। अपि च, धर्मशास्त्रसम्बन्धिप्रश्नदशकस्योत्तरमपि तेनात्रैव प्रदत्तम्। अन्तिमे च इङ्ग्लण्डीयानां प्रजाशासनक्रमविषये तेन चर्चा कृतेत्यालक्ष्यते। अतो ग्रन्थोऽयमेकाधारेण यथा दार्शनिकविषयान् ब्रूते, तथैवैतिहासिकतथ्यानपि परामृशतीत्यस्य वैशिष्ट्यमनन्यम्।

७. *शैलोपनिषत्* – L. V. Deshpande, Nasik, 1962.

८. *परमेश्वरप्रकाशः* – अप्रकाशिता पाण्डुलिपिः, 83 Folios, Bishop's College Archives, Calcutta.

९. *सत्यवेदसारसङ्ग्रहः – A Short Exposition of the Essentials of the True Religion*, Jean Calmette SJ, (Ed.) J. Aelen, St. John's Press, 1931.

श्री-जिन-क्यालमेट-वर्येण प्रणीतमिदं काव्यमिति श्रुतिः। अस्य द्विविधं संस्करणं प्राप्यते। प्रथमं तु श्री-जे.-आलेन-पादेन प्रकाशितं, यत्र साकल्येन १९५-संख्यकाः सन्ति श्लोकाः। अपरञ्च श्री-पि.-रायान्ना-वर्येण प्रकाशितं, यत्र खलु साकल्येन १७२-संख्यकाः श्लोकाः प्राप्यन्ते। श्लोकषट्कं व्यतिरिच्य सर्व एव श्लोका भवन्ति अनुष्टुब्वृत्तविनिर्मिताः। तथाहि सत्यस्वरूपं प्रकाशयता कविना नितरामेव सुललितेन वाग्विन्यासेनोपन्यस्तेषु श्लोकेषु केचनैव दिङ्मात्रोदाहरणत्वेनोद्ध्रियते –

"मृगनाभिः परिमले पुष्पेषु कमलं यथा।
श्रेष्ठरत्नेषु माणिक्यं सत्यं श्रेष्ठन्तु सर्वथा।।
यथा शरीरे नेत्रन्तु निशि दीपप्रभा यथा।
दिवा च सविता लोके देवोक्तं वा भवेत्तथा।।
सत्येन लभ्यते ज्ञानं सत्येन सुकृतं भवेत्।
सत्येन सिद्धं मोक्षन्तु सत्यं देवस्य वर्त्म च।।
सत्याय सत्यवपुषे सत्यसंकल्पकाय च।
सत्यवाचे नमः सत्यतेजसे हृदये पुनः।।"[16] इति।

१०. **"Sanskrit Slokas on Christian Subjects"**, *ज्ञानोदय* (माराठीपत्रिका), बोम्बे।

११. ***Bhajans**: A Collection of Songs of Praise in Various languages used at the National Biblical, Catechetical and Liturgical Centre*, Bangalore, NBCLC, Bangalore, 1977. [For Sanskrit, see pp. 8, 13, 36-39, 42-43, 58-64.]

[16] Ind. Christ., pp. 107-109.

इत्थं संस्कृतखृष्टीयसाहित्यं सुतरामेव सम्पुष्टमित्यपेतशङ्कम्। अत्रोल्लिखितानि काव्यानि व्यतिरिच्यापि स्युरवश्यमेवानेके खृष्टमताश्रिताः काव्यग्रन्थाः प्राच्य-पाश्चात्यविद्वद्वरेण्यैः प्रणीताः। अत्रेदमवश्यमेतद्वक्तव्यं यदुल्लिखितानामेतेषां काव्यानां सद्भावान्नितरामेव समृद्धमिदं संस्कृतखृष्टीयसाहित्यमेतावत्कालं यावदस्पृष्टमवहेलितमेवासीत्। परन्तु इतः परमवश्यमेव काव्यान्येतान्यधिकृत्य गवेषणादिकर्माणि भवितार इत्याशासे।

## २.५. संस्कृतखृष्टीयसाहित्ये कवयः

संस्कृतखृष्टीयसाहित्यस्य कलेवरं यद्यपि न विशालं, तथापि येषां कविवराणां कृतिततिभिः सम्पुष्टमिदं, तेषां पाश्चात्यानां प्राच्यानां च कवीनां वर्णना त्ववश्यमिह प्रसङ्गसङ्गत्या समुपस्थापनीयेत्यत्र किं चित्रम् ? मया तु प्रागेव भाषितं यत्साहित्यस्यास्य प्रणयने प्राथम्येन प्रतीच्यभवा विद्वांस एव समायाताः। ततश्च भाविनि प्राच्यैरपि कविभिरत्र संस्कृतालङ्कारशास्त्रोक्तकाव्यकवननियमाननुसृत्य महाकाव्य-खण्डकाव्य-गद्यकाव्यादीनि प्रणीतानि। एतद्व्यतीत्य केचन प्रतीच्याः पण्डिता बभूवुर्ये खलु स्वीयभावयित्र्या प्रतिभया भारतीयशास्त्राणां काव्यानाञ्च सम्यगालोचनपुरःसरं तेषामनुवादमाध्यमेन समग्रेऽपि विश्वे संस्कृतस्यैव महत्त्वं ख्यापयामासुरिति तेषामवदानं वाचामगोचरम्। प्रख्यातबङ्गीयविदुषा साहितसम्राजा श्रीबङ्किमचन्द्रचट्टोपाध्यायेन स्पष्टमुदीरितं यत् –

"...The Hindu has to acknowledge an immense debt to European Scholars. The researchers of European Scholars have converted what was once unintelligible nonsense to a subject of accurate scientific study. What was hitherto unnecessary and meaningless, has now been shown to be a necessary condition of primitive culture and full of deep significance. A myth can now be treated back from its ulterior development to its origin. "[17] इति।

[17] Chattopadhaya, Bankim Chandra. Letter IV: *Letters on Hinduism*.

### २.५.१. अभारतीयकवयः

अत्र केवलं तेषामेव पाश्चात्यकवीनां नाम सश्रद्धं स्वीक्रियते ये खलु स्वकजीविते खृष्टविषयमाश्रित्य प्रधानतया मौलिकं संस्कृतकाव्यमुत वा संस्कृतानुवादकाव्यं प्रणीतम्।

| अनुक्रमाङ्कः | नाम | समयः |
|---|---|---|
| 1. | Roberto de Nobili | (1577-1656) |
| 2. | Pierre Calmette | (न ज्ञातः) |
| 3. | Jean Calmette | (1693-1740) |
| 4. | William Carey | (1761-1837) |
| 5. | Horace Hayman Wilson | (1786-1860) |
| 6. | William Hodge Mill | (1792-1853) |
| 7. | John Muir | (1810-1882) |
| 8. | James Robert Ballantyne | (1813-1864) |

### २.५.२. भारतीयकवयः

अधस्तात्तेषां भारतीयानां कविपुरन्दराणां नामोल्लिख्यते येषां महाकाव्य-खण्डकाव्य-गद्यकाव्य-अनुवादकाव्यादिभिः संस्कृतखृष्टीयसाहित्यं सुतरामेव परिपुष्टमभवत्।

| अनुक्रमाङ्कः | नाम | समयः |
|---|---|---|
| 1. | Brajalal Mukhopadhyaya | (न ज्ञातः) |
| 2. | Krishna Mohan Banerjea | (1813-1885) |
| 3. | Harachandra Tarkapanchanan | (न ज्ञातः) |
| 4. | Ramacandra Vidyabhusana | (न ज्ञातः) |
| 5. | Nilakantha-Nehemiah Goreh | (1825-1885) |
| 6. | Sibuji Bapu (Somanatha) | (न ज्ञातः) |
| 7. | K. P. Urumese | (न ज्ञातः) |
| 8. | Sureshchandra Roy | (न ज्ञातः) |
| 9. | K. P. Narayana Pisharote | (1909-2004) |
| 10. | Harshadeva Sharma | (न ज्ञातः) |

| | | |
|---|---|---|
| 11. | Thekkumcore, A. N. Soma Varma Rajah | (न ज्ञातः) |
| 12. | L. V. Despande | (न ज्ञातः) |
| 13. | Illiparambil Corah Chacko | (1875-1966) |
| 14. | Guru Gyan Prakash | (न ज्ञातः) |
| 15. | P.C. Devassia | (1906-2006) |
| 16. | J. Marcel | (न ज्ञातः) |
| 17. | Kamalakanta Vidyalankar | (न ज्ञातः) |

अध्यायस्यास्यान्तिमे प्रख्यातप्राच्यतत्त्वविदुषः पण्डिताग्रगण्यस्य श्री-मनियर-उइलियम्स-वर्यस्य संस्कृतखृष्टीयसाहित्यविषयिणी विदग्धा वागवश्यमेवानुसन्धेया –

“Such, indeed, is the exuberance and flexibility of this language and its power of compounding words, that when it has been, so to speak, baptized and thoroughly penetrated with the spirit of Christianity, it will probably be found, next to Hebrew and Greak, the most expressive vehicle of Christian truth.”[18] इति।

इति

समाप्तो द्वितीयोऽध्यायः।

[18] *The Study of Sanskrit in Relation to Missionary Work in India*, 1861, p. 54.

# संस्कृतखृष्टीयसाहित्यस्य कविः



**James Robert Ballantyne**

(1813-1864)

संस्कृतखृष्टीयसाहित्यस्य कविः



**Ferdinand Kittel**

(1832-1903)

# तृतीयोऽध्यायः

## ।। श्री-जान्-म्यूरः (John Muir) ।।

# ।। श्री-जान्-म्यूरः (John Muir) ।।

## ३.१. कर्मजीवितम्

स्कटल्याण्डदेशस्य ग्लासगो-वास्तव्यः प्रख्यातः प्राच्यतत्त्ववित्तथा महाकविः श्रीजान्-म्यूर-वर्यो दशाधिकाष्टदशशतकस्य फेब्रुयारीमासस्य पञ्चमेऽह्नि (5th February, 1810) जनिं लेभे। तस्य पितुः उइलियाम-म्यूर-पादस्य चतुर्षु सूनुष्वग्रजभूतोऽयं जान्-पादः इरभिन-व्याकरण-विद्यालये (Irvine Grammar School) बाल्यशिक्षां लब्ध्वा उच्चशिक्षायै ग्लासगो-विश्वविद्यालयं (University of Glasgow) गतः। तदनु इस्ट-इण्डिया-कम्पानी (East India Company) -इत्याख्यायां संस्थायां वृत्त्यवाप्तये प्रस्तुतिः स्वीकृता तदीयसंस्थाया एव हेइलीवारीस्थिते महाविद्यालये (East India Company College, Haileybury).

ऊनत्रिंशदुत्तराष्टादशशततमे खृष्टाब्दे (1829) जान्-म्यूर-वर्यः समाजगाम भारतवर्षम्। कलिकातायाः फोर्ट-उइलियाम-महाविद्यालये बङ्गीय-जानपद-सेवकत्वेन (Bengal Civil Servant) नियुक्तोऽयं यथाक्रमेण एलाहाबाद-नगरे राजस्व-विभागे (Board of Revenue) सहायक-सचिवत्वेन (Assistant Secretary), मिराट-नगरे साहारानपुरे च भूम्यनुसन्धान-विभागे (Department of Land Inquiry) विशिष्टायोगिकत्वेन (Special Commissioner) तथा च आजमगड-नगरे समाहर्तृत्वेन (Collector) स्वकार्यभारं परया निष्ठया पालयाञ्चकार। ततश्चतुश्चत्वारिंशदुत्तराष्टादशशततमे खृष्टाब्दे (1844) वाराणसीस्थितस्य नवनिर्मितस्य भिक्टोरिया-महाविद्यालयस्य (कुइन्स-कलेज इत्यपरं नाम) आद्याध्यक्षत्वेन वृतोऽभूत्सः। केवलं वत्सरमेकं तदध्यक्षपदे समासीनोऽपि स तस्मिन् स्वल्पसमयाभ्यन्तर एव काञ्चिन्मौलिकशिक्षासम्बन्धिनीं पद्धतिं (Original Educational Scheme) प्रारेभे, यत्र समेषां विभागीयसदस्यानां सम्मतिपूर्वं सुरगिरा आङ्गलभाषया च विविधोपदेशावल्याः प्रदानविषयकः सिद्धान्तो गृहीतोऽभूत्। ततः फतेहपुर-नगर्यां जानपदविचारकत्वेन (Civil Judge) तथा दण्डाधिकरणिकत्वेन (Session Judge) च स्वकृत्यं सम्पादयामास यथायथम्।

संस्कृतस्याध्ययनेऽध्यापने च तस्य प्रोत्साहनमवश्यमेवोल्लेखार्हमासीत्। किं बहुना, हिन्दूनां सर्वविधाभ्युदयविधाने सदोद्यमी कश्चित्कर्मयोगी बभूवायं जान्-म्यूर-वर्यः।

त्रयःपञ्चाशदुत्तराष्टादशशततमे संवत्सरे (1853) भारतीयजानपदसंश्रयात् (Indian Civil Service) परावृत्तो जान्-पाद एडिनवार्गपुरीं प्रत्यावृत्य तत्रैव स्ववासं स्थापयन् गवेषणाकर्मणस्तथा उच्चशिक्षायाः समभिवृद्धय आत्मानं नियोजयामास। एडिनवार्ग-विश्वविद्यालयस्य समुन्नतिविधानाय प्रतिष्ठितायाः परिषदोऽन्यतमः प्रधानः पुरोधा बभूव जान्-पादः। तथाहि तेन तस्मिन्नेव विश्वविद्यालये द्वाषष्ट्यधिकाष्टादशशततमे खृष्टाब्दे (1862) संस्कृतविभागस्य तथा तुलनात्मक-भाषाविज्ञानविभागस्य (Sanskrit and Comparative Philology) प्रारम्भोऽकारि। नैतिक-दर्शन-विभागे (Moral Philosophy) शिक्षायाः प्रकर्षहेतोर्जान्-वर्येण स्वभ्रात्रा स्यार-उइलियाम-म्यूर-पादेन साकं 'श-वृत्ते'रपि (Shaw Fellowship) प्रवर्तनं विहितम्। किञ्च, तुलनात्मक-धर्मविभागे (Comparative Religion) म्यूर-पादो यथा म्यूर-प्राध्यापक-वृत्तिं (Muir Lectureship) प्रारेभे तथैव एडिनवार्ग-विश्वविद्यालयस्य तथा च केम्ब्रिज-विश्वविद्यालयस्य प्राच्यविद्या-विभागे (Oriental Studies) गवेषणाकर्मणः प्रोत्साहनवर्धनाय विविधं पारितोषिकमुपजह्ले।

भारतवर्षे तदीयकर्मणः प्रोत्कर्षं स्वीकुर्वता अष्टसप्तत्युत्तराष्टादशशततमे संवत्सरे (1878) म्यूर-पादः C.I.E.- इत्युपाधिना (Commander of the Indian Empire) भूषितः। एवमेव पञ्चपञ्चाशदुत्तराष्टादशशततमे (1855) तथा एकषष्ट्युत्तराष्टादशशतमे च खृष्टाब्दे (1861) म्यूर-वर्यो यथाक्रमेण अक्सफोर्ड-विश्वविद्यालयतः D.C.L.- इत्युपाधिना (Doctor of Civil Law) तथा एडिनवार्ग-विश्वविद्यालयतः LL.D.- इत्युपाधिना (Doctor of Laws) च सभाजितो बभूव।

संस्कृतखृष्टीयसाहित्यस्य प्रधानभूतग्रन्थेषु मूर्धन्यत्वमापन्नस्य *श्रीखृष्टसंगीता* इत्याख्यस्य काव्यस्य प्रणेतुः श्री-उइलियम-हज-मिल-वर्यादनन्तरं न कोऽपि इउरोपीयः खृष्टप्रचारकः भारतीयधर्मयाजको वा खृष्टीयविषयमाश्रित्य मौलिकसंस्कृतकाव्यस्य प्रणयने स्वारसिकः समर्थो वासीत्। केरीमहोदयोऽपि स्वीयस्य धर्मपुस्तकस्य रचनायाः परं प्रायः दशकद्वयं यावत् विषयेऽस्मिन् किमपि

न प्रणयामास। किञ्च, मिलवर्यस्य भारतवर्षतः प्रत्यावर्तनात्पूर्वमेव केरीवर्यः पञ्चत्वं प्राप्तः। श्रीरामपुरे तदीयोत्तरवर्तिनः प्रचारका विषयेऽस्मिन्नासन् वीतस्पृहाः, नैव प्रणीतवन्तस्ते संस्कृतकाव्यमेकमपि। अपरतः, कलिकाता-व्याप्टिस्ट-धर्मप्रचारकः श्रीउइलियम-इयेट्स-पादः स्वबान्धवेन श्री-जान्-ओयेङ्गार-वर्येण साकं केवलं *बाइबेल*-ग्रन्थस्य संस्कृतानुवादसंस्करणानां प्रकाशन एव व्यापृतोऽभवत्। किन्तु ताभ्यामपि प्रचारकाभ्यां खृष्टधर्माश्रितं नैव संस्कृतकाव्यमेकमपि विरचितम्।

संस्कृतखृष्टीयसाहित्ये बहुवत्सरं यावत् काव्यप्रणयनधारा स्तब्धासीत्। कोऽपि वैदेशिकस्तथा देशिकः खृष्टधर्मप्रचारकोऽन्यो वा विषयेऽस्मिन् स्वोत्साहं नैव प्रकटीचकार। एतादृश्यामवस्थायां श्री-उइलियम-केरी-वर्यस्य विद्यार्थी तथा श्री-मिलवर्यस्यानुरागी स्कटल्याण्डवास्तव्यः श्री-जान्-म्यूर-पाद आविर्भूतः। संस्कृतखृष्टीयसाहित्यस्य सर्वाधिककाव्यप्रणेतायं श्री-म्यूरः संस्कृतेन खृष्टधर्मप्रचाराय मिलापेक्षयाप्यधिकं तत्परो बभूव। न केवलं खृष्टीयसाहित्येऽपि तु प्राच्यविद्यायां तुलनात्मकेतिहासे दर्शने च तत्प्रणीतानि संस्कृतकाव्यानि संस्कृतग्रन्था वा तत्कृतित्वं निश्चप्रचं प्रमाणयन्ति। न्यूनातिन्यूनतयाष्टौ काव्यानि तेन प्रणीतानि संस्कृतेन खृष्टीयविषयमाश्रित्य। तानि काव्यानि भवन्ति –

क) *मतपरीक्षा* (प्र.सं. - १८३९, द्वि.सं. - १८४०, तृ.सं. १८५२-५४)

ख) *पापमोचनीययथार्थोपायप्रदर्शनम्* (१८४०)

ग) *शर्म्मपद्धतिः* (१८४१)

घ) *ईश्वरोक्तशास्त्रधारा* (१८४६)

ङ) *श्रीयेषूखृष्टमाहात्म्यम्* (१८४८)

च) *श्रीपौलचरित्रम्* (१८४८)

छ) *परमात्मस्तवः* (१८५३)

ज) *निस्तारमार्गदीपिका*[19]

झ) *श्रीविद्याचमत्कारिका*[20]

संस्कृतखृष्टीयसाहित्यस्य ध्वजाधारी म्यूरवर्यः प्राग्भवानां मिलादीनां भूरिशः प्रयासैः भृशमुपकृतो बभूव, यतस्तदानीं संस्कृतखृष्टीयसाहित्यस्य विविधा बिन्दवः पौनःपुण्येन परीक्षिता अभवन्; सर्वैश्च प्राग्भवैः कविभिर्विद्वद्भिः समालोचकैर्वा बहूनां खृष्टीयपारिभाषिकशब्दानां संस्कृतरूपाणि स्थिरीकृतानि पुस्तकेषु च प्रकाशितानि। तेन म्यूरवर्यस्य संस्कृतकाव्यानां भाषा सुतरां सरला प्राञ्जला सन्दिग्धपदवर्जिता च जाता। तथाहि निगदितं श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण –

"As the mantle-bearer, Muir was the beneficiary of the wisdom and technical skill acquired by Mill from the several trial-and-error experiments of the past. His works in Church Sanskrit were therefore construed more confidently, as if the connotations of the nomenclature on which they were based had by then standardized and was no longer tentative.[21]" इति।

परन्तु यत्र मिलपादस्य काव्यानां भाषासीद्भक्तिपूर्णा भावविह्वला समेषामपि धर्माणां समुपासकैश्च सुखपाठ्या, तत्र म्यूरपादस्य काव्यानां छन्दोमयी भाषा नैवासीत् तथा, अपि तु सासीद् भृशं वास्तवोचिता तर्कसापेक्षा स्वमस्तिष्कप्रसूता च। तेन तदानीं भारतवर्षे खृष्टीयमतानि खण्डयितुकामैः हिन्दुधर्मोपासकैः संस्कृतपण्डितैरपि संस्कृतकाव्यानि प्रणीतानि यत्र म्यूरमतानि तैर्निराकृतानि। एवं विविधाः खण्डनग्रन्थास्तस्मिन् समये खृष्टीयैस्तथा हिन्दुपण्डितैर्विरचिता इति म्यूरकाव्यानां बहवोऽध्येतारो बभूवुस्तदानीन्तने काल इति तु निश्चयेन प्रमाणीभवति। तथाह्याकूतं श्री-रिचार्ड-इयङ्ग-वर्येण –

---

[19] रचनाकालः प्रकाशनकालो वा नोल्लिखितोऽधिग्रन्थम्।

[20] ग्रन्थोऽयं न प्राप्तो मया, परन्तु श्री-रिचार्ड-फक्स-इयङ्ग-वर्येणोल्लिखितो म्यूरीयोऽयमिति तदीये *The Indian Christiad* इति ग्रन्थे। तेनाप्यस्य प्रकाशनकालो रचनाकालो वा न निर्दिष्टः।

[21] Ind. Christ., p. 77.

"…in contrast to Mill, whose matured Sanskrit was joyously and inoffensively devotional, Muir generated an abundance of material that could be elegantly metrical but was almost always thickly cerebral and, worse yet, argumentative. This era thus witnessed the revival of apologetics in Church Sanskrit.[22]" इति।

हेयलीवरी-नगरे इस्ट-इण्डिया-संस्थायाः प्रशिक्षणं गृहीत्वा अष्टाविंशत्युत्तराष्टादशशततमस्य (१८२८) संवत्सरस्य मध्यवर्तिनि समये कलिकातायाः फोर्ट-उइलियम-महाविद्यालयमागत्य म्यूरः इंलण्डे प्रारब्धां भाषाविषयिणीं प्रशासनसम्बन्धिनीं च शिक्षां पुनरग्रहीत्। तत्र च स प्रख्यातस्य भाषाविदुषः श्री-उइलियम-केरी-पादस्य सान्निध्यं प्राप्तवान्। अस्मिन्नेव समये संस्कृतखृष्टीयसाहित्यरचनायामुत्साहस्तस्य प्रथममजनीति मन्यते विद्वद्भिः। यतः श्री-मिल-पादानां *Proposed Version of Theological Terms* इति ग्रन्थस्तदानीं प्राकाश्यं नीतः, सर्वत्र बहुलतया प्रचलितश्च बभूव। किञ्च, मिलपादस्य *श्रीखृष्टसंगीता*याः प्रथमो भागोऽपि ततः कियन्मासाभ्यान्तर एव प्रकाशितो बभूव। अनयोर्ग्रन्थयोः प्रभावेण प्रभावितस्य म्यूरवर्यस्य संस्कृतं मानसं भारतवर्षे खृष्टधर्मप्रचाराय विस्ताराय च संस्कृतभाषाया महत्त्वं सम्यगवगतवत्।

किं बहुना, यावत्स भारतं न त्यक्तवान्, तावत् संस्कृतेनैव स्वीयं खृष्टसम्बन्धि मतं काव्याकारेण प्रस्तुतवान्, यस्य साक्षात्फलं भवति म्यूरप्रणीताः संस्कृतभाषानिबद्धा ग्रन्थाः। किञ्च, स्कटल्याण्डं प्रत्यागत्य यत्किमपि तेनालेखि, तत्सर्वमपि वैदेशिकभाषासु इत्येव विशेषः। विशेषतया तदानीं तेन *The Journal of the Royal Asiatic Society of Great Britain and Ireland* इति प्रख्यातायां पत्रिकायामाङ्गलगिरा प्रणीता बहवः वेदविषयकाः प्रबन्धाः प्रकाशिताः।

श्रीम्यूरवर्यस्य संस्कृतकाव्यकलापान् आङ्गलग्रन्थान् निबन्धान् वा समीक्ष्य तथा च भारते तदीयं सुदीर्घं शासनकालं पर्यालोच्य तद्दृष्टिभङ्गीविषय एतज्ज्ञातुं शक्यते यत् खृष्टप्रचारकेष्वग्रगण्योऽपि स नितान्तमेवाधुनिकः, संस्कारमनोविशिष्टः, सम्प्रसारणवादी चासीदिति। तथाहि स्पष्टं निगदितं तद्विषये श्री-रिचार्ड-वर्येण –

[22] Ind. Christ., p. 77.

"…Muir's outlook could be described as modernist, reformist, expansionist, and above all warmly evangelical, although officially neutral toward religion in matters pertaining to policy and the performance of public duties."[23] इति।

ब्रिटिश-राजस्य तत्त्वावधानानुसारं परिचालितस्य भारतवर्षस्य उत्तर-पश्चिम-प्रदेशानां (North-Western Provinces) बहुषु स्थानेषु कार्यव्यपदेशेन नियुक्त आसीन्म्यूरवर्यः। सप्तत्रिंशदुत्तराष्टादशशततमसंवत्सरतः (१८३७) द्विचत्वारिंशदुत्तराष्टादशशततमसंवत्सरपर्यन्तं (१८४२) यदा स मिराट-नगरे तथा च साहारानपुरनगरे कार्यनिरत आसीत्, तदानीमेव तेन संस्कृतभाषायां काव्यप्रणयनदाक्ष्यमर्जितमिति मन्यते। संस्कृतमतीत्य पार्सीभाषाया अपि ज्ञानं तस्यासीदिति निश्चप्रचं वक्तुमलं, यतस्तदानीं सर्वमपि सर्वकारीयकार्याणां प्रामाण्यपत्रादिकं तयैव पार्सीभाषया लिख्यते स्म। परन्तु संस्कृतमिवास्यां भाषायां न तु तथा तावकं किञ्चिदपि स्वारस्यमासीदित्यत्रापि न काचन संशीतिः।

उत्तरपश्चिमप्रदेशेषु यत्र यत्र म्यूरस्य कार्यनियुक्तिर्जाता, तत्र तत्रैव तेन स्वसदृशानां प्रशासकानां सान्निध्यं तथा साहाय्यं प्राप्तं ये खलु खृष्टीयमतप्रचाराय कृतनिश्चया आसन्निति हेतोस्तस्य लक्ष्यसिद्धिरपि सहजतराभवत्। तत्र विशेषतया द्वयोः प्रख्यातयोः प्रशासकयोर्नामास्मत्पुरतः समायाति, येषां म्यूरजीविते विशिष्टमवदानमासीदिति प्रमाणीभवति। तौ हि यथाक्रमेण एलाहावादस्य Sadr Board of Revenue - इत्यस्य सचिवः (Secretary) श्री-रवार्ट-मार्टिन्स-बार्ड-महोदयः (Robert Merttins Bird) तथा च उत्तरपश्चिमप्रदेशानां Lieutenant-Governor - इति पदमलङ्कुर्वाणो मुख्यः शासनकर्ता श्री-जेम्स-थमासन-वर्यः (James Thomason).

थमासन्-सम्प्रदायस्यान्यतमः सन्नपि श्रीम्यूरः स्वेच्छानुसारमेव संस्कृतभाषायां ज्ञानमाहर्तुं प्रयत्नमकार्षीत्, तयैव भाषया खृष्टमतप्रचारायापि मनश्चक्रे। संस्कृतज्ञानेन समं भारतीयसभ्यतायाः तथा च हिन्दुधर्मस्य विविधानां गूढदार्शनिकतत्त्वानामपि ज्ञानं तेनावाप्तम्। परन्तु इउरोपीयैतिह्यस्य खृष्टधर्मस्य वा प्राधान्यविषये तन्मतं पूर्वमिव दृढमासीत्। प्रभूतानां भारतीयभाषाणां विशेषतया

23 Ind. Christ., p. 78.

संस्कृतस्य प्रगाढज्ञानहेतोस्तेन तु सम्यगवबुद्धं यद्भारते खृष्टधर्मस्याधिकाधिकतया प्रचाराय प्रसाराय वा संस्कृतमेव प्रधानं माध्यमं भवितुं सर्वथा योग्यतममिति। तदर्थमस्या भाषायाः पठनपाठनादिविषये खृष्टीयधर्मप्रचारकैरितोऽप्यधिकतया प्रयत्नपरैर्भाव्यमित्यासीत्तदीया सुदृढा मतिः। तथाहि निगदितं स्वयमेव तेन –

"When the perfection of the Sanskrit language, its aptitude for the conveyance of every modification of thought and sentiment, the universal veneration with which it is regarded by the Hindus, the number of learned men by whom it is understood all over India, and the contempt in which they hold every other medium of written communication, together with the formidable obstruction which the influence of the Brahmans, *if not conciliated*, may offer to the improvement and Christianization of this country – when all these things are duly considered, it would appear that no laboured argumentation is necessary to prove that Sanskrit should be largely employed as an instrument for the diffusion of our faith."[24] इति।

श्रीमिलपादेन यथा संस्कृतं स्वायत्तीकृतं तथैव केचन खृष्टमतप्रचारकाः संस्कृतशिक्षां स्वीकृत्य सञ्जातव्युत्पत्तयः सन्तस्तयैव भाषया स्वप्रभोः येषूखृष्टस्य मतं सर्वत्र भारते प्रचारयेयुरिति म्यूरवर्येण पौनःपुण्येनावेदितम्। परन्तु तदानीं कोऽपि तादृशो वैदेशिको येषूसेवकः पुरतो नागतः। किञ्च, श्री-इयेट्स-ओयेङ्गार-पादौ पूर्वत एव श्रीयेषूखृष्टस्य पवित्रधर्मग्रन्थस्यानुवादकर्मणि व्यापृतावास्तामिति सर्वथा भग्नमनोरथो म्यूरः स्वकार्य एव मनो निवेशयामास।

त्रिपञ्चाशदधिकाष्टादशशततमे (१८५३) संवत्सरे श्रीम्यूरः कार्यान्निवृत्तः स्वदेशं स्कटल्याण्डं प्रति प्रतस्थे। तस्मिन्नेव वत्सरे श्री-जेम्स-थमासन-वर्योऽपि उत्तरपश्चिमप्रदेशानामध्यक्षपदं तत्याज। अद्यत्वे तु म्यूरवर्यस्य नाम सश्रद्धं स्मर्यते विशेषतस्तस्य विशालाकारविशिष्टस्य पञ्चखण्डोपेतस्य *Original Sanskrit Texts on the Origin and History of the People of India, Their*

[24] Muir, John. "On the Use to which the Pesudo Veda Written by the Roman Catholic Missionaries Might be Turned for the Refutation of Hindus Errors." *Calcutta Christian Observer*, vol. 7, 1838, pp. 506-507.

*Religion and Institutions* इत्याख्यस्य ग्रन्थस्य (रचनाकालः – १८६८-तः १८७३-मध्ये) निबन्धनहेतोः। भारतवर्षेऽतिवाहित एव समये तेन प्रायः समेषां स्वीयसंस्कृतग्रन्थानां रचना विहिता। यद्यपि तस्मिन् काले स भारते स्वस्य *मतपरीक्षा*ख्यस्य ग्रन्थस्य कृते ख्यात एवासीत्, परन्तु परवर्तिनि काले संस्कृतसाहित्येतिहासे तदीयं नाम न तथा प्रख्यातमभवत्। स्कटल्याण्डदेशस्य उच्चशिक्षायां म्यूरवर्यस्यावदानमनस्वीकार्यमासीत्। तेन एडिनवार्ग-विश्वविद्यालये (Edinburgh University) संस्कृतभाषाया विभागः संस्थापितो यत्र म्यूरजीवद्दशायां श्री-थिओडोर-औफ्रेक्ट-वर्येण (Theodore Aufrecht) श्री-जुलियास-एग्लिङ्ग-वर्येण (Julius Eggling) च क्रमेणाध्यक्ष्यं कृतम्।

अत्रायं विशेषो यन्म्यूरवर्यस्य जीविते भारतवर्षीयकालस्य विशिष्टः कश्चन प्रभावः समापतितस्तावकीनोत्तरजीवने। आदौ तु खृष्टधर्मस्य 'सत्यार्थी' आसीत् सः, किन्तु भारतीयदर्शनानां साहित्यानां सम्यगध्ययनेनावबोधेन चोत्तरजीवने (कार्यनिवृत्तेरनन्तरम्) स स्वकीयानां संस्कृतखृष्टीयकाव्यानां 'वेदविद्वान्' इवाभवदित्यामूलचूडं परिवर्तनं परिलक्ष्यते म्यूरजीवित इति काचन विशिष्टा दिक्।

## ३.२. सारस्वतजीवितम्

विविधशास्त्रनिष्णातानां विमलप्रतिभानशालिहृदयानां तत्रभवतां प्रख्यातप्राच्यतत्त्वज्ञानसमृद्धानां श्रीजान्-म्यूर-पादानां ज्ञानं कीदृग् गभीरं विशालं प्रशस्तञ्चासीदित्यत्र तत्प्रणीतानि काव्यप्रबन्धादिकान्येव साक्ष्यमावहन्तीति मन्नयः। दशमशतकस्य प्रख्यातसंस्कृतालङ्कारिकेण यायावरीयेण राजशेखरेण स्वकीयायाः *काव्यमीमांसा*याः चतुर्थाध्याये प्रतिभाया द्वैविध्यं निर्दिशता निगदितं –

'सा च द्विधा, कारयित्री भावयित्री च। कवेरुपकुर्वाणा कारयित्री। साऽपि त्रिविधा सहजाऽऽहार्यौपदेशिकी च। जन्मान्तरसंस्कारापेक्षिणी सहजा। जन्मसंस्कारयोनिराहार्या। मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी।... भावकस्योपकुर्वाणा भावयित्री।'[25] इति।

द्विविधयोरनयोः प्रतिभयोरसामान्याधारत्वेन जान्-म्यूर-वर्याणां विदुषां संसदि प्रकाश इत्यत्र नास्ति किञ्चिदपि चित्रम्। तथाह्यत्र सहृदयानां मनसि प्रश्नः समुदियाद्यत्कानि तावत्काव्यानि तेन कविना प्रणीतानि, यान्यधिकृत्य गवेषणाप्रबन्धरचनायां कश्चन व्रती भवतीति। अतः समेषामनुसन्धित्सूनां सहृदयहृदयानामवगतयेऽधस्तात्तावत् प्रदीयते श्रीम्यूरपादानां समग्रेऽपि जीविते रचितानां ग्रन्थानां काचित्तालिका –

### ३.२.१. संस्कृतकाव्यग्रन्थग्रामाः

१. *पापमोचनीययथार्थोपायप्रदर्शनम्* – *The Inefficacy of the Ganges to Wash away Sin, With a Statement of the True Atonement*, Baptist Mission Press, Calcutta, 1840.

२. *ईश्वरोक्तशास्त्रधारा* – *The Course of Divine Revelation; A Brief Outline of the Communication of God's Will to Man and of the Evidences and Doctrines of Christianity with Allusions to Hindu Tenets*, Baptist Mission Press, Calcutta, 1846.

३. *श्रीयेषूखृष्टमाहात्म्यम्* – *The Glory of Jesus Christ; A Brief Account of Our Lord's Life and Doctrines*, Ostell and Lepage, 1848.

[25] का. मी., पृ. १२.

४. *श्रीपौलचरित्रम् (श्रीयेशूखृष्टप्रेरितपौलचरित्रम्) – A Short Life of the Apostle Paul with a Summary of Christian Doctrines as Unfolded in His Epistles*, Encyclopaedia Press, 1849.

५. *मतपरीक्षा – भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः, An Examination of Religions; Containing a Consideration of the Hindu Sastras*, Orphan Press, Mirzapore, 1852 (1st Ed. 1939).

*मतपरीक्षा – ख्रिस्तीयमतप्रदर्शनात्मको द्वितीयः खण्डः* – Examination of Religions; Being an Exposition of the Evidences of Christianity for Hindus, Bishop's College Press, Calcutta, 1854.

६. *निस्तारमार्गदीपिका – A Light for the Way of Salvation.* प्रकाशनकालोऽनुल्लिखितः (पाण्डुलिप्याकारेण समवाप्तो ग्रन्थोऽयम्)।

७. *नूत्नोदन्तोदोत्सः – The Fountain of Water of Fresh Intelligence: A Description of England*, Bishop's College Press, Calcutta, 1839.

८. *शर्म्मपद्धतिः – The Way of True Happiness: A Sketch of the True Theory of Human Life*, Richard Watts, London, 1841.

९. *परमात्मस्तवः – A Christian Hymn in Sanskrit Verse and Hindee Prose*, Allahabad Mission Press, Allahabad, 1853.

१०. *मानसधर्मदीपिका* – 1840.

११. *श्रीविद्याचमत्कारिका*[26] – प्रकाशनकालोऽनुल्लिखितः।

---

26 यद्यपि श्री-रिचार्ड-फक्स-इयङ्ग-वर्येणास्य ग्रन्थस्य जान्-म्यूरीय-कृतित्वेनोल्लेखो विहितः स्वीये *The Indian Christiad* इत्याख्ये ग्रन्थे, तथापि बहवन्वेषणं कृत्वाप्यस्यावाप्तिर्न सम्भवाभवदिति हेतोरधिग्रन्थं किंविषयः पर्यालोचित इति वक्तुं न शक्यते। तथापि इयङ्ग-वर्यीयमतमाश्रित्यास्य संस्कृतखृष्टीयसाहित्येऽन्तर्भावो विधीयत इति ज्ञेयम्।

१२. *इतिहासदीपिका – A Sketch of the History of India*[27], Bishop's College Press, Calcutta, 1840. [Based on H.H. Wilson's Manual of History and Chronology.]

१३. *व्यवहारालोकः – Brief Lectures on Mental Philosophy and Other Subjects delivered in Sanskrit to the Students of the Benares Sanskrit College with an Address to the Pandits and Students*, Presbyterian Mission Press, Allahabad, 1845.

### ३.२.२. आङ्गलग्रन्थग्रामाः

1. *A Brief Examination of Prevalent Opinions on the Inspiration of the Scriptures of the Old and New Testaments*, Longman, Green, Longman and Roberts, London, 1861.
2. *Additional moral and religious Passages metrically rendered from the Sanskrit. With exact prose translations*. London, 1875.
3. *An Essay on Conciliation in Matters of Religion, and on the Proper Adaption of Instruction to the Character of the Persons Taught, with Some Application of the Subject of Missionary Proceedings*, Calcutta, 1849.
4. *Considerations on Religion, Its Nature, Effects, the Steps of Its Progress, and the Obstacles to its Practice; Addressed to the Cultivated Classes of Society.* Edinburgh, R. Grant, 1842.
5. *Further metrical translations from the Mahabharata on government, war, and miscellaneous, with The story of Savitri. And two short metrical translations from the Greek.* 1880.

---

[27] अस्य ग्रन्थस्य प्रथमतोऽध्यायचतुष्टयमादायादौ कविना *इतिहासतमोमणिः* इति नाम्ना कश्चन ग्रन्थ आलिखितः। परवर्तिनि काले पञ्चममध्यायं विरचय्य पुनः परिवर्धितं संस्करणमस्य प्रकाशितं, यस्य नाम तेन *इतिहासदीपिका* इति प्रदत्तम्।

6. *Further Metrical Translations, with Prose Versions from the Mahabharata. And Two Short Metrical Translations from the Greek*, 1880.
7. *Hymn to Zeus, by Cleanthes, the Stoic philosopher. Freely translated from the Greek*, London, 1875.
8. *India as Represented in the Hymns of the Rigveda: A Metrical Sketch*, Edinburgh: T. Constable, 1868.
9. *Indra as represented in the Hymns of the Rigveda. A metrical sketch*. Edinburgh: T. Constable, 1868.
10. *Metrical Translations from Sanskrit Writers with an Introduction, Prose Versions and Parallel Passages from Classical Authors*, Trubner & Co., London, 1879.
11. *Miscellaneous extracts metrically and freely translated, ...from the Mahābhārata*. Edinburgh, 1877.
12. *Moralizings on human life with some metrical translations from the Sanskrit*. Edinburgh, 1874.
13. *Notes of a Trip to Kedarnath and Other Parts of the Snowy Range of the Himalayas in the Autumn of 1853 with Some Account of a Journey from Agra to Bombay by Way of Ajunta, Ellora and Carlee in 1854*, Thomas Constable, Edinburgh, 1855.
14. *Original Sanskrit Texts on the Origin and History of the People of India, Their Religion & Institution* (5 Vols.), Trubner & Co., London, 1868-1873.
15. *Passages ancient and modern from the story of India &c. &c.* Calcutta : Printed at the Church Mission Press, 1833.
16. *Reasons for the Establishment of a Sanskrit Chair in the University of Edinburgh*, Thomas Constable & Co., Edinburgh, 1860.
17. *Religious and Moral Sentiments Metrically Rendered from Sanskrit Writers; with an Introduction and an Appendix Containing Exact Translation in Prose*, Williams & Norgate, London, 1875.

18. *Remarks on the conduct of missionary operations in Northern India, and on the training of missionary agents*. Cape Town, 1852.
19. *Some account of the recent progress of Sanskrit studies*. Edinburgh: Royal Society of Edinburgh, 1863.
20. *The Importance of Missionaries Studying the Higher Branches of Hindu Literature and the Sanskrit Language*, 1838.
21. *The Importance of the Study of Sanskrit*, 1838.
22. *The Indian Civil Service and the Scottish Universities: or, the new system of appointment considered, as it affects the prospects of Scottish students and the higher education in Scotland*, Edinburgh, 1855.
23. *The Oriental Studies*, Calcutta, Ghosha and Brothers, 1878.

### ३.२.३. प्रबन्धनिचयाः

1. "Conciliation in Matters of Religion." *Church of England Quarterly Review*, vol. 24, 1843, pp. 86-112.
2. "Contribution to a Knowledge of the Vedic Theogony and Mythology." *The Journal of the Royal Asiatic Society of Great Britain and Ireland*, New Series, vol. 1, no. 1/2, 1865, pp. 51-140.
3. "Contribution to a Knowledge of the Vedic Theogony and Mythology. No. II." *The Journal of the Royal Asiatic Society of Great Britain and Ireland*, New Series, vol. 2, no. 1, 1866, pp. 1-25.
4. "Does Vaiśeshika Philosophy Acknowledge a Deity, or Not?" *The Journal of the Asiatic Society of Great Britain and Ireland*, vol. 20, 1863, pp. 22-30.
5. "Dr. Mill's Christa Sangita—Book IV." *Christian Intelligencer*, vol. 8, 1838, pp. 180-182.
6. "Importance of the Study of Sanskrit." *The Calcutta Christian Observer*, vol. 7, 1838, pp. 372-373.

7. "India's Resurrection." Poetry in *The Calcutta Christian Observer*, vol. 5, July 1836, pp. 360-361.
8. "Legends Chiefly from the Śatapatha Brāhmana." *The Journal of the Asiatic Society of Great Britain and Ireland*, vol. 20, 1863, pp. 31-48.
9. "Miscellaneous hymns from the Rig and Atharva Vedas." *The Journal of the Asiatic Society of Great Britain and Ireland*, New Series, vol. 2, no. 1, 1866, pp. 26-43.
10. "On 'Manu', the Progenitor of the Aryyan Indians, as Represented in the Hymns of the Rigveda." *Journal of the Royal Asiatic Society of Great Britain and Ireland*, vol. 20, 1863, pp. 406-430.
11. "On Learned Missionaries." *The Missionary* [Calcutta], vol. 2, 1852, pp. 155-156.
12. "On the Interpretation of the Veda." *The Journal of the Royal Asiatic Society of Great Britain and Ireland*, New Series, vol. 2, no. 2, 1866, p. 303-402.
13. "On the Relations of the Priests to the other Classes of Indian Society in the Vedic Age." *The Journal of the Asiatic Society of Great Britain and Ireland*, New Series, vol. 2, no. 2, 1866, pp. 257-302.
14. "On the Use to Which the Pesudo Vedas Written by the Roman Catholic Missionaries Might Be Turned for the Refutation of Hindu Errors." *Calcutta Christian Observer*, vol. 7, 1838, pp. 506-508.
15. "Progress of the Vedic Religion towards Abstract Conceptions of the Deity." *The Journal of the Asiatic Society of Great Britain and Ireland*, New Series, vol. 1, no. 1/2, 1865, pp. 339-391.
16. "Sanskrit Texts, Appendix" (Volume made up with nine papers, mainly based on 'Veda' published in the *Journal of Royal Asiatic Society of Great Britain and Ireland* in 1862, 1865, 1866).
17. "School-Book Society for the Western Provinces." *The Calcutta Christian Observer*, vol. 6, April 1837, pp. 184-185.

18. “St. Paul a Model for the Missionary.” *The Calcutta Christian Observer*, vol. 7, March 1838, pp. 63-78.

19. “The Baconian Philosophy applicable to the mental regeneration of India.” *The Calcutta Christian Observer*, vol. 7, March 1838, pp. 123-126.

20. “The Claims of Sungskrit [sic], etc., on the Attention of the Friends of Education.” *Friend of India* (weekly series), vol. 3, 1837, p. 188.

21. “The Importance of Missionaries Studying the Higher Branches of Hindu Literature and the Sanskrit Language.” *Christian Intelligencer*, vol. 8, 1838, pp. 376-377.

22. “Verses from the Sarva-Darśana-Sangraha, the Vishnu Purāna, and the Rāmāyana, Illustrating the Tenets of the Chārvākas, or Indian Materialists, with Some Remarks on Freedom of Speculation in Ancient India.” *The Journal of the Asiatic Society of Great Britain and Ireland*, vol. 19, 1862, pp. 299-314.

23. “Yama and the Doctrine of a Future Life, According to the Rig-, Yajur-, and Atharva-Vedas.” *The Journal of the Asiatic Society of Great Britain and Ireland*, New Series, vol. 1, no. 1/2, 1865, pp. 287-315.

इति

समाप्तस्तृतीयोऽध्यायः।

श्रीपौलचरित्रं ॥

# A SHORT LIFE

OF

# THE APOSTLE PAUL,

WITH

A SUMMARY OF CHRISTIAN DOCTRINE, AS UNFOLDED IN HIS EPISTLES.

**In Sanskrit Verse.**

WITH AN ENGLISH VERSION AND BENGALEE AND HINDEE TRANSLATIONS.

BIBLIOTHECA BODLEIANA

CALCUTTA:

W. H. HAYCOCK, BISHOP'S COLLEGE PRESS.

1850.

# चतुर्थोऽध्यायः

।। *श्रीपौलचरित्रम्* -

जान्-म्यूर-प्रणीतं महाकाव्यम् ।।

# ।। *श्रीपौलचरित्रम्* – जान्-म्यूर-प्रणीतं महाकाव्यम् ।।

महामोक्तुः श्रीयेषूखृष्टस्य परमशिष्यस्य श्रीपौलस्य जीवितचरितादिवर्णनपरं प्रख्यातप्राध्यापकैः श्रीजान्म्यूरवर्यैर्विरचितमिदं *श्रीपौलचरित्रम्* (इतः परं श्री. पौ. च. इत्येवं प्रकारेणास्योल्लेखः) इति दशाध्यायान्वितं महाकाव्यं संस्कृतखृष्टीयसाहित्यस्य सुतरामेवोज्ज्वलमेकं ग्रन्थरत्नम्। काव्यस्यास्य *श्रीयेषूखृष्टप्रेरितपौलचरित्रम्* इत्यपरं नामापि कविना काव्यान्तिमे प्रदत्तम्। श्रीयेष्वश्चतुर्षु मौलिभूतेषु शिष्येषु श्रीशौलः (परं पौलनाम्ना ख्यातः) प्रभोर्दर्शनमवाप्य बहु कष्टं सहमानोऽपि खृष्टधर्ममाश्रित्य देशेषु तथा विदेशेषु तद्धर्मप्रचाराय प्राणपातमकार्षीत् तथा च खृष्टीयमतानि सर्वत्र प्रचारयामास इत्येतत्सर्वमत्र काशितं कविना। साधारणतया महाकाव्येऽध्यायाः 'सर्ग'नाम्नैव कथ्यन्त इति तावत् संस्कृतालङ्कारिकाणां मतम्। परन्त्वस्मिन् खलु सर्गाः 'अध्याय'-पदेन निरुक्ताः। दशसु अध्यायेषु सन्ति साकल्येन एकोनविंशत्यधिकनवशतसंख्यकाः (९१९) श्लोकाः। समग्रेऽस्मिन्महाकाव्ये विद्यमानानामध्यायानां नामानि तथा तदनुसारञ्च तेषां श्लोकसंख्याः क्रमशोऽधस्तान्निर्दिश्यन्ते –

| अध्यायः | अध्यायनाम | श्लोकसंख्या |
|---|---|---|
| प्रथमः | *श्रीयेषूखृष्टहन्तृयहूदीयलोकपरावृत्तिः* | १२९ |
| द्वितीयः | *श्रीपौलपुनर्जन्म* | ६२ |
| तृतीयः | *पौलप्रथमयात्राकथनम्* | ६८ |
| चतुर्थः | *पौलद्वितीययात्राकथनम्* | ११९ |
| पञ्चमः | *पौलतृतीययात्राकथनम्* | ८४ |
| षष्ठः | *पौलस्य कारालयनिवासः* | १५३ |
| सप्तमः | *पौलस्य रोमागमनम्* | ७७ |
| अष्टमः | *पौलकृतभक्त्यादिवर्णनम्* | ६६ |
| नवमः | *पौलप्रतिपादितखृष्टीयमतसंक्षेपः* | २०८ |
| दशमः | *शेषोपदेशः* | १९ |
| दशाध्यायाः | | साकल्येन – ९१९ |

## ४.१. हस्ताधिगतं संस्करणम्

श्री. पौ. च. इति महाकाव्यस्य यत्खलु संस्करणं मद्धस्तभूतमभवत्, यदुपजीव्य च मया गवेषणाप्रबन्धस्यास्याध्ययनं तथा प्रणयनं प्रवृत्तं, तद्धि कोलकाता-स्थितस्य 'Bishop's College Press' इत्यतः पञ्चाशदुत्तराष्टादशशततमे (१८५०) खृष्टाब्दे W.H. Haycock - महोदयेन प्रकाशितम्। परमस्य मुद्रणं तु कोलकातायाः 'Encyclopædia Press' – इत्यतो जातम्। अत्र प्रत्येकं श्लोकस्य हिन्दी-बङ्ग-भाषानुवादाभ्यां समं ग्रन्थस्यादावेव समग्रस्यास्य काव्यस्य प्रत्यध्यायं प्रतिश्लोकञ्च स्वयमेव महाकविनाङ्गलभाषायां विरचितोऽनुवादोऽपि विद्यमानोऽवलोक्यते। हिन्दीभाषानुवादकस्य तथा बङ्गभाषानुवादकस्य नाम यथाक्रमेण सम्माननीयः डब्ल्यु.एच्.पारकिन्स-वर्यः (W.H. Perkins) तथा श्रद्धेयः कृष्णमोहनव्यानार्जी-वर्यः (Krishna Mohan Banerjea) च। अस्य ग्रन्थस्य प्रथमं संस्करणं कोलकातातः 'Encyclopædia Press' – इत्यतः प्रकाशितम् अष्टाचत्वारिंशदुत्तराष्टादशशततमे (१८४८) खृष्टाब्दे। ततश्चास्य बहूनि संस्करणानि प्रकाशितानि। आद्यसंस्करणे ग्रन्थस्य शीर्षकमासीत् *श्रीपौलचरित्रम्* इति। परन्तु परवर्तिषु संस्करणेष्वस्य पूर्वोक्तनाम्ना साकं *श्रीयेषूखृष्टप्रेरितपौलचरित्रमि*त्यपि नाम दृग्गोचरीभवति।

## ४.२. महाकाव्यस्य विषयवस्तु

प्रख्यातप्राच्यतत्त्वविदा प्रणीतस्यास्य महाकाव्यस्य विषयस्तु प्राधान्येन श्रीपौलस्य पूतजीविते संघटितवृत्तजातानि तथा तेन श्रीयेषूशिष्येण समासतः प्रतिपादितानि खृष्टीयमतानि। जगतो यो हि गुरुः, यः किल बान्धवः, यस्तावन्मोक्ता यश्च प्रभुस्तस्य श्रीयेष्वः प्रचारितधर्मस्य प्रसिद्धये नियुक्तानां प्रभुशिष्याणां मध्येऽन्यतमः पौलाख्यः शिष्यो विदेशेषु प्रभोर्यशः केन प्रकारेण वितस्तारेत्येव विषयो नितरामेव सुललितेन वचोविन्यासेन विन्यस्तोऽत्र कविना। खृष्टीयमतप्रचारसम्बन्धिनि विषयेऽस्मिन्ननवहितानां जनानां ज्ञानविवृद्धये तथा च श्रीखृष्टस्य प्रधानभूतेषु शिष्येष्वन्यतमेन श्रीपौलेन खृष्टधर्मस्य समग्रेऽपि विश्वे कथम्प्रकारः प्रचारो विहित इति प्रदर्शयितुमेव कवेरयं प्रयास इति मन्मतिः।

### ४.२.१. प्रत्यध्यायं सारः

क) *श्रीयेषूखृष्टहन्तृयहूदीयलोकपरावृत्तिः* – प्रथमोऽध्यायः

महाकविना म्यूरपादेन महाकाव्यस्यास्य प्रथमाध्यायस्य प्रदत्तेनानेन नाम्ना स्पष्टमेतत्प्रतीयते यत् श्रीयेषूखृष्टस्य हत्याकारिणां यहूदीयलोकानां खृष्टधर्माश्रयवृत्तमेवात्र वर्णितमिति। आदावेव शिष्येणानुरुद्धो गुरुः खृष्टधर्मस्य विस्तारवृत्तान्तं वर्णयितुमुद्यतः खृष्टधर्मस्य प्रचाराय प्रसाराय च नियुक्तानां शिष्याणां चरित्राणि वर्णयामास। तत्रापि प्रभोः श्रीयेष्वः यशोगाथां विदेशेषु यो वितस्तार, तस्य पौलाख्यस्य शिष्यस्य चरितवर्णनपरमिदं काव्यम्। प्रभोः स्वर्गारोहणाद् दशसु दिवसेषु व्यतीतेषु पवित्रात्मा शिष्यस्वान्तेष्ववातरत्। तेनाद्भुतां शक्तिमवाप्य ते स्वदेशे विदेशेषु च प्रभोः वाणीमेव प्रचारयामासुस्तत्तद्देशीयभाषाभिः। तदुक्तानां गिरामर्थमजानन्तो लोका मदं पीत्वा प्रलपन्ति स्म। तदा शिष्येष्वग्रगण्यः पेत्रनामकः कश्चन तद्दिव्योदन्तहेतुमबोधयत्।

पेत्रवाचं निशम्य यिरूशलेम्पुरस्था जनाः स्वीयं महात्रातृबधात्मकं महापातकं स्वीकृत्य श्रीखृष्टनाम्ना जलसंस्कृतिं प्रापुः। आजन्मनः पङ्गुं जनमेकं स्पर्शमात्रेण सुस्थीकृत्य पेत्रो नितरामेवाश्चर्यकर्म चकार। प्रभोः शिष्याभ्यां पेत्रयोहन्निभ्यां लोकानामुदेशनं कृतमित्याकर्ण्य कुपिताः प्रधानयज्वानस्तौ कारायामबन्धयन्। सभायां यदा तावानीतौ तदा तेजःपूर्ववचसा प्रभोर्हत्यारूपस्यान्यायस्य प्रतिवादं कुर्वतोस्तयोः साहसं दृष्ट्वा केवलं तर्जयित्वैव व्यमोचयन्। एवं पेत्रादयः मुख्यशिष्या आश्चर्यकर्माणि बहूनि जनसमक्षं प्रदर्शयामासुः प्रभोर्मुखपङ्कजनिःसृतां वाणीं च सर्वत्र प्रचारयामासुः। तेन पुनः कारारुद्धास्ते दैवप्रभावान्मुक्ताः सन्तः सर्वान् जनान् आश्चर्यचकितान् कृतवन्तः। एवं क्रमशो न केवलं साधारणा जनाः, अपि तु यज्वानः सुभूरयोऽपि श्रीयेष्वो मतमाश्रयन्।

अध्यायस्यान्तिमे दिव्यशक्तिमतः साधोः स्तिफनस्य महाद्भुतकर्मणां वर्णनां प्रदाय कविस्तस्य विशालप्रस्तराघातेन हननदृश्यमपि वर्णयन् स्तिफनस्यान्तिमवाक्यानि नितरामेव सरलया गिरा समुपस्थापयामास। तथाहि महात्रातारं प्रभुं श्रीयेषूखृष्टमुद्दिश्य सुतरामेव विनम्रवचसा प्रार्थयामास स्तिफनः –

"मुमूर्षुश्चाप्यसौ भक्तो महाविश्वासपूरितः।

प्रभो येषूर्ममात्मानं त्वं गृहाणेत्थमार्थयत्।।

उच्चैश्चोवाच शान्तात्मा प्रभो मन्मारणात्मकं।

इमं मा तिष्ठिपो दोषमेषु मद्घातकेष्विति।।"[28] इति।

ततश्च स्वदेशे विदेशेषु च विकीर्णानां प्रभोर्वार्तां सर्वत्र प्रचारकृतां खृष्टसेवकानां वर्णना प्रदत्ता। इत्थं प्रेरितेत्याख्यातानां श्रीयेष्वो मुख्यानुयायिनां सदुपदेशेन सुतरां समाकृष्टाः सुभूरयो यहूदिनोऽपि महात्रातुः श्रीखृष्टस्य धर्ममतं स्वीचक्रुः।

ख) *श्रीपौलपुनर्जन्म* – द्वितीयोध्यायः

अध्यायेऽस्मिन् यः खलु महोत्साहः प्रेरितः प्रभुशिष्यः खृष्टधर्मं विदेशेषु व्यस्तृणोत्तस्य श्रीपौलस्य चरित्रं वर्णितं कविना। आदावस्य शौल इति नामासीत्। अयञ्च यहूदीयान्वयोत्पन्नः प्रसिद्धस्य कस्यचिद्गुरोः सकाशात् मोसिशास्त्रीयज्ञानमवाप्य स्वकीयं पैतृकं धर्मं परया निष्ठया प्रचारयामास। किञ्च येषूप्रवर्तितधर्मविरोधी सन् स प्रभोरन्यतममुख्यशिष्यस्य स्तिफनस्याश्माघातहनने सहकारी अप्यभवत्। किं बहुना, खृष्टस्य विदेशेषु स्थितान् शिष्यान् धर्तुं स दमस्काख्यां पुरीमपीयाय। अकस्मात् पथि सूर्यौजसोऽप्यधिकदीप्तेन तेजसा पातितः स येष्वो वाणीमशृणोत्। प्रचण्डज्योतिषा दिवसत्रयं यावद् दृष्टिरहितः स तन्नगरे प्रभोर्निदेशेन समागतं येषूशिष्यम् अननीयाभिधं साक्षात्कृतवान्। तस्मिन् करार्पणं कृत्वाननीयः प्रभोर्वाणीमुवाच –

"तुभ्यं दृष्टिप्रदानाय पवित्रात्मार्पणाय च।

हे भ्रातः पथि यो येषूस्त्वया दृष्टः स माऽनुदत्।।"[29] इति।

पूर्वमविवेकादिमलरुद्धान्तरेक्षणः स शौलः खृष्टप्रसादेन पुनराप्तदृष्टिः येषूखृष्टस्य माहात्म्यप्रचाराय प्रयत्नवानभूत्। खृष्टधर्मस्य प्रचाराय नियुक्ताय शौलायाननीयः प्रभोरुद्देश्यमवोचत्। अत कविराह –

---

[28] श्री. पौ. च., पृ. १४.

[29] तत्रैव, पृ. १८.

"मनुष्याः सर्वदेशीया येन धीदृशष्टिमाप्नुयुः।

तमःपतेर्बलाद् मुक्ताः सेवेरंश्च परेश्वरं।।

पवित्रीभूतलोकानामारोहेयुश्च सत्पदम्।

इत्येतत्सर्वसिद्ध्यर्थं प्रभुणा प्रेरयिष्यसे।।"[30] इति।

ततश्च जलसंस्कारमाप्य प्रविष्टयेषूशिष्यगणः स भक्त्या येष्व ईशपुत्रत्वमुपदेष्टुं प्रचक्रमे। परन्तु श्रीखृष्टस्यादेशेन प्रभोः शिष्याणां साहाय्येन तार्षाभिधां स्वजन्मभूमिं समागतो यतः यिरूशलेम्पुरस्था जनास्तद्वाचं साक्ष्यत्वेन न जगृहुः। तदनु कतिपयेभ्यो वर्षेभ्यः पश्चात्तमन्वेष्टुं तस्यां पुर्यां समुपस्थितः बर्णबनामा कश्चन शिष्यः। स तं शौलमानयामास अन्त्यखीयाभिधं कञ्चम देशम्। तत्र च सभासु तौ वत्सरमेकं यावत् खृष्टस्य मतं सर्वान् तत्रत्यान् लोकान् शिक्षयामासतुः।

ग) *पौलप्रथमयात्राकथनम्* – तृतीयोऽध्यायः

पुरा प्रभोः श्रीयेष्वो वैरी तच्छिष्याणां च यो बाधको बभूव, स एवाधुना प्रभोर्मुख्यशिष्यत्वेन वृतः सन् खृष्टीयधर्मं विस्तर्तुं प्रायतिष्ट। अस्मिन्नध्याये कविना गुरुमुखेन तस्यैव प्रेरितस्य पौलापरनाम्नः शौलस्य विविधेषु विदेशेषु प्रथमयात्रावृत्तान्तो विवृतः। पवित्रेणात्मनादिष्टौ शौलबर्णबौ प्रथमं नावाब्धेस्तीरमेत्य कुप्राभिधं द्वीपं समागतौ। तस्यैव द्वीपस्य प्रसिद्धे पाफनामके नगरे सर्ग्यपौलाख्यः कश्चन रौम्याध्यक्षस्तयोः सकाशादैशं सद्वाक्यं श्रोतुमियेष। तदा तत्रैव सन्निधौ मायाविनं यहूदिनं बर्येषूनामानमेकं दृष्ट्वा पौलस्तमन्धीकृत्य दण्डं ददौ। तेन नितरामेव चकितचकितः स रौम्याध्यक्षस्तच्छिष्याभ्यामादिष्टं खृष्टीयमतं सानन्दमग्रहीत्। तदारभ्य एव शौलः पौलनाम्ना सुविख्यातो जातः।

क्रमश उदीच्याम् आस्याख्यं देशखण्डमागत्य ततो यावनम् अन्त्यखीयाख्यं पुरमाययुः ते सर्वे पौलपुरस्कृताः खृष्टसेवकाः। तत्र पवित्रे शनिवासरे भजनालये सभाध्यक्षैः प्रार्थितः स पौलः

---

[30] श्री. पौ. च., पृ. १९.

सर्वानुद्दिश्य प्रभोरुपदेशानुवाच। परस्मिन्नपि दिवसे सदुपदेशश्रवणाय पौरान् सर्वान् समागतान् वीक्ष्य नितरामेवैर्ष्यान्विताः यहूद्याः पौलवाक्यानि दूषयितुं चिचेष्टिरे। तेनातुष्टास्ते सबर्णबं पौलं तत्पुरान्निरकासयन्। तदनु इकन्याख्यां पुरीमागत्य तौ भक्त्या प्रभोर्नाम कीर्तयितुं प्रावर्तेताम्। तत्रापि यवनैर्मिलिता यहूदिनो यदा तौ हन्तुं समकल्पयन्, तदा तौ ततोऽपि पलायितौ, समायातौ च लुस्त्राख्यं पुरम्। तत्र कञ्चन जन्मपङ्गुजनं चलच्छक्तिं प्रदाय तौ बर्णबपौलौ यथाक्रमं जु-नाम्ना हर्मि-नाम्ना च ख्यातौ जातौ।

पुरान्तरात्केचन दुष्टा यहूदिनोऽकस्मादेत्य पाषाणखण्डैर्भृशं पौलं प्राहारयन्। प्रबलाघातेन भूमौ पतितं तं जीवच्छक्तिशून्यं मत्वा पुराद्बहिर्नीतवन्तः। परन्तु प्रभोरीशस्याशिषा समेषां समक्षमुत्थितः स तत्पुरीमेव पुनः प्रविवेश। ततश्च तौ खृष्टसेवकानां रक्षायै प्रत्येकं मण्डल्यां शासनाय अध्यक्षान् नियोज्य समुद्रतीरमागत्य नावमारुह्य पुनः अन्त्यखीयाख्यां पुरीं समायातौ इत्यत्रैव प्रथमयात्रायाः समाप्तिः।

घ) *पौलद्वितीययात्राकथनम्* – चतुर्थोऽध्यायः

सीलाभिधं कञ्चन शिष्यं सङ्गीकृत्य पौलोऽनेकाः पुरीः पर्यव्रजत्। स्वप्ने दैवप्रबोधनं प्राप्याब्धिमार्गेण माकदन्यां प्रतस्थिरे पौलादयः खृष्टसेवकाः। तत्र फिलिप्पाख्यां मुख्यां नगरीमागत्य येष्वस्त्राणसुसंवादं भक्तिपूर्णेन वचसा सदाकीर्तयन्। एकदा भूतावेशाविष्टा काचन यवनी दासी पौलादीननुगच्छन्ती ‘परेशसेवका एते त्राणमार्गं वदन्ति नः’[31] इति यदा पौनःपुण्येनौच्चैर्ननाद, तदा क्लिष्टः स पौलः तस्या अन्तः प्रविष्टं भूतं बहिरानीतवान् येषूनामादेशेन। परन्तु तया दास्या तत्रत्यानां प्रभुवर्गाणां धनप्राप्तिर्भवतीति स्म, परन्तु तद्विनाशे साम्प्रतं तन्न भवेदिति हेतोस्तन्नाथाः पौलं सीलं च धृत्वा बलपूर्वमाकृष्य वेत्रप्रहारेण कारायां निक्षेपयामासुः। रात्रौ हठादेव प्रचण्डेन भूकम्पनेन काराद्वारः समुद्घाटितः। एवं दैववृत्तजातेन सुविस्मितः कारापालः सकुटुम्बः नीरसंस्कारं प्राप्य खृष्टधर्मं स्वीचकार।

---

[31] श्री. पौ. च., पृ. ३१.

ततः थस्सलनीक्याख्यां यावनीं पुरीमेत्य पौलस्तत्रत्यानुपादिशत्। यवना भूयांसः खृष्टीयं मतं प्रत्यासक्ता भवन्ति स्म, तदा केचन यहूदिनोऽसूयावशात् तस्मिन् पुरे कोलाहलं कृत्वा पौलादीन् धर्तुं चिचेष्टिरे। विपक्षैर्दुष्टैर्जनिते कलहे तत्र स्थातुमसमर्थास्ते तदा बरैयाख्यां पुरीं गताः। ततश्च प्रख्यातां नगरीमथेनीनामिकामाजगाम पौलः। अस्याः प्रसिद्धौ कविराह –

"असौ पुरी तु विज्ञानां नानाशास्त्रविदां प्रसूः।

विद्याया राजधानीव यवनैः सममन्यत।।"[32] इति।

अत्र एकतो यथा अपिकूराख्यपण्डितस्य लघुचेतसा अनुयायिनः सुखस्य परमार्थत्वं स्वीचक्रुस्तथैवापरतः स्तयिकस्यानुयायिभिः सुखं तुच्छं ज्ञात्वा धर्मस्य महिमैव ख्यापितः। पौलो यहूदिनां भजनालये हट्टे मार्गे सर्वत्रैव एभिः साकं समभाषत। केचन विपश्चितो येषूमाहात्म्यं प्रकाशयन्तं तं पौलमाक्रामन्, केचिच्च तमुपाहसिषुः। अन्यतः, नूत्नार्थजिज्ञासवोऽथेनीयाः पौलोदितां वार्तामपूर्वां श्रोतुं पौलमामन्त्रयामासुः। पौलोऽपि प्रभोर्येष्वो माहात्म्यं प्रकाशयन्नुवाच –

"परेशो जगतः स्रष्टा मेदिनीस्वर्गयोः प्रभुः।

अनन्तो नरसृष्टेषु मन्दिरेषु न तिष्ठति।।

स्वयं जीवस्य सर्वेभ्यः प्रदाता पालकश्च सन्।

स न प्रजाकृतां सेवां स्वसुखार्थमपेक्षते।।

सर्वान् नरान्वयान् मूलाद् एकस्मात् प्रजनय्य सः।

तत्तद्देशं च निर्णीय सर्वत्रोर्व्यामवासयत्।।"[33] इति।

---

32 श्री. पौ. च., पृ. ३५.

33 तत्रैव, पृ. ३७.

ततो द्वयोः समुद्रयोर्मध्ये स्थितां करिन्थाख्यां विश्रुतां पुरीं पौलः समागमत्। तत्रापि श्रीयेष्वो महिमानमकीर्तयत्सः। परन्तु स्वपाण्डित्याभिमानिनो यवनाः सर्वां पौलोच्चारितां कथां मूर्खप्रलापमिवामंसत। केवलं क्रिष्पाख्यो भजनागारपतिर्येषूमतमग्रहीत्। करिन्थीया भूरयश्च देवपूजां त्यक्त्वा खृष्टीयमतमाश्रित्य जलसंस्कारं स्वीचक्रुः। क्रमेण तस्यां पुर्यां पौलेन रोपितं खृष्टीयं मतं चतुर्षु दिक्षु व्यकीर्यत। ये खलु प्रवासिनो लोकास्तन्मतमाश्रयन्, ते स्वं स्वं देशं गत्वा खृष्टस्य वार्तां वितस्तरुः। अन्तिमे ततः प्रस्थितः पूर्वस्यां दिशि स्थितमासाख्यखण्डं समाजगाम सः। ततश्च यिरूशलेम्पुर्यां स्थित्वा यात्रान्तेऽन्त्यखीयाख्यां पुरीमुपतस्थे इत्यत्रैव पौलस्य द्वितीययात्रा समाप्तिं गता।

ङ) *पौलतृतीययात्राकथनम्* – पञ्चमोऽध्यायः

अन्त्यखीयदेशात्पौल आस्याख्यां पुरीं प्राप्य तत्रत्यान् शिष्यानुपदेशदानेन धर्ममार्गे स्थिरीकृत्य इफिषानगरमाजगाम। तत्र भजनालये क्वचित्क्वचिद्वा पाठशालायां वत्सरत्रयं व्याप्य वाक्यमैशं तेन प्रचारितम्। ततः परमेश्वरात् महाद्भुतां शक्तिमवाप्य चमत्कारीणि बहूनि कर्माणि लोकसमक्षमदर्शयत्। तस्मिन्नेव नगरे अर्तमी-नाम्नीं काञ्चिद्देवीं तत्रत्या जना अपूजयन्। तस्या देव्या विशाले भव्ये मन्दिरे भूयस्यः प्रतिमूर्तयोऽप्यासन्। पौलो यतो हि मूर्तिपूजाविरोधी आसीत्, तदर्थं रूप्यशिल्पिनस्तं प्रत्यत्यन्तं क्रुद्धा अभवन्। तदा द्वौ पौलसङ्गिनौ धृत्वा राजसंसदि पौराः संययुः। वाक्यविचक्षणः पुराध्यक्षोऽपि सपार्षदान् रूप्यकारान् धर्माधिकरणं गन्तुमादिश्य विसृष्टवान् सभालयात्। कलहे निवृत्ते तत्र स्थातुमनिच्छुकः पौलः मकदन्याख्यं पुरं पुनराययौ। तत्र सर्वत्र खृष्टीयं मतमुपदिश्य करिन्थं पुरमागच्छत् सशिष्यः। मासान् त्रीन् तत्र संस्थाप्य पुनः सङ्गिभिः समम् आस्यां गन्तुमकल्पयत्। तस्यां नगर्यां त्रोया-नाम्नि जनपदे कस्मिंश्चित् रविवासरे शिष्यान् उपादिशत्। ततोऽब्धितटस्थितां मिलेताख्यां पुरीमागत्य तत्रत्यशिष्यमण्डल्या ज्येष्ठान् स्वान्तिकमाहूय सुतरामेव प्रेमसम्पृक्तेन वचसा सत्प्रभोर्येष्वः सेवायां सदा सर्वे यथा रताः स्युरित्यादेशं प्रायच्छत्। ततो यिरूशलेम्पुरप्रयाणाय स्थिरसंकल्पः स पौलः सर्वैरपि निषिद्धोऽपि प्रभुकर्मणि वीतभयः सन् कतिपयैः सखिभिः सह प्रतस्थे। तथाहि गुरुमुखेन कविना यदुक्तं तदिहानुसन्धेयम् –

"यिरूशलेम्पुरे वन्दिर्भवितुं हि प्रभोः कृते।

वरं स्वजीवनं त्यक्तुमुद्यतोऽस्मीति बोधत।।"[34] इति।

च) *पौलस्य कारालयनिवासः* – षष्ठोऽध्यायः

अध्यायेऽस्मिन् पौलः श्रीयेषूखृष्टहन्तॄणां राजधान्यां यिरूशलेम्पुरे किं किमकरोत्, कानि च दुःखान्यभुङ्क्त इत्येतत्सर्वं वर्णितमालक्ष्यते। यवनानपुण्यान् मन्दिरान्तः समानीय पूततमं स्थानमपुण्यं चकारायं पौल इति दोषेण तत्रत्यो रौम्यश्चमूपतिस्तमाकृष्य दुर्गान्तर्निनाय। यहूदिन्या निजदेशीयवाण्या यदा स 'किंत्वीशस्य समा दृष्टिर्यहूदिष्वितरेषु च'[35] इत्यप्रियां वाचमुवाच, तदा सर्वे यहूदिनस्तं हन्तमुद्यता अभवन्। पदातिभिः प्रहाराय बध्यमानः पौलः सभायां यदानीतस्तदा स स्वनिर्दोषत्वसिद्ध्यर्थं किमपि वक्तुं प्रचक्रमे। परन्तु परमो यज्वा पार्श्वस्थान् जनान् चपेटाघातेन पौलमाहतेत्यादिशदन्याय्यम्। तदा तत्र सभायां सादूक्य-फरीष्य-सम्प्रदाययोर्मध्ये महान् कोलाहलः समजनि। स्वविपक्षविरोधनात् फरीष्याणां केचन पौलपक्षमाश्रयामासुः। इत्थं तस्मात्स्थानात् पौलमुद्धार्य शीघ्रमेव दुर्गान्तरनाययत् चमूपतिः। परन्तु पौलशोणितपिपासवो यहूदिनः प्रतिज्ञाबद्धा अभवन्, यत् –

"पौलं यावद् न हन्याम तावद् भक्ष्यं कदापि न।

अद्याम न च पानीयं पिवेमेति पणान्विता।।"[36] इति।

---

[34] श्री. पौ. च., पृ. ५०.

[35] तत्रैव, पृ. ५४.

[36] तत्रैव, पृ. ५७.

चमूपतिर्वार्तामेतामाकर्ण्य त्वरितमेव तद्रक्षार्थं यिरूशलेम्पुरात् प्रायस्त्रिंशत्क्रोशान्तरे स्थितां कैसरैयाख्यां पुरीं प्रेषयामास पौलम्। पञ्चभ्यो दिवसेभ्यः पश्चात् समागते मुख्ययज्वनि सोऽभियोगिनां मतानि खण्डनपुरःसरं स्वनिर्दोषतां प्रमाणीचकार।

वर्षद्वयात्परं फेस्ताख्यः कश्चन महाजनस्तत्रत्येन सम्राजा शासनाय नियोजितः। परन्तु यहूदिनां पक्षपातिनस्तस्य प्राड्विवाकस्य विचारेणासन्तुष्टः पौलः 'मद्विषये सम्राट् स्वयमाज्ञां ददात्विति'[37] प्रार्थयामास। तदा यहूदिनां भूपालो बभूव अग्रिप्पनामकः कश्चन महाजनः। तस्य समक्षं पौल-फेस्तयोर्वादानुवादे समापन्ने राजा प्रधानाश्च समुत्थायावोचन् यत् क्रियां कामपि दण्डार्हामयं न कृतवानिति। अन्तिमेऽकारणं वत्सरद्वयं यावत् काराबद्धं कृत्वा रोमापुरीं तं प्रेषयितुमकल्पयत् फेस्त इत्यत्रैव समाप्तिमेति षष्ठोऽध्यायः।

छ) *पौलस्य रोमागमनम्* – सप्तमोऽध्यायः

रोमादेशेऽवस्थानावसरे श्रीपौलस्य जीविते यद्यद्वृत्तं संघटितं तत्सर्वम् अध्यायेऽस्मिन् वर्णितं कविवरैः। तत्र शरत्काले वन्दिभिरन्यैः साकं यदा स पोतेन क्रेताख्यं द्वीपं गच्छन्नासीत्, तदा वात्यान्वितमृतुं दृष्ट्वाब्धिवर्त्मना गमनं नोचितमिति निश्चिन्वानः सैन्यनायकं वारितवान्। परन्तु तद्वाक्यं न श्रुत्वा यदा स सैन्याध्यक्षस्ततः प्रस्थितस्तदाचिरमेव पश्चात् प्रचण्डोऽनिलः पोतं महता वेगेन वहन् सागरं नीतवान्। चतुर्दशाहानि यावत् क्षुब्धमहोदधौ भ्राम्यमानः स पोतोऽन्तिमे मिलिताख्यस्य द्वीपस्य समीपमागतः। तदा तद्द्वीपवासिनो लोकाः दुर्दशां तेषां दृष्ट्वा तान् सत्कृत्य त्वरया अग्निं प्राज्वलयन् शीतलत्वहेतोः। अकस्मात् केनचित् सर्पेण पौलस्य करो दष्टोऽभवत्, किन्तु येष्वाशिषा तस्य किमपि न जातम्। चमत्कारेतमालक्ष्य तत्रत्या जनास्तस्मिन् देवोऽयमिति बुद्धिमकुर्वत। तत्रैव पुब्लियाख्यस्य द्वीपशासितुः सद्मनि तत्पितरं ज्वरग्रस्तं वीक्ष्य पौलः परमेश्वरं प्रार्थ्य रोगात्तं विमोचयामास। मासत्रयं यावत्तत्र स्थित्वा समुद्रमार्गेण स ईताली-देशमादौ भ्रमित्वान्ते रौम्यराजधानीं महापुरीं रोमां समागतः।

---

[37] श्री. पौ. च., पृ. ६१.

रोमायां स पौल आप्रातः सायंकालपर्यन्तं येष्वो वार्तामुपादिशत्। केचन तद्वचो विशश्वसुः, केचित्पुनः सम्मतिं न प्रददुः। वत्सरद्वयं यावत् स स्वस्यैव निकेतने वन्दिर्भूत्वा तस्थौ। येषूखृष्टस्य धर्मविस्ताराय च सर्वैः सह समालपत्। तेनापरेऽपि शिष्यास्तस्य सहिष्णुतां दृष्ट्वा स्वधर्मस्य प्रचारणे साहसमत्यन्तं प्रापुः।

रोमापुरे निवसन्नेव इफिषादिनिवासिनां शिष्याणामुपदेशाय तिस्रो लिपीरालिलेख पौलः। अध्यायस्यान्तिमे वयं पश्यामो यत् शिष्यो गुरुं पृच्छति यत् सम्राट् कं निर्णयं चक्रे पौलविषये इति। तदा गुरुणोच्यते यद्यस्मिन् धर्मीयग्रन्थे पौलस्य चरित्रं वर्णितमस्ति, तत्र रोमायां पौलस्योपस्थितेः परं किमपि न लिखितमस्तीति। परन्तु वत्सरद्वयात्परं स कारागाराद्विमुक्तः सन् देशान्तरं व्रजन् खृष्टीयं मतं विस्तर्तुमैहतेत्यनुमातुं शक्यते इति गुरोर्मतमित्यत्रैव समाप्तिर्भवति सप्तमाध्यायस्य।

ज) *पौलकृतभक्त्यादिवर्णनम्* – अष्टमोऽध्यायः

जगत्त्रातारं भगवन्तं श्रीयेषूं प्रति पौलस्यापारा भक्तिरेवास्मिन्नध्याये प्रकाश्यते कविना। विशेषतया प्रभोर्मतप्रचाराय तेन स्वीकृतानि निन्दादुःखादीनीह वर्णितानि, येषां विषये पौलेन स्वयं फिलिप्पीयान् प्रति प्रेरितेषु पत्रेषु समुल्लेखो विहितः। सजातीयैर्विजातीयैर्वा विपक्षीयैर्वारं वारं बाधितः स प्रभोर्नामप्रचारान्न न्यवर्तत। सर्वलोकमान्योऽपि स दुर्जनैस्तिरस्कृतः, कारासु पाशबद्धः सन् ताडितः, परन्तु प्रभोः कृते व्यथां भुक्त्वापि सौख्यममन्यत, निन्दां स्वीकृत्यापि श्लाघामबुध्यत।

यहूदीयैः पञ्चकृत्वः कशया ताडितः, वेत्रैस्त्रिः प्रहृतः, अश्मभिश्च सकृन्मारितः स पौलः। वने समुद्रे पुरे सर्वत्रैव संकटैर्वेष्टितः स क्लमं श्रमं क्षुधां तृष्णां शीतं नग्नत्वम् अनिद्रत्वम् उपाषणं च भुक्तवान्। प्रभोरेव शक्त्या बलीकृतः स दुर्दशां सर्वविधां सेहे। तदुदीरितं तेन –

“यस्यां यस्यामवस्थायामहं वर्त्तेय कर्ह्यपि।

सदा तयैव सन्तुष्टः स्थातुं संशिक्षितोऽभवम्।।

शक्नोमि दीनतां भोक्तुं भोक्तुं शक्नोमि चाढ्यतां।

सर्वं कर्तुं समर्थोऽस्मि प्रभोः शक्त्या दृढीकृतः।।”[38] इति।

विविधेषु प्रदेशेषु कष्टमत्यन्तं सहमानोऽपि स प्रभोर्यशः कीर्तयित्वा रोमापुरीं पुनरराययौ। प्रभुशिष्यविरोधिभिः रौमीयैः पुनः स धृतः दोषरहितोऽपि कारायां राजाज्ञयाबध्यत। यद्यपि तस्य मृत्युवर्णना कस्मिन् खृष्टीयशास्त्रे प्राप्तुं न शक्यते, तथाप्यनुमातुमलं यत् प्राड्विवाकेन विनिर्णीतो वधोचितः स मारयाञ्चक्रे इति। तीमथ्यं प्रति लिखिते द्वितीयपत्रे स्वमरणसम्भावनाविषये पौलेन स्वयं सम्भावितमित्यालक्ष्यते। अध्यायस्यान्तिमे प्रभुं प्रत्यकुण्ठां भक्तिं प्रकाशयता पौलेन निगदितं यत् –

“असौ दुष्कर्मणः कृत्स्नाद् मामुद्धृत्य महाप्रभुः।

स्वराज्यं नेष्यति स्वर्ग्यं, नमस्तस्मै सनातनं।।”[39] इति।

झ) *पौलप्रतिपादितखृष्टीयमतसंक्षेपः* – नवमोऽध्यायः

अध्यायेऽस्मिन् पौलेन प्रदत्तो धर्मोपदेशः कविना नितरामेव प्राञ्जलगिरा समुपन्यस्तः। धार्मिकस्य रक्षार्थं स्वप्राणान् यः खलु उत्सृजेत्, तादृशो महोदारो जनः प्रायः लोके न दृश्यते। परन्तु खृष्टः पापिनां कृते स्वयं मृत्युं स्वीचकार, सधनीकृत्यास्मान् स्वयं निर्धनोऽभवत्। स्वबुद्धिप्रकल्पितं ज्ञानं निस्ताराय कदापि न कल्पते, तत्तु केवलं मूर्खतामात्रत्वेनैव ईश्वरस्य सकाशे प्रतीयते। तथाह्याह कविः –

---

[38] श्री. पौ. च., पृ. ३९.

[39] तत्रैव, पृ. ८३.

"क्व ज्ञानी क्व च शास्त्रज्ञः क्व विवादी च लौकिकः।

परेशो लौकिकं ज्ञानं मूर्खत्वीकृतवान् न किं।।"[40] इति।

पृथ्वामस्यां समेषां मनुष्याणां कृत एव परमेश्वरस्य मङ्गलावहोऽनुग्रहो वरीवर्ति। तदादेशेनैव वयं लौकिकान् सर्वान् कामान् परित्यज्य धर्ममाचरेम। अतो यावत्कोऽपि स्वीयशक्त्या खृष्टमनादृत्य सद्धर्मं कर्तुं चेष्टते, तावत्स व्यर्थो भवतीति गुरोर्मतम्। अपरतो यः खलु मुक्तिप्रदातारं श्रीयेषूं विश्वासेनावलम्बते, स नूनमेव पूततमात्मनः शक्त्याङ्घसो विमुच्यते।

किं बहुना, पौलेन पारलौकिकी सिद्धिरपि सम्यगिह प्रकाशिता। वस्तुतः खृष्टस्यानुग्रहात्कोऽपि वियोजयितुमस्मान् न समर्थः। परमेश्वरो यस्य साहाय्यं विदधाति, तस्य विरोधनं कर्तुं कः शक्नुयात्? परन्तु केचन करिन्थीयाः शिष्या भ्रान्ताः सन्तः मृतानां पुनरुत्थानं न सम्भवेदित्यमंसत। तदर्थं पौलः शिष्याणां तेषामुद्दिधीर्षया भव्यं पुनरुत्थानमसाधयत्। स्वयं येषूरपि नः पापकृते मृतोऽपि पुनरुत्थितः सन् बहुभिर्लोकैरदर्शि। अतो मृतानां पुनरुत्थितिविषये शङ्का न कार्या। तस्मादुदीरितं कविना पौलवचसा –

"अन्यच्च यद् भुवः शस्यं गौधूमाद्युद्भविष्यति।

तद्वस्तु न स्वयं किन्तु केवलं बीजमुप्यते।।

यथेच्छमीश्वरो रूपं बीजजन्याय यच्छति।

एकैकबीजजन्यानि भिन्नरूपाणि कल्पयन्।।

तथैव ज्ञायतां भव्या मृतानां पुनरुत्थितिः।

उप्यन्ते नश्वराः सन्तः प्रोत्थास्यन्त्यविनाशिनः।।

उप्यन्ते तेजसा हीनाः प्रोत्थास्यन्ति महौजसः।

---

[40] श्री. पौ. च., पृ. ९०.

उप्यन्ते निर्बलाः सन्तः प्रोत्थास्यन्ति सशक्तयः।।

उप्यन्ते प्राणिकाकाराः प्रोत्थास्यन्त्यात्मिकास्तनौ।।"[41] इति।

खृष्टीयाः संसारे वसन्त एव परलोकस्यापेक्षां कर्तुमर्हन्ति। परन्तु तदर्थं तैः ऐहिकेष्वर्थेषु लोभो न कार्यः। पत्नी यथा पत्युः कथां शृणुयात्, तथैव तत्पतिरपि सदा स्वपत्न्यां प्रीयेत। बालको यथा पितुराज्ञां भजेत्, तथैव पितापि स्वपुत्रं न रोषयेत्। दासो यथा स्वामिन आदेशं पालयेत्, तथैव स्वामी अपि दासं प्रति कदाप्यन्याय्यं नाचरेत्। वस्तुतस्तु बाह्यकर्मणा कदापि न तुष्यति परेश्वरः, चित्तस्य सर्वथा शुद्धिमपेक्षते प्रभुरीशः।

स्वस्यैव केवलं शर्मणश्चिन्ता न कर्तव्या नरैः सदा, अन्येषां हितायैव कार्यं कार्यं मुदा नूनम्। एवमेव सर्वभक्षको यथा नैवाभक्षकं तिरस्कुर्यात्, तथैवाभक्षकोऽपि कदापि न दूषयेत् समस्तभक्षकम्। तथाहि सानन्दः सदा तिष्ठन् प्रभुं प्रार्थयेत निरन्तरम्। चिन्तापीडितो न भूत्वा धन्यवादज्ञापनपुरःसरं स्वीयानि प्रार्थनीयानि सर्वाण्येव परमेश्वराय निवेदयेत्सदा। इत्थं त्राणाप्तेरुपायं धर्मसिद्धेश्च साधनं स्वपत्रेषु व्यक्तीकुर्वता श्रीपौलेन खृष्टीयमतानि समासेनास्मिन्नध्याये सुष्ठु प्रतिपादितानि।

ञ) *शेषोपदेशः* – दशमोऽध्यायः

गुरूपदेशेन श्रीपौलजीवनस्याखिलो वृत्तान्तः तेनोक्तोपदेशश्च समासेन श्रुतः शिष्येण। श्रीयेषूं प्रति भक्तिमटलां ज्ञात्वा भृशं प्रसन्नः स पौलं पौनःपुण्येन नमश्चकार। परन्तु पौलस्य निश्चला भक्तिः शिष्येणापि सर्वथानुकरणीयेति गुरोर्मतम्। खृष्टार्थमैहिकीं हानिं स्वीकृत्य सर्वमन्यन्मुदा त्यक्तव्यम्। दुष्टैर्भृशं पीडितोऽपि यद्वत्पौलः प्रभोः कृते सर्वं सेहे, तद्वच्छिष्येणापि पीडितेनापि निश्चलेन भाव्यम्। पवित्रः खृष्टप्रेमानलो यथा पौलचेतसि सदाज्वलत्, तथैव शिष्यचित्तेऽपि तदर्चिः सर्वदा दीप्यतामिति गुरोर्वाञ्छा। खृष्टसेवापरायणो यथा पौलः स्वार्थमत्यजत्तथैव प्रभुसेवायां शिष्येणापि सर्वविधं स्वार्थं भौमं सुखञ्च त्यक्त्वा येषूणा प्रदर्शिते धर्माध्वनि सदा प्रयातव्यम्। श्रीयेषूरेव मर्त्यानां केवलस्त्रातेति जानन् शिष्यः कदापि स्वीयां दृष्टिं न तस्माद्विमुखीकुर्यात्। अन्तिमे च गुरुर्वक्ति यत्

---

[41] श्री. पौ. च., पृ. ९८.

परमेश्वरस्य वरेण्यमनुग्रहं ये तिरस्कुर्युस्तेषु कृतघ्नेष्ववश्यमैश्वरः कोपानलः पतेदिति *पौलचरित्रे* शेषोपदेशः। अत्रैव समाप्तिं याति *श्रीयेषूखृष्टप्रेरितपौलचरित्रम्* इति महाकाव्यम्।

### ४.३. अन्वर्थसंज्ञात्वम्

श्रीम्यूरपादैः प्रणीतस्यास्य श्री. पौ. च. इति महाकाव्यस्याभिधाद्वयं सम्पूर्णग्रन्थस्य सूक्ष्मेक्षिकयावेक्षणादस्माकं नयनयोः पान्थायते। तानि च नामानि यथा –

क) *श्रीपौलचरित्रम्* – काव्यस्यास्यादौ नामकरणपृष्ठे तथा चतुर्थे पञ्चमे अष्टमे नवमे दशमे चाध्याये नामैतदस्माभिरालक्ष्यते। श्रीयुक्तः पौलः श्रीपौल इति शाकपार्थिवादिवत्समासः, ततस्तस्य चरित्रमिति षष्ठीतत्पुरुषसमासे *श्रीपौलचरित्रम्* इति पदं निष्पन्नम्।

ख) *श्रीयेषूखृष्टप्रेरितपौलचरित्रम्* – महाकाव्यस्यास्यान्तिमेऽस्माभिरेतन्नाम दृश्यते। तत्र मुद्रितमस्ति – 'समाप्तश्चेदं श्रीयेषूखृष्टप्रेरितपौलचरित्रं'[42] इति। श्रीयुक्तः येषूखृष्टः श्रीयेषूखृष्ट इति शाकपार्थिवादिवत्समासः। श्रीयेषूखृष्टेन प्रेरितः श्रीयेषूखृष्टप्रेरित इति तृतीयातत्पुरुषः। ततश्च श्रीयेषूखृष्टप्रेरितः पौल इति कर्मधारयः। तस्य (श्रीयेषूखृष्टप्रेरितपौलस्य) चरित्रमिति षष्ठीसमासे *श्रीयेषूखृष्टप्रेरितपौलचरित्रम्* इति समस्तं पदं निष्पद्यते।

व्याकरणदिशा नितरामेव सङ्गतेयं संज्ञा विशेषतया काव्यस्यास्य प्रधानचरित्रस्य श्रीपौलस्य श्रीयेषूखृष्टप्रेरितत्वं सूचयति येन परमकारुणिकस्य भगवत ईश्वरपुत्रस्य श्रीयेषूखृष्टस्य यथा प्राधान्यं प्रकाश्यते, सममेव श्रीपौलस्यापि दैवत्वं स्फुटीभवति तस्य धराधाम्नि श्रीयेष्वा एव प्रेरितत्वादित्यत्र न कश्चित्सन्देहावसरः।

अत्र श्रयतीति व्युत्पत्त्या श्रि-धातोः क्विपि दीर्घे च श्रीः इति रूपम्। लक्ष्मीः, शोभा, सम्पत्तिः, विभूतिः, प्रभा, कीर्तिः, मतिः, वृद्धिः, सिद्धिः, त्रिवर्गः, अधिकारश्चेत्यादयोऽर्थाः श्रीशब्दस्य भवितुमर्हन्ति। अपि च, देवादीनां नाम्नः प्राक् श्रीशब्दस्य प्रयोग एव शास्त्रसम्मतः। यथा –

---

[42] श्री. पौ. च., पृ. १०८.

"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।

सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत्।।"[43] इति।

चर्-धातोः *अर्त्तिलूधूसूखनसहचर इत्रः* (पा. सू., ३.२.१८४) इति सूत्रेण इत्र-प्रत्यये चरित्रेति रूपम्। स्वभावे चेष्टिते व्रतकर्माद्यनुष्ठाने लीलादौ च प्रयुज्यते पदमिदम्। अतः श्रीपौलस्य स्वभावं चेष्टितं तथा लीलां प्रद्योतयति महाकाव्यमद इत्यत्र नास्ति काचित्संशीतिः।

महाकाव्यं लक्षयता विश्वनाथेन *साहित्यदर्पणस्य* षष्ठेऽध्याये सुस्पष्टतया महाकाव्यस्य नामकरणविषये व्यक्तीकृतं तावत्स्वमतम् –

'कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।'[44] इति।

अत्र लक्षणस्थं वृत्तपदं वर्णयता प्रख्यातबङ्गीयटीकाकृता श्रीहरिदाससिद्धान्तवागीशेन *साहित्यदर्पणस्य* 'कुसुमप्रतिमा'ख्यायां टीकायामाटीकितं यत् –

'अनयोर्वंशचरितशब्दपर्य्यन्तव्यवहारे तु वृत्तनामत्वम्।'[45] इति।

तथाह्यत्र म्यूरविरचिते काव्येऽपि नायकस्य श्रीपौलस्य चरितमाश्रित्यैवास्य नामकरणं खलु विहितं कविना। तेन श्रीयेषूप्रेरितपौलस्यापारा तथा जगन्मोहिनी प्रख्यातिश्चतुर्षु दिक्षु यथा सूचिता भवेत्तथा चाज्ञातखृष्टवृत्तान्तानां समेषां मनुजनूनामनुसन्धित्सुर्दृष्टिर्यथास्मिन् समापतेदित्याकाङ्क्षमाणेन महाकविना जान्म्यूरवर्येण प्रभोः श्रीयेष्वोऽन्यतममुख्यशिष्यस्य श्रीपौलस्य जीवनं तथा चरित्रमाधारीकृत्य प्रणीतस्यास्य महाकाव्यस्यान्वर्थं तथा गर्भितार्थप्रकाशकं

---

43 *शब्दकल्पद्रुमे* श्रीशब्दस्य व्याख्यायां राघवभट्टकृतात् *संस्कारतत्त्वाख्य*ग्रन्थाद् उद्धृतोऽयं श्लोकः।

44 सा. द. (हरिदास.), ६.३०२

45 तत्रैव, वृत्तौ

नाम प्रादायि *श्रीपौलचरित्रम्* इति *श्रीयेशूखृष्टप्रेरितपौलचरित्रम्* इति वा मामकः सुनिश्चितो राद्धान्तः।

## ४.४. आलङ्कारिकदृष्ट्या महाकाव्यत्वविश्लेषणम्

जगत्प्रभोः प्रधानशिष्यस्य श्रीपौलस्य जीवनं तथा तच्चरितमाहात्म्यं वर्णयितुकामेन कविना श्रीजान्म्यूरपादेनालेखि श्री. पौ. च. इत्याख्यं काव्यमनन्यं दशभिरध्यायैः। अधुनास्य काव्यस्य संस्कृतालङ्कारिकदिशा महाकाव्यत्वविचारो विधीयते। तदर्थमादावेव महाकाव्यस्य लक्षणमस्माभिः ज्ञेयम्। यद्यप्यालङ्कारिकाणामेतेषां मतं सदैव मिथः साम्यं नैवोपैति, तथापीह प्रकृतकाव्यस्य महाकाव्यत्वं प्रतिष्ठापयितुमनेकेषामेव संस्कृतालङ्कारिकाणां लक्षणानि परीक्षितानि। तथाहि महाकाव्यविषयकमेकैकं तत्त्वमुपजीव्यात्र विधीयते समासेनालोचना –

### ४.४.१. सर्गबन्धत्वम्

महाकाव्यस्यान्यतमेषु वैशिष्ट्येष्वादावेव सर्गबन्धत्वमुररीकृतम्। प्रायः सर्वेषामेवालङ्कारिकाणां मतानि नैव भिद्यन्ते विषयेऽस्मिन्। तथाहि प्रख्याततीकाकृता हरिदाससिद्धान्तवागीशेन *साहित्यदर्पणस्य कुसुमप्रतिमा*ख्यायां टीकायां ‘सर्गबन्धो महाकाव्यमि’ति बिन्दुं वर्णयतोदितं यत् –

“सर्गैरन्ते सर्गशब्दोपस्थापिताध्यायैः बन्धो रसवत्पद्यसमूहविन्यासो

विन्यस्तरसवत्पद्यसमूह इत्यर्थः महाकाव्यम्।”[46] इति।

सर्गैर्निबध्यमानत्वात् तस्य सर्गबन्धत्वं विद्वद्भिः स्वीक्रियते। परन्त्वत्रास्मिन् काव्येऽस्माभिर्दृश्यते यत् सर्गशब्देन परिच्छेदा नैव विभक्ता इति। ते तु ‘अध्याय’पदेन द्योतिताः। अतः कविना तु नैवानुसृतमत्रालङ्कारिकाणां वचनम्। सर्गान्ते भाविसर्गस्य कथायाः सूचनमूलकं महाकाव्यवैशिष्ट्यमप्यधिग्रन्थं कविना नितान्तं रम्यशैल्या प्रतिपादितम्।

---

[46] सा. द. (हरिदास.), पृ. ४२४.

अत्रेदं प्रसङ्गसङ्गत्यावश्यं वक्तव्यं यदाधुनिकसंस्कृतसाहित्ये बहुत्रैवोल्लङ्घितोऽयं नियमः। यथा - ‘रक्ताक्तहिमालयमि’ति महाकाव्यं शिखरैः, ‘नारायणस्वामिचरितमि’ति महाकाव्यम् अलङ्कारैः, ‘भारतीयस्वातन्त्र्योदयमि’ति च महाकाव्यं पर्वभिर्विभक्तम्। तस्मादिह खल्वाधुनिकतायाः स्पर्शः सुतरामेव स्पष्ट इत्यवधेयम्।

### ४.४.२. इतिवृत्तम्

इतिहासोद्भवं वृत्तमेव महाकाव्यस्य विषयो भवेदित्यालङ्कारिकाणां मतम्। रामायणमहाभारतपुराणादयः खलु इतिहासपदवाच्याः। अतस्तद्वृत्तान्ता एव महाकाव्यस्य विषयत्वेनाचिताः प्रायः सर्वैरेव लौकिकसंस्कृतकविभिः। परन्तु साधुजनानां चरितान्याश्रित्य विरचितानि काव्यान्यपि महाकाव्यत्वसंज्ञामाप्तुमर्हन्तीति केचित्। यथा, अश्वघोषादिकवेः *बुद्धचरिता*देर्वृत्तं तु सम्पूर्णतया लौकिकसज्जनाश्रितम्। तदुच्यते हरिदासेन ‘कुसुमप्रतिमायाम्’ –

‘अन्यदितिहासोद्भवभिन्नं सज्जनाश्रयं साधुजनचरित्रविषयं वृत्तम्।’[47] इति।

अतः खृष्टधर्मप्रवक्तुर्जगदीशस्य श्रीखृष्टस्य मुख्यभूतेषु शिष्येषु चतुर्ष्वन्यतमस्य श्रीपौलाख्यस्य धर्मतत्त्वप्रवक्तुर्जीवितमुपजीव्य प्रणीतमिदं कविकर्माप्यवश्यमेव महाकाव्यान्तर्गतं भवितुमर्हति। तथाह्याहाग्निपुराणे –

‘इतिहासकथोद्भूतमितरद्वा सदाश्रयमि’[48]ति।

### ४.४.३. नायकः

महाकाव्यस्य नायकविषये यद्यपि भामह-दण्डि-भोजादिभिरालङ्कारिकैः स्पष्टतया किमपि न निगदितं, तथापि विश्वनाथेन तस्य धीरोदात्तत्वं मुक्तकण्ठेनोद्घोषितम्। तथाह्युच्यते तेन दर्पणे –

---

47 सा. द. (हरिदास.), पृ. ४२३.

48 अग्नि. पु., ३३७.२५.

"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।

सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।

एकवंशभवा भूपाः कुलजा बहवोऽपि वा।"[49] इति।

प्रकृते महाकाव्ये तु नायकः श्रीपौलः। सोऽवश्यं सद्वंशजातो धीरोदात्तगुणोपेतः सुरस्वभावतुल्यश्च। परन्तु न स क्षत्रियो न वैकवंशभवो भूपतिः कश्चित्। अत आलङ्कारिकसम्मतेषु नायकगुणेषु सद्वंशजातत्वं धीरोदात्तगुणोपेतत्वं तथा सुरस्वभावोपेतत्वं च तस्मिन् श्रीपौले विद्यत इति तस्य नायकत्वं कथञ्चित् सिध्यत्येव। अत्र तु वक्तव्यमेतदस्ति यत् साम्प्रतं विरच्यमानानामाधुनिककाव्यानां नाट्यानां वा मध्ये प्रादुर्भूता ह्येका धारा यत्र भगवदवतारास्तथा सिद्धसाधका नायकत्वेन वृता भवन्तीति। यथा रामकृष्ण-विवेकानन्द-तुकाराम-चैतन्यादीनां महाप्रभूणां चरित्राण्युपजीव्य नैकानि काव्यानि प्रणीतानि कविवर्यैरनेकैः।

### ४.४.४. रसतत्त्वम्

महाकाव्ये शृङ्गार-वीर-शान्तानामेकोऽङ्गिरसत्वेन कविना प्रयोक्तव्य इति तावन्मतिः आलङ्कारिकाणाम्। अन्ये सर्वेऽपि रसा अङ्गरसत्वेनेह प्रतिपादयितुं शक्यन्ते। अत्रापि कविना श्रीपौलजीवितं वक्तुमुद्यतेन स्वाभाविकतया शान्तरसस्यैवाङ्गिरसत्वेन व्यवहारो विहितः। तथा च, करुणरसस्याङ्गत्वं त्वत्र स्फुटमेव। तथाहि महाकाव्यस्य षष्ठेऽध्याये श्रीपौलस्य कारालयनिवासवर्णनावसरे तु नितरामेव करुणरसोद्भावकवाण्या कविना तद्वर्णनमकारि। सहृदयहृदयास्त्वस्य करुणार्द्रान्तःकरणेन पाठेन परमानन्दं प्राप्नुयुरिति मे दृढा मतिः। एवञ्च, अद्भुतरसस्याप्यवस्थितिरत्रावलोक्यते। तथाहि प्रकृतकाव्यस्य तृतीये चतुर्थे पञ्चमे चाध्याये श्रीपौलस्य क्रमेण प्रथमयात्राया द्वितीययात्रायास्तृतीययात्रायाश्च वर्णनावसरे श्रीपौलेन कृतानामद्भुतक्रियाकलापानामत्र सन्निवेशात्तद्रसस्य संसृष्टिरभूदिति मन्ये। वस्तुतस्तु सिद्धपुरुषाणां

---

[49] सा. द. (हरिदास.), पृ. ४२३.

साधकानां जीवनमाश्रित्य रचितेषु प्रायः सर्वेष्वेव काव्यनाट्यादिष्वङ्गिरसरूपेण शान्तमेव स्वीचक्रिरे कवयः।

### ४.४.५. चतुर्वर्गफलत्वम्

चतुर्णां धर्मार्थकाममोक्षाणां वर्गश्चतुर्वर्गः। तद्रूपेण फलेन प्रयोजनं भवति खलु महाकाव्ये। परन्त्वेकत्र चतुर्णां फलानामसम्भवात् सर्व एव प्राप्तपरिसरं वर्णनीयाः, किन्त्वन्यतममेव फलं महाकाव्ये सूचनीयमिति मन्तव्यम्। तथाह्याकूतं विश्वनाथपादैः –

'चत्वारस्तत्र वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्।'[50] इति।

अत्र महाकाव्ये यद्यपि न दृश्यते समेषां धर्मादीनां चतुर्णां वर्गाणां सुस्पष्टा समुपस्थितिस्तथापि धर्ममोक्षयोरसामान्यः संयोगोऽत्र कविना श्रीखृष्टप्रेरितपौलवचसा समुपस्थापितः। धराधाम्नि धर्मं प्रतिष्ठापयितुमवतीर्णस्य प्रभोर्येष्वः शिष्यमौलिभूतस्य श्रीपौलस्य स्वार्थहीनो परेश्वरविश्वास एव मोक्षप्रतिपादक इति मतं प्रकाशयाञ्चकार कविः। श्रीयेषूप्रतिपादितधर्मतत्त्वे विश्वासस्तस्य यथायथं सश्रद्धं पालनेनैव धर्माध्वनि प्रवर्तिताः साधारणमानवाः परमं तथा चरमं लक्ष्यं प्रत्यग्रेसरा भविष्यन्तीति कवेः सम्प्रत्ययः। अतोऽत्र मोक्षरूपफलस्यैकस्यैवान्यतमत्वं द्योत्यत इत्यत्र नैव सन्देहः।

### ४.४.६. वस्तुनिर्देशः

इष्टजनस्य शुभाशंसनेन, स्वापकर्षबोधानुकूलव्यापारविशेषेण, वस्तुनिर्देशेन वा महाकाव्यस्य प्रारम्भो विधेय इत्यालङ्कारिकाः। तथाहि दण्डिनाप्युक्तम् –

'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्'[51] इति।

---

[50] सा. द. (हरिदास.), पृ. ४२३.

[51] का. आ., पृ. ५३.

अत्रास्मिन् काव्ये तु वस्तुनिर्देशमूलं महाकाव्यमुखमेव दृक्पथमुपैति। वसति प्रस्तुतवृत्तान्तोऽस्मिन्निति वस्तु। अतो जान्म्यूरवर्येण काव्यस्यास्य विषयं वक्तुकामेन ग्रन्थस्यादावेवाभ्यधायि यत् –

“वृद्धिं खृष्टीयधर्मस्य श्रोतुमिच्छामि विस्तरात्।

के शिष्याः प्रभुणा नुन्नाः कानुपस्थाय नीवृतः।

भुक्त्वा च कीदृशान् क्लेशांस्तस्य धर्मं वितस्तरुः।।”[52] इति।

तथाहि जगत्त्रातुः श्रीयेषूखृष्टस्य प्रचारः प्रसारो वात्र मुख्यो वर्ण्यो विषयः। तस्मिन् कर्मणि चिताः शिष्याः केन प्रकारेण खृष्टीयं धर्मं जगति प्रचारयामासुस्तद्वर्णनमेवेह प्राप्यते। तत्रापि मुख्यतया खृष्टस्य प्रधानभूतेषु चतुर्षु शिष्येष्वन्यतमस्य श्रीपौलस्य जीतिवतावधि कृतं कार्यजातमेव सयत्नं वर्णितं कविनास्मिन् महाकाव्ये। तत्र क्वचित् खलचरित्राणां निन्दा, क्वचिद्वा सज्जनानां गुणकीर्तनमिति महाकाव्यापरं वैशिष्ट्यमपि प्रस्तुते काव्ये पौनःपुण्येन नो दृक्पथमुपैति।

### ४.४.७. सर्गसंख्या

महाकाव्यस्य सर्गसंख्याविषयेऽद्यापि कविसंसदि मतवैपरीत्यं विद्यते। अष्टाधिकानां सर्गाणां सद्भाव एव महाकाव्यत्वनियामक इति प्रायः नैकेषां साहित्यतत्त्वविदुषां मतम्। परन्तु प्रकृते काव्ये तु दशानां सर्गाणां सद्भावो दृष्टिगोचरतामेति। ननु अष्टसर्गयुतस्य काव्यस्य महाकाव्यत्वं हीयेतेति चेन्न, अष्टसर्गान्वितस्यापि काव्यस्य महाकाव्यत्वसूचनत्वात्। तथाह्युच्यते ईशानसंहितायाम् -

“अष्टसर्गान्न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्।

महाकाव्यं प्रयोक्तव्यं महापुरुषकीर्तियुक्।।”[53] इति।

---

[52] श्री. पौ. च., पृ. १.

[53] का. आ., टीकायाम्, पृ. ६४.

नातिस्वल्पाः क्वचिद्वा नातिदीर्घा अध्याया भवन्ति महाकाव्ये। द्वितीयाध्याये यथा केवलं द्वाषष्टिसंख्यकाः श्लोकास्तथा षष्ठे चाध्याये त्रिपञ्चाशदुत्तरैकशतसंख्यकाः श्लोकाः सन्ति। एवं नानावृत्तमयाः श्लोका यद्यपि कविना न प्रणीताः, तथापि नितरां योग्यच्छन्दसानुष्टुपा वृत्तेन निबद्धं खलु समस्तं काव्यम्।

अन्तिमे त्ववश्यं वक्तव्यं यत् सन्ति केचन महाकाव्यद्योतका बिन्दवो येषामभावोऽत्र काव्येऽस्मिन्नालोक्यते। यथा, सन्ध्या-सूर्य्येन्दु-रजनी-प्रदोष-ध्वान्त-वासर-प्रातर्मध्याह्न-मृगया-शैलर्त्तु-वन-सागरादीनां वर्णनमूलं तत्त्वं यत्तु महाकाव्यलक्षणे प्रयोजनीयमिति प्राचीनसंस्कृतालङ्कारिकाणां मतम्, सर्वथानुपस्थितिस्तस्य नो नयनयुगलमुपैति। परन्तु तेनास्य महाकाव्यत्वहानिर्नैव भवतीति वक्तुं पार्यतेऽन्येषां महाकाव्यिकतत्त्वानामिह सद्भावात्।

## ४.५. गुणसमीक्षा

काव्यस्य सर्वसम्मतं प्रस्थानं तु चमत्कृतिमूलमेव। तदेव वाक्यं काव्यं भवितुमलं यद्धि चमत्कारमुत्पादयति। रसो वा गुणो वालङ्कारो वा ध्वनिर्वा रीतिर्वेति सर्वाण्यप्यलङ्कारतत्त्वानि चमत्कारोत्पादनायैव सामर्थ्यमादधति। न केवलं शब्दः, न वा केवलमर्थः, अपि तु तयोरुभययोरेव चमत्कारो हि काव्यजीवितम्।

वस्तुतस्तु 'काव्यस्यात्मा कः' इत्येवासीद्विवदमानानामालङ्कारिकाणां समक्षं प्राधान्येन विवेच्यो विषयः। किमिदं तादृशं वस्तु विद्यते यद्विद्यमाने काव्ये काव्यत्वं तिष्ठति, तद्रहिते च तदपसरतीति जिज्ञासामालम्ब्य स्वस्वबुद्ध्यनुसारेणोत्तरप्रदानायैव नानाविधसम्प्रदायानामाविर्भावोऽभवत्। तेन अलङ्कार-रीति-रस-ध्वनि-वक्रोक्ति-औचित्यभेदेन काव्यस्य प्रस्थानानि षट् प्रादुर्भूतानि।

काव्यतत्त्वविदो नैवादधते खलु मतसाम्यं मिथो गुणस्वरूपविचारावसरे। क्वचिद्रसस्य धर्मो गुण इत्याहुः, क्वचिद्वा शब्दार्थयोः। क्वचित्तैर्गुणाश्रिता रीतिरित्युक्ता, क्वचिद्वा रीत्याश्रितो गुणः। तथाहि दण्डि-वामनादिभिरालङ्कारिकैर्दश गुणाः स्वीकृताः। परन्तु मम्मट-विश्वनाथादिभिराचार्यैस्तु ध्वनिवादस्य प्रतिष्ठापकाचार्यमानन्दवर्धनमनुसरद्भिः रसस्यैव धर्मो गुण इत्यङ्गीकृत्योररीकृतास्तावद्गुणास्त्रयः।

काव्यस्योत्कर्षस्य कारणानि खलु भवन्ति गुण-अलङ्कार-रीतयः। गुणाः शौर्यादिरूपेण, अलङ्काराः कटककुण्डलादित्वेन तथा च रीतयः अवयवसंस्थानविशेषत्वेनोपमिताः संस्कृतालङ्कारिकैः। तथाह्यात्मनः समुत्कर्षतां प्रतिपादयितुं यथा शौर्यादीनामावश्यकतास्ति तथैव काव्यस्योत्कर्षतासिद्धये प्रधानभूतस्य रसस्य धर्मा माधुर्यादयो गुणा उपयोगिनो भवन्ति। तत्रापि गुणेषु त्रिषु प्रसादलक्षणं लक्षयन्ती विश्वनाथभारती –

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवात्मनः।

स प्रसादः समस्तेषु रसेषु रचनासु च।।"[54] इति।

तथाह्यग्निर्यथा शुष्कमिन्धनं त्वरया व्याप्नोति, तथैव प्रसादो गुणोऽपि सहृदयानां मनांसि शीघ्रमेव वशीकरोति। नितान्तं सरलार्थबोधकाः श्रवणमधुराश्च शब्दाः प्रसादगुणगुम्फिता भवन्ति। अल्पाक्षरविशिष्टे वृत्ते तथा सरलशब्दव्यङ्गत्व एव दरीदृश्यते खलु प्रसादो गुणः।

अस्माकमालोच्यमानेऽस्मिन् महाकाव्येऽपि प्रख्यातेषु गुणेषु त्रिषु प्रसादस्यैवाधिक्येन व्यवहारो हि विहितो जान्म्यूरपादेन। तद्यथा प्रसादगुणस्य दिङ्मात्रमुदाहरणं प्रस्तूयते प्रस्तुतकाव्यस्य नवमाध्यायतः –

"पारुष्यं निन्दनं रोषं कलहं च परित्यजेत्।

यथेश्वरात् क्षमां प्राप्तस्तद्वदन्यान् क्षमेत च।।

कदापि स्वाभिमानेन नाचरेत् कलहेन वा।

नम्रात्मा त्वपरान् लोकान् स्वस्माद् मन्येत सत्तरान्।।

[54] सा. द. (हरिदास.), पृ. ५३८.

स्वकीयान् सद्गुणान् कोपि केवलान् न विलोकयेत्।

सदा मनो निदध्यात्तु परकीयगुणेष्वपि।।”[55] इति।

अत्र वाच्योऽर्थस्तु स्फुट एव। समासाभावत्वेऽल्पाक्षरोपेतानुष्टुप्छन्दोबद्धत्वे चास्य प्रसादगुणत्वमस्माभिः प्रतिपादयितुमलम्। धर्ममतप्रचारप्रधानेऽस्मिन् महाकाव्ये श्रीयेषूखृष्टप्रेरितेन शिष्येण श्रीपौलेन प्रचारिता जगतः सर्वान् जनानुद्दिश्य सद्वाणी एवात्र कविना समुपन्यस्ता। अतः प्रसादगुणगुम्फितमिदं काव्यं निःसंशयं सहृदयसंसदि स्वासनं लप्स्यत इत्याशासे।

## ४.६. रचनाशैली

महामहिमशालिनो महाकवेर्जान्म्यूरवर्यस्य लेखनीलताप्रसूतमिदं महाकाव्यकुसुमम्। कवेरस्यार्थगाम्भीर्यतुन्दिलवचनरचनापटीयसी, सुललितपदविलासलास्यलीलावती, विशुद्ध-रमणीयवर्णाभरणा भारती कस्य वा सहृदयस्य हृदयसरोवरं नोद्वेलयत्यमन्दानन्दसन्दोहोल्लासेन।

कोमलपदविन्यासशालिनी सुमधुरा भाषा, हृदयङ्गमा भावभङ्गी, विषयोपन्याससरणिश्चानितरसाधारणी, कमनीयकवित्वालङ्कृता रचना च कापि निरतिशयचमत्कारिणी। महाकाव्यस्यास्य चरित्रचित्रणचमत्कारः, कल्पनाकमनीयता, गम्भीरभावानां सन्निवेशश्च काव्यमिदं प्रतिष्ठापयन्त्यत्युच्चसम्मानास्पद आसन इत्यत्र न संशीतिः। तथाह्यनुप्रासच्छटात्र लक्षणीया –

“सजातीयैर्विजातीयैर्विपक्षैरपि बाधितः।

स स्वस्य सत्प्रभोर्नाम्नः प्रचाराद् न न्यवर्तत।।”[56] इति।

---

55 श्री. पौ. च., पृ. १०२-१०३.

56 तत्रैव, पृ. ७७.

विविधानां गम्भीराणां शास्त्रीयाणां विषयाणां वर्णनं तु कविवरेण नितरामेव सारल्येन वचोविन्यासेनात्र प्रकटीकृतमिति तदीयं वैशिष्ट्यमन्यतमम्। यथास्माकं शरीरं तु नश्वरम्, अस्य विनाशोऽवश्यम्भावी। अतोऽमरत्वलाभाय सदैवास्माभिर्यतनीयम्। तद्यथाह कविः –

"शरीरमैहिकं स्वर्गमधिकर्त्तुं न शक्नुयात्।

कदापि ह्यविनाश्यत्वे नाधिकारो विनाशिनः।।

निगूढां वः कथां वच्मि न मर्त्तारोऽखिला नराः।

दिनेऽन्तिमे तु सर्वेषां परिणामो भविष्यति।।

इदं हि नश्वरं देहमक्षयं परिधास्यति।

वर्ष्मेदं मरणाधीनं परिधास्यत्यमृत्युतां।।"[57] इति।

किञ्च, पापादिमूलेन बन्धनकारणेन वर्ष्मणा समं संयुक्तस्यात्मनः परलोके संसिद्धिः कथं भवेदिति मोक्षप्रतिपादकं तत्त्वं नितरामेव प्राञ्जलगिरा कविनोदितं तदीये *श्रीयेषूखृष्टमाहात्म्यमि*त्यपरे महाकाव्ये –

"पापादिकारणं देहं स्वभावादिति यद् मतम्।

न खृष्टीयेण शास्त्रेण युक्त्या वा सिद्धमस्ति तत्।।

आत्मनः शुद्धये देहमुक्तिरावश्यिकी भवेत्।

इति केनापि निर्णेतुं प्रमाणेन न शक्यते।।

प्रवृत्तिर्ह्यात्मनो देहात् पृथगत्र न सिध्यति।

[57] श्री. पौ. च., पृ. ९९.

परत्रात्मा विना यंत्रात् सेत्स्यतीत्यूह्यते कुतः।।

किंचेश्वरः स्वयं स्वीयाज्ज्योतिर्धाम्नोऽवतीर्णवान्।

अधार्षीद् मानुषं देहमाचरीच्च सदेहवत्।।

वपुर्मात्रं महामूलमभविष्यद् मलस्य चेत्।

तदेश्वरो धरेत् तादृग् देहमित्थं न संगतम्।।"[58] इति।

काव्यस्य रचनावसरे कविना सदैव चेष्टितं यत् कस्यचिद्विषयस्योपस्थापनमेकेनैव श्लोकेन समापनीयमिति। तदर्थं दीर्घवाक्याभावः काव्यस्यास्य वैशिष्ट्यमेकम्। तथैव विषयस्य स्पष्टता सरलता चास्यान्यतमं वैशिष्ट्यद्वितयम्। तेन काव्यस्य प्रचारः साधारणेषु जनेषु वृद्धिमियात्। तथाहि कविः स्वयमाह काव्यस्य प्रस्तावनायाम् –

"I have endeavoured to write the following tract with clearness and simplicity, which are most essential requisites in introducing a new subject to minds hitherto limited to their own national circle of ideas, and unexercised on any thing beyond that narrow range. The employment of verse is conducive to this end by obliging the writer to complete each sentence within a single sloke, as, generally speaking, a regard to elegance of composition does not admit of a different practice. It therefore becomes necessary to break up the matter into short sentences, each containing a distinct and direct statement or proposition, with few secondary and supplemental clauses, and none of any length."[59] इति।

अतो निःसंशयं वक्तुमलं यत् संस्कृतवाङ्मयमहोदधेस्तत्रभवान् महाकविः श्रीजान्म्यूरः खल्वत्यन्तं भासुरं रत्नमेकम्। यद्यपि चन्द्रकान्त-हरिदास-कालीपद-श्रीजीवादि-कविपुरन्दराणां

---

58 श्री. येषू, मा., पृ. १३०-१३१.

59 श्री. पौ. च., Preface, पृ. vi.

संस्कृतसाहित्यधुरन्धराणां काव्यवीणानिक्वणनप्रावीण्यं तु न पस्पर्शास्य कवित्वझंकारः, तथापि सुतरामेव स श्रवणमधुरः प्रशस्यतरश्च संवृत्तः।

**४.७. छन्दोविचारः**

यत्पापमाच्छादयति यद्वा पापाद् यजमानं पुरोहितञ्चाच्छादयति रक्षतीति तच्छन्दः। तदुच्यते यास्केन – 'छन्दांसि छादनात्' इति। छान्दोग्येऽप्याम्नातं - 'देवा वै मृत्योर्विभ्यन्तस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिराच्छादयन्, यदेभिराच्छादयंस्तच्छन्दसां छन्दस्त्वमि'ति। वेदेन समं छन्दसोऽभेदोपचारतः पाणिनिर्वेदार्थे छन्दःशब्दं व्यवहृत्य 'बहुलं छन्दसि' 'छन्दसि परेऽपि' इत्यादीनि सूत्राणि प्रणयामास।

प्रायेण निखिला संहिता छन्दोबद्धा। अतो वैदिकसाहित्यस्य संहिताभागश्छन्द इति कथ्यते। किञ्च, छन्दो नामान्यतमं वेदाङ्गम्। तत्तु वेदपुरुषस्य पादतुल्यम्। यथोक्तं पाणिनीयशिक्षायां – 'छन्दः पादौ तु वेदस्य' इति। यथा पद्भ्यां विना गमनं न सम्भवपरं, तथैव छन्दांसि विना वेदमन्त्रा अपि न प्रसरन्ति। वस्तुतस्तु छन्दोज्ञानं विना वैदिकसंहिताया अध्ययनमर्थावबोधो वा न सम्भवति।

लौकिकसंस्कृतसाहित्येऽपि पारम्परिकच्छन्दसां प्रयोगप्रणालीमनुसरद्भिः कविभिः प्रणीतानि खलु काव्यानि नैकानि। तत्रापि अनुष्टुप्-उपजाति-इन्द्रवज्रा-उपेन्द्रवज्रा-मालिनी-प्रहर्षिणी-तोटक-मन्दाक्रान्दा-शार्दूलविक्रीडित-स्रग्धरादीनामसंख्येयानां छन्दसां प्रयोगः संलक्ष्यते। आधुनिके काले तु कविभिः कैश्चिद् नवीनानि छन्दांस्यप्याविष्कृत्य स्वीयकाव्येषु व्यवहृतानि। कालिदास-भवभूति-माघ-श्रीहर्षादिभिर्महाकविभिः प्रयुक्तानि छन्दांसि सदैव वर्ण्यविषयानुगानि। तद्यथा, हर्षकाले प्रहर्षिण्याः, प्रवासप्रावृड्व्यसनेषु मन्दाक्रान्तायाः, पराक्रमवर्णने वंशस्थविलस्य, पौराणिकवृत्तोपाख्यानादिकथने चानुष्टुभः प्रयोगो बहुलतया नयनपदवीमायान्ति।

परन्तु साम्प्रतमाधुनिककवयः स्वाभिमतानुसारं प्रणयन्ति काव्यानि, नापेक्षन्ते छन्दांसि। युगरुच्यनुसारं काव्येषु छन्दःप्रयोगेऽपि समागतानि परिवर्तनानि। अपि च, प्रतीच्यदेशानां साहित्येभ्यः छन्दांस्याहृत्यात्रापि प्रयुज्यन्ते कविभिरनेकैः।

श्रीम्यूरपादैः प्रणीतेऽस्मिन् श्री. पौ. च. इति महाकाव्ये सर्वत्रैवानुष्टुप्छन्दसः प्रयोगोऽवलोक्यते। काव्यमिदं पुरातनवृत्तावलम्बि, यत्र खलु भगवतः श्रीयेषूखृष्टस्य पवित्रं जीवनं दशभिरध्यायैः कविनोपवर्णितमित्युपलभ्यते। तथाह्येवंविधस्य पौराणिकवृत्तान्तस्य वर्णनावसरे कविना योग्यतमस्यैवानुष्टुप्छन्दसो व्यवहारो विहित इति कवेश्छन्दसः सम्यक् ज्ञानं तु स्पष्टमेव। तथाह्यनुसन्धेया तावद्भणितिः क्षेमेन्द्रस्याचार्यस्य –

“काव्ये रसानुगुणेन वर्णनानुगुणेन च।

कुर्वीत सर्ववृत्तानां विनियोगं विभागवत्।।”[60] इति।

अनुष्टुप्छन्दसोऽस्य लक्षणं लक्षयति छन्दोमञ्जरीकारो गङ्गादासः –

“पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।

गुरु षष्ठञ्च जानीयात् शेषेष्वनियमो मतः।।”[61] इति।

परन्तु श्रुतबोधानुसारि छन्दसोऽस्य लक्षणं यथा –

“श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चकम्।

द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।”[62] इति।

म्यूर-वर्यैस्तु तदीयेऽस्मिन् काव्येऽनुष्टुप्छन्दसः श्रुतबोधानुसारि लक्षणमेवानुसृतमित्यालक्ष्यते। तथाहि काव्यस्यास्य नवमाध्यायस्य श्लोक एवोदाह्रियते –

---

60 *सुवृत्ततिलकम्*, ७.१.

61 *छन्दोमञ्जरी*, गङ्गादास-कृता, (सम्पा.) गुरुनाथ-विद्यानिधिः (द्वादश-परिमार्जित-संस्करणम्), पृ. १८१.

62 *श्रुतबोधः*, पृ. ४५.

"दुष्कर्मकारिणां पुंसां यस्त्वं दोषविचारकः।

दुष्कर्म स्वयमाचर्य्य किं नेशाद् दण्डमाप्स्यसि।।"[63] इति।

अपि च, काव्यस्य चतुर्थाध्यायस्य श्लोको यथा –

"विपश्चितश्च भूयांसस्तत्पुरस्य निवासिनः।

विद्याया महतीं चर्चामाचरन् सूक्ष्मबुद्धयः।।"[64] इति।

### ४.८. अलङ्कारविमर्शः

संस्कृतसाहित्यप्रपञ्चेऽलङ्कारशास्त्रं शब्दार्थशोभाधायकत्वात्किमपि कमनीयं पदमलङ्करोति। 'अलङ्क्रियतेऽनेने'ति व्युत्पत्त्या करणसाधनोऽयमलङ्कारशब्दः शब्दार्थालङ्कारानभिधत्ते। साहित्यशास्त्राभिधानोऽलङ्कारशब्दस्तु तावद्भावसाधनः – 'अलङ्कृतिरलङ्कारः' इति। अत एवोच्यते वामनेन *काव्यालङ्कारसूत्रवृत्तौ* –

'काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः।'[65] इति।

अतः काव्यं ग्राह्यं भवत्यलङ्कारसमन्वयादेव। ननु किं काव्येषु यमकोपमादीनां शब्दार्थालङ्काराणां सन्निवेशाभादकाव्यत्वापत्तिरिति चेन्न, सौन्दर्यवत्त्वादलङ्कारस्य। तथाहि वामनेनावाचि –

'अलङ्कृतिरलङ्कारः। करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्तते।'[66] इति।

---

63 श्री. पौ. च., पृ. ८६.

64 तत्रैव, पृ. ३९.

65 का. सू. वृ., १.१.१-२.

66 तदेव.

अलङ्कारशब्दोऽयं साधारणतया सौन्दर्यशब्देन निर्दिश्यते। शोभनतममपि नायिकाया वदनं कुण्डलादिभिर्भूषितं सदेव रोचते, अलङ्कारविरहितं तन्न दृष्टिसुखं जनयति। भामहेन तथाहि भाषितं –

'न कान्तमपि निर्भूषं विभाति वनितानननम्।'[67] इति।

स चायमलङ्कारो दोषहानाद्गुणाधानाच्च यशःकामुकस्य कवेरतिशयसम्पाद्यतया विवक्षितः। तस्मात्काव्योत्कर्षाभिलाषुकेण कविना दोषा यत्नतो हातव्या गुणाश्च पुनराधातव्या भूयसायासेन। तदानीमेव काव्यं चारु सत् प्रीतिजनकं कीर्तिद्योतकं च सम्पद्यते, नान्यथा। तथाहि ब्रवीति वामनः –

'स दोषगुणालङ्कारहानादानाभ्याम्।'[68] इति।

अलङ्कारं लक्षयता विश्वनाथेनापि निगदितम् –

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।

रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।।"[69] इति।

अलङ्कारा अङ्गदादिवत् शब्दार्थयोः शोभावर्धकाः, रसादीनां चोपकर्तारः। प्रसादादिगुणवदलङ्कारा नापरिहार्याः। अत एवैतेऽस्थिरा धर्मा इत्युच्यन्ते। यद्यपि काव्यात्मरूपेण नास्य महत्त्वं, तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयत्यसौ। यथा सकलगुणसमन्वितोऽपि मानवो निर्व्यसनो न शोभते, तथैवालङ्कारहीनं काव्यम्।

---

67 का. अ. (भामह.), १.१३.

68 का. सू. वृ., १.१.३.

69 सा. द. (हरिदास.), १०.१.

श्रीयेषूखृष्टप्रेरितपौलचरितमाश्रित्य प्रवृत्तेऽस्मिन् जान्-म्यूर-प्रणीते प्रकृते महाकाव्ये यद्यपि नैवालक्ष्यते विविधानामलङ्काराणां वर्णनाच्छटा, तथापि तत्र क्वचित् शब्दार्थालङ्काराणामपूर्वः प्रयोगः कविना साधितः। विशेषतः शब्दालङ्कारेष्वनुप्रासस्य व्यवहारे नितरामेव निष्णातः कविरयम्। तथाहि बहुत्रास्यालङ्कारस्य रम्यः प्रयोगः सहृदयानानन्दयतीति ध्रुवम्। तद्यथा –

"क्षुधार्द्दिता हि तृष्णार्त्तास्ताडिता अस्थिराश्रमाः।

श्राम्यन्तः स्वैः करैः कालं यापयामो निरन्तरम्।।

दुर्वाक्यैर्भर्त्सिताः सन्तो वयं ब्रूमः सदाऽऽशिवम्।

विपक्षैर्बाधिताः सन्तो धीरत्वेन सहामहे।।"[70] इति।

अन्यत्रापि नवमाध्याये कविनानुप्रासास्येन निगद्यते –

"यथाऽऽज्ञोल्लंघनेनैको बहुलान् पापिनो व्यधात्।

तथाऽऽज्ञापालनेनैको विधाता धार्म्मिकान् बहून्।।"[71] इति।

अत्र थकार-ज्ञकार-नकाराणां पौनःपुण्येनावृत्तेर्वर्णसाम्याद्वानुप्रासालङ्कारस्तु स्फुट एव।

एवमेवार्थालङ्काराणामुपमादीनां प्रयोगोऽपि न दुष्प्राप्यः। किन्तु नितरामेव स्वल्पास्तेऽर्थालङ्कारा गुणगतमहिम्ना नैवोत्तमतां यान्ति। वस्तुतः, ग्रन्थोऽयमुपदेशात्मकः खृष्टधर्मप्रतिपादकश्च। अत्रालङ्काराणां घनघटा नैव युक्तियुक्ता भवेदिति मन्यमानेनैव कविनालङ्काराणां प्रयोगो बाहुल्येन न विहित इति मदीया मतिः। उपमानुप्राणितोऽर्थालङ्कारो यथा –

---

70 श्री. पौ. च., पृ. ७८.

71 तत्रैव, पृ. ८८.

"शक्तिः परेश्वरे निष्ठा न च नृष्विति सिद्धये।

अस्मासु धर्मकोशोऽयं मृद्घटेष्विव रक्ष्यते।।"[72] इति।

### ४.९. व्याकरणगतं वैशिष्ट्यम्

महाकविना जान्म्यूर-वर्येण प्रणीतं श्री. पौ. च. इति महाकाव्यमिदं व्याकरणशास्त्राधिजिगांसूनाम् अत्युपकारकमित्यत्र न सन्देहः। अत्र विविधानां लकाराणां यथार्थतया प्रयोगोऽकारि कविनामुना। तद्यथा लिट्-लुट्-लिङ्-लुङ्-लोटादीनां प्रायः समेषामेव लकाराणामपूर्वः व्यवहारो हृदयमाह्लादयति समेषामेव सहृदयानामित्यत्र न विप्रतिपत्तिः। वस्तुतस्तु लिट्-लकारस्य प्रयोगे कविरन्यान् कवीश्वरानतिशेत इति तु काव्यस्यास्याध्ययनेनैवाधिगम्यते। न केवलं लकाराणाम्, अपि तु व्याकरणदिशा कारकाणां, समासानां तथा प्रत्ययानामसामान्यः प्रयोगोऽपि कविवर्यमेनमत्युच्चसम्मानास्पदे स्थाने स्थापयतीति नात्युक्तिः। तथाह्यधस्तादधिकाव्यं प्रयुक्तानां लिट्लकारान्तानां केषाञ्चित्पदानां वैयाकरणदृष्ट्या विधीयते खलु विचारः –

| | | |
|---|---|---|
| १. | वितस्तरुः (१.४) | वि-स्तृ-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| २. | आददे (१.५) | आ-दा-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| ३. | तस्थगुः (१.१९) | स्थग्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| ४. | ययाच (१.३८) | याच्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| ५. | ययुः (१.४२) | या-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| ६. | विशश्वसुः (१.४८) | वि-श्वस्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषबहुवचनम् |
| ७. | तत्यजुः (१.९५) | त्यज्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| ८. | प्रचक्रमे (२.३८) | प्र-क्रम्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषैकवचनम्। |

[72] श्री. पौ. च., पृ. ८८.

| | | |
|---|---|---|
| ९. | ऊचतुः (३.४०) | वच्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषद्विवचनम्। |
| १०. | ननाद (४.१५) | नद्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| ११. | बबन्ध (४.२१) | बन्ध्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| १२. | शशंकिरे (४.४२) | शक्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| १३. | बभाषिरे (४.७०) | भाष्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| १४. | चिचेष्टिरे (५.५) | चेष्ट्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| १५. | मेनिरे (६.४५) | मन्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| १६. | प्रोचे (६.६९) | प्र-वच्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| १७. | चकम्पे (६.७९) | कम्प्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| १८. | विदुः (६.१२१) | विद्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| १९. | प्रचकाशे (६.१३१) | प्र-काश्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| २०. | जघटे (७.४२) | घट्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| २१. | जज्ञिरे (७.६०) | जन्-धातुः (आत्मनेपदी) + लिट् + प्रथमपुरुषबहुवचनम्। |
| २२. | चकार (९.९४) | कृ-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| २३. | प्रोवाच (९.१४९) | प्र-वच्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषैकवचनम्। |
| २४. | आदिदेश (९.१६०) | आ-दिश्-धातुः (परस्मैपदी) + लिट् + प्रथमपुरुषैकवचनम्। |

एतद्व्यतिरिच्यापि चतुर्थाध्यायस्यैकस्मिन् श्लोके भावे सप्तम्याः प्रयोगस्तु लक्षणीयः। वैदेशिकोऽपि स संस्कृतशास्त्रेष्वाप्तव्युत्पत्तिर्व्याकरणशास्त्रस्य गूढातिगूढतत्त्वैः साकं परिचित इति प्रतीयते। पश्यन्तु तावन्म्यूरभणितिम् –

"पौले प्रत्युत्तरं दातुं तदानीमुद्यते सति।

इत्थं यहूदिनां वर्गमूचे रौम्योऽक्षदर्शकः।।"[73] इति।

अत्र बहुव्रीहिसमासस्यापूर्वः प्रयोगो नयनपथमुपैति। 'खिन्नहृदः' (श्री. पौ. च., १.३१) इति पदं तु द्रष्टव्यम्। खिन्नाः हृदः येषां ते इति विग्रहे बहुव्रीहिसमासे निष्पन्नः शब्दः प्रकृते महाकाव्ये लोकाः इत्यस्य विशेषणपदं बहुव्रीहेरन्यार्थप्रधानत्वात्। मनःकष्टमापन्ना लोका इत्यर्थः पदस्यास्य।

प्रत्ययानामपि प्रयोगो नितरामेव विशेषतामाधत्ते। तथाहि 'विमुखीकुरु' (श्री. पौ. च., १०.१८) 'मूर्खत्वीकृतवान्' (श्री. पौ. च., ९.६३) चेत्यादिषु स्थलेषु च्वि-प्रत्यस्य व्यवहारः सुतरामेव रमणीयः। अभूततद्भावे च्विप्रत्ययो भवति। अत्र तावत् पाणिनीयं सूत्रं हि – 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः'[74] इति।

किञ्च, 'पञ्चकृत्वः' (श्री. पौ. च., ८.१३) इति स्थले कृत्वसुच्-प्रत्ययस्य नितरामेव रम्यः प्रयोगोऽपि कवेर्व्याकरणज्ञानपाटवमेव प्रमाणीकरोति। संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः स्वार्थे कृत्वसुच्प्रत्ययो भवतीति काशिकावृत्तिः। अत्र पाणिनीयं सूत्रं तावत् – 'संख्यायाः कियाऽभ्यावृत्तिगणने कृत्वसुच्'[75] इति।

### ४.१०. काव्यप्रशस्तिः

व्याकरणमार्गप्रदर्शनपुरस्सरं काव्यचषके नयनाभिरामपौलकथामृतमपि निकामं सम्भृतमिह विभृतमिव। अत्र हि शास्त्रकाव्ययोः प्राञ्जलः समन्वयः सुस्पष्टः। तथाह्येकतः

[73] श्री. पौ. च., पृ. ४१.

[74] अष्टाध्यायी, ५.४.५०.

[75] तत्रैव, ५.४.१७.

काव्योचितसरसतादिगुणा भ्राजन्तेऽपरतश्च व्याकरणसम्मतप्रयोगानामापणमपि विलसति। तेन हि ग्रन्थोऽयं कवित्वपाण्डित्ययोः सुन्दरः सङ्गमः। महाकाव्यस्य प्रायः सर्वाण्यपि वैशिष्ट्यान्यप्यत्र राजन्त इति काव्यमिदमवश्यमेव महाकाव्यत्वेन सुधिसमाजसमक्षं समादरं लभेतेत्याशासे। विषयगतनावीन्यत्वेनाप्यस्य काव्यस्य महत्त्वमस्तीति वक्तुं शक्यते। श्रीपौलजीवितसम्बद्धानाम् ऐतिहासिकतथ्यानां यथायथं सुरगिरा काव्याकारेण सन्निवेशत्वात् सुतरामेव प्रशंसार्हः कविः जान्-म्यूरः। अतः चरितकाव्यत्वेन यथास्य काव्यस्य गणना भवितुमर्हति तथैव ऐतिहासिककाव्यत्वेनापि काव्यमिदं संस्कृतखृष्टीयसाहित्येऽवश्यमेवानन्यं स्थानमधिकरोतीत्यत्र नास्ति संशीतिः।

तथाहि महात्मनः श्रीपौलस्य जीवनमाहात्म्यं तथा तत्कृतिततीनाञ्च महत्त्वमेवात्र कविना श्रीजान्-म्यूरेण प्रपञ्चितमित्युत्कृष्टं काव्यमिदं प्रशंसता प्रख्यातेनैतिहासिकसमालोचकेन श्रीरिचार्ड-फक्स-इयङ्ग-वर्येण यदुक्तं तदनुसन्धेयमस्माभिः –

“A much more meritorious companion piece on the life of the Apostle Paul, the *Śrīpaulacaritra*, followed upon the heels of his life of Jesus. This, too, was a *māhātmya*, the glorification of the deeds and virtues of the Apostle to the Gentiles, who himself figures in this work not as a saint (*sādhu*) such as Polycarp but rather as a *mahātmā*, a person of enlarged soul, and as the paradigmatic Christian *bhakta* (devotee).”[76] इति।

इति

समाप्तश्चतुर्थोऽध्यायः।

[76] Ind. Christ., p. 90.

# ॥ श्रीयेषूखृष्टमाहात्म्यं ॥

*The Glory of Jesus Christ.*

A

BRIEF ACCOUNT

OF

# OUR LORD'S LIFE AND DOCTRINES,

COLUMBIA UNIVERSITY

IN

SANSKRIT VERSE.

WITH A HINDI VERSION, AND AN ENGLISH SUMMARY.

By John Muir

REPUBLISHED BY THE BOMBAY TRACT AND BOOK SOCIETY.
FIRST BOMBAY EDITION.

BOMBAY:
AMERICAN MISSION PRESS.
T. GRAHAM, PRINTER.

1852.

# ईश्वरोक्तशास्त्रधारा

संस्कृत महाराष्ट्रदेशीय प्राकृतेति भाषाद्वयेन प्रणीता;

म्हणजे

संस्कृत व प्राकृत अशा दोन भाषांनी ईश्वरकथित शास्त्रधारा सांगितली.

THE UNIVERSITY OF CHICAGO LIBRARY

---

THE

# COURSE OF DIVINE REVELATION,

IN

SANSKRIT AND MARÁTHÍ.

---

मुंबईंतील निबंध व पुस्तकें प्रसिद्ध करणाऱ्या मंडळीसाठीं
अमेरिकन मिशन छापखान्यांत छापली.

---

PRINTED FOR
THE BOMBAY TRACT AND BOOK SOCIETY,
AT THE AMERICAN MISSION PRESS.
A. D. M.DCCC.LII.

1852

W. Muir. Dec. 21. 18..

॥ शर्म्मपद्धतिः ॥

THE

# WAY OF HAPPINESS.

by J. Muir

A SKETCH

OF THE

TRUE THEORY OF HUMAN LIFE.

IN SANSKRIT VERSE.

LONDON:

PRINTED BY

RICHARD WATTS, CROWN COURT, TEMPLE BAR.

MDCCCXLI.

॥ मतपरीक्षा ॥

# भारतीयशास्त्रविचारात्मकः

। प्रथमः खण्डः ।

AN

# EXAMINATION OF RELIGIONS:

## PART THE FIRST;

CONTAINING

A CONSIDERATION OF THE HINDU SASTRAS,

WITH

**An English Version and Preface.**

BIBLIOTHECA BODLEIANA

MIRZAPORE:

ORPHAN PRESS:—R. C. MATHER, SUPT.

1852.

# पञ्चमोऽध्यायः

## ।। श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा ।।

# ।। श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा ।।

संस्कृतसाहित्याकाशे श्रीजान्-म्यूर-वर्यस्य कवित्वेन नाम यद्यपि न श्रुतपूर्वं वर्तते, तथापि वक्तुं शक्यते यत्तेन स्वकजीविते न केवलं *श्रीपौलचरित्रम्* इति महाकाव्यमेकं प्रणीतम्, अपि त्वपरमेकं महाकाव्यं, खण्डकाव्यानि च नैकानि विरचितानीति तेषां काव्यानां संस्कृतखृष्टीयसाहित्येऽनन्यं महत्त्वं प्रकटीकुर्वता मयकाध्यायस्यास्यावतारणा क्रियते। अत्रादौ समीक्षा विधास्यते *श्रीयेषूखृष्टमहाकाव्यम्* इत्याख्यस्याष्टसर्गान्वितस्य महाकाव्यस्य। ततश्च क्रमशः *मतपरीक्षा*, *पापमोचनीययथार्थोपायप्रदर्शनम्*, *शर्म्मपद्धतिः*, *निस्तारमार्गदीपिका* चेति चतुर्णां खृष्टीयविषयाश्रितानां संस्कृतखण्डकाव्यानामालोचना करिष्यते।

## ५.१. *श्रीयेषूखृष्टमाहात्म्यम्*

जगद्गुरोः श्रीयेषूखृष्टस्य समग्रमपि जीवितमस्मिन् संस्कृतमहाकाव्ये कविना श्रीजान्म्यूरेण नितरामेव प्राञ्जलया गिरा प्रकटीकृतम्। श्रीयेष्वो जन्मनः प्रारभ्य मृत्यवधि समस्तेऽपि जीवने संघटितं वृत्तजातं यथात्र वर्णितमालक्ष्यते, तथैव भगवता श्रीयेषूणा प्रोक्ताः सत्कथाकलापा अप्यत्र सुतरामेव सरलया गिरा कविना समुपन्यस्ताः। समग्रेऽस्मिन्महाकाव्ये विद्यमानानामष्टानामध्यायानां नामानि तथा तदनुसारञ्च श्लोकसंख्याः क्रमशोऽधस्तान्निर्दिश्यन्ते –

| | अध्यायनाम | श्लोकसंख्या |
|---|---|---|
| १. | *श्रीमहामोक्तृप्रतीक्षा* | ११४ |
| २. | *येषूत्पत्तिवर्णनम्* | ६२ |
| ३. | *अद्भुतक्रियावर्णनम्* | १३७ |
| ४. | *जगद्गुरूपदेशमाला* | २८५ |
| ५. | *येष्वः प्राणसमर्पणम्* | ११६ |
| ६. | *श्रीयेष्वः स्वर्गारोहणम्* | ७० |
| ७. | *खृष्टीयमतपारमार्थिकत्वम्* | ३१ |
| ८. | *प्रार्थनापद्धतिः* | ४२ |
| **अष्टौ अध्यायाः** | | **८५७ (साकल्येन)** |

- **हस्ताधिगतं संस्करणम्**

*श्रीयेषूखृष्टमाहात्म्यम्* इति महाकाव्यस्य यत्खलु संस्करणं मद्धस्तभूतमभूत्, यस्याधारेण च मया गवेषणाप्रबन्धस्यास्य प्रणयने प्रवृत्तं, तद्धि बोम्बे-स्थितस्य 'American Mission Press' इत्यतो द्वापञ्चाशदुत्तराष्टादशशततमे (१८५२) खृष्टाब्दे प्रकाशितमाद्यबोम्बेसंस्करणम्। अत्र प्रत्येकं श्लोकस्य हिन्दीभाषानुवादेन समं ग्रन्थस्यादावेव समग्रस्यास्य काव्यस्य प्रत्यध्यायं स्वयमेव महाकविनाङ्गलभाषायां विरचितः सारोऽपि विद्यमानोऽवलोक्यते। अस्यैव संस्करणस्य प्रस्तावनांशतोऽवज्ञायते यदिदमेकोनपञ्चाशदधिकाष्टादशशततमे (१८४९) खृष्टाब्दे प्रकाशितस्यास्यैव महाकाव्यस्य द्वितीय-कलिकाता-संस्करणात्पुनः प्रकाशितम्। अस्य ग्रन्थस्य प्रथमं संस्करणं तदानीन्तन-क्यालकाटातः (अधुना कोलकाता) 'ओस्टेल आण्ड लिपेज' (Ostell and Lepage) – इत्यतः प्रकाशितम् अष्टाचत्वारिंशदुत्तराष्टादशशततमे (१८४८) खृष्टाब्दे।

- **महाकाव्यस्य प्रत्यध्यायं सारः**

क) *श्रीमहामोक्तृप्रतीक्षा* - प्रथमोऽध्यायः

महाकविना म्यूरपादेन महाकाव्यस्यास्य प्रथमाध्यायस्य प्रदत्तेनानेन नाम्ना स्पष्टमेतत्प्रतीयते यत्कस्यचिन्महतो मोक्तुर्मोक्षप्रदातुर्वाविर्भावः काङ्क्ष्यतेऽस्मिन्नध्याये। ग्रन्थप्रारम्भे श्रीपरमेश्वरस्य जयं कल्पयता कविना तत्सकाशादेवार्थ्यते श्रवणमधुरा तथार्थान्विता वाग् यद्द्वारा जगतो मोक्षदातुर्गुणा गीताः स्युः। कश्चित् सत्यप्रार्थी कञ्चन विदेशिशास्त्रेषु निष्णातं पण्डितमेत्याह यत्स खलु समग्रेऽस्मिन् भुवि प्रख्यातमहिम्नः श्रीयेषूखृष्टस्य विषये भवत्सकाशात् तत्सारं ज्ञातुमिच्छतीति। विद्वानपि जगत्प्रभोश्चेष्टितं वक्तुमुद्यतो विविधेभ्यः शास्त्राब्धिभ्यः ज्ञानरत्नान्याहृत्य काञ्चित्प्रबन्धरूपिणीं मालां ग्रन्थति।

श्रीयेषूखृष्टं वर्णयता कविनात्र नानाविशेषणैर्विशेषयता विद्वन्मुखेन हृष्टचेतसा खृष्टकृतानि नैकान्यद्भुतकर्माण्यधिग्रन्थमुपन्यस्तानि। प्रभोर्येषूखृष्टस्य कानिचिद्विशेषणानि समेषां जिज्ञासूनां कृतेऽधस्तात् समुपस्थाप्यन्ते यद्द्वारा जगत्प्रभोः श्रीयेष्वोऽपारो महिमापि प्रकटितो भविष्यतीति मामकीनं मतम् –

| | | | | | |
|---|---|---|---|---|---|
| क) | ईश्वरात्मजः | ङ) | कुमारीगर्भजातः | झ) | जगद्गुरुः |
| ख) | अनादिः | च) | भुक्तपापफलः | ञ) | जगद्बन्धुः |
| ग) | जगदीशः | छ) | जगत्कल्याणमूलः | ट) | जगत्प्रभुः |
| घ) | नृमध्येऽवतीर्णः | ज) | जगन्मोक्ता | ठ) | सर्ववंशोपकारी |
| ड) | उदारात्मा | ण) | धृतबालकवर्ष्म | थ) | परेश्वरः |
| ढ) | अघलेशेनास्पृष्टः | त) | संगुप्तैश्वर्यलक्ष्म | द) | परमात्मा |

ततः प्रारभते खृष्टवर्णना। अस्माकमाद्यौ पितरौ पापलेशमात्राभावात्सुखेन दिनानि यापयन्तौ ईश्वराज्ञां भङ्क्त्वा कल्मषार्णवे पेततुः। जगत्प्रारम्भे बभूव कश्चन स्वर्दूतः शैताननामा (Satan) पश्चाद्यः खलु ईश्वरारिः सन् नृपित्रोर्नाशमिच्छन् दधार खलु सर्परूपम्। ईश्वरनिषिद्धं फलमादत् शैतानवाक्यैर्वञ्चिता साद्या स्त्री तथा च खादयामास स्वपतिमपि। तेन नितरामेव क्रुद्धः परमेश्वरः सुखोद्यानात् (Eden) तौ बहिश्चकार। अपि च, शप्तौ तौ परेश्वरसृष्टिभङ्गकारणात्। नागरूपधारिणं शैतानमपि शशाप स सान्त्वयंस्तौ। क्रमेण तयोराद्ययोः पित्रोः सन्ततिर्यदाजायत, तदा पैतृको दोषोऽपि तेषां स्वभावं समागतः। तेन मनुष्यसंख्यावृद्धिर्जाता। समग्रा पृथ्वी च बलात्कारेण पर्यपूर्यत। तदा तेषां दण्डं विनिर्णयन् सर्वान् लोकान् तथा जन्तून् जलप्लावेन ननाश परमेश्वरः।

नोहनामा (Noah) कश्चन धार्मिको जनः परिवारपरिवृतः समेषां जन्तूनामेकैकं युगलमादाय महत्या नौकया तत्रे खलु प्लावनाक्रान्तार्णवम्। ततो यदा नोहस्य पुत्रत्रयमजायत, तदा क्रमेण तेषामपि सन्ततिरभूत्, तेन च सर्वा भूः पुनरपि पूर्ववदेव संवृत्ता। तत्रादौ परमेश्वरस्य पूजादिकं प्राचलत्, परन्तु गच्छता कालेनासन्मतैर्मिश्रीभूय भगवद्भक्तिजो धर्मः प्रायो व्यलुप्यत। सर्वमेतत्पर्यवेक्ष्य ईश्वराज्ञया इब्राहीमाभिधः (Abraham) साधुः स्वस्त्रिया साकं कनानाख्यं (Canaan) देशं प्रचचाल। ततश्चेश्वरप्रतिश्रुतस्तस्य इस्हाकाख्यः सूनुर्जनिं लेभे। क्रमेण च तस्यापि पुत्रावजायताम्। एवं वंशस्य तस्य वृद्धिरभूत्। तदनु मोस्याचार्यमीश्वरः (Moses) स्वकीयं धर्मशास्त्रमुपदिदेश यद्धि पापमार्जनसाधकमासीत्। इत्थं प्रभोरिच्छया इस्रायेलोद्भवो (Israel) वंशः सदा निर्मलज्ञानसमृद्धः

सन् प्रभोरुपासनायां रतो बभूव। परन्तु यदा परमकारुणिकं परमेश्वरं त्यक्त्वा ते निषिद्धानन्यान् देवानभजंस्तदा ईश्वरेण संत्यक्तास्ते विपत्सु महत्सु पतिताः। तस्मात्पुनरीश्वरं यदा ते सिषेविरे, तदा परमदयामयस्तानुद्दधार।

विक्रमार्कशकात् सहस्रवर्षेभ्यः पुरा यहूदिनां देशे कश्चन भूभृत्तथा कविः नृत्रातुरागमनविषये प्राप्नोत् खलु प्रभोः प्रतिज्ञावचनमिदम् –

"तद्वंशः शाश्वतं स्थाता त्वद्राजत्वं च सन्ततम्।

सिंहासनं च ते वेत्ता दृढीभूतं सनातनम्।।"[77] इति।

ततो भाविनो मानवमुक्तिप्रदातुर्यशोगानं गातुमुद्यतेषु यहूदिगणेषु प्रसिद्धः कश्चन इषायसंज्ञकः ज्ञानप्रदीप्तः साधुः दाविद्राजात् (David) सार्धद्विशताब्देभ्यः परमजायत। स च खृष्टस्य ऐश्वर्यं पश्यंस्तस्य प्रशंसामुखेन दाविद्राज्यस्य भव्यमङ्गलविषयिकीं वाचमुवाच। तेन समं मनुष्याणामुद्धाराय तस्य प्रभोर्दुःखसहनविषयकं भव्यं वृत्तमपि तेनेषायेण सम्यङ् निगदितम्। ततश्च भव्यवाचकेन मीकाख्येन (Micah) प्रभोर्जन्मस्थलादिकं यथोक्तं तथैव दानियेलाचार्याद् (Daniel) विदितवृत्तान्तेन गाब्रियेलेनापि (Gabriel) खृष्टस्यावस्थानादिकं सर्वमगादि। प्रभोरागमनहेतुं निर्दिशता तेन नितरां प्राञ्जलेन वचसावाचि यत् –

"रोधनायापराधानां यज्ञानां च समाप्तये।

पापस्य शोधनार्थाय नित्यधर्मप्रवृत्तये।।"[78] इति।

---

77 श्री. येषू. मा., पृ. १२.

78 तत्रैव, पृ. १६.

एवंप्रकारेण यहूदिन्या तथा यावन्या भाषया प्रभोर्विषयिणी बहुकालप्रचलिता ग्रन्थसंहिताद्यावधि यथा पाश्चात्यलोकेषु प्रचलति, तथैवात्रापि भारते प्रभोः कीर्तिसंभूता जयगीतिर्गीयत इति प्रदर्शयितुं कविनोद्धृता श्रीमद्भगवद्गीतागीः –

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।"[79] इति।

ख) *येषूत्पत्तिवर्णनम्* - द्वितीयोऽध्यायः

दाविद्राजान्वयोद्भवां मरीयानामिकां (Mary) काञ्चित् कुमारीं समुपेत्य ईश्वरप्रेषितो दूतो गाब्रियेलस्तामब्रवीद् यत्तस्या गर्भमाश्रयिष्यति ईश्वरस्यैव पवित्र आत्मेति। पुंसंसर्गहीनां स्ववाग्दत्तामार्यतमां गर्भिणीं दृष्ट्वा व्यभिचारशंकया यदा योसेफः (Joseph) तां वर्जितुं समकल्पयत्तदैव स्वप्ने विभोर्दूतस्याज्ञां श्रुत्वा निर्मलां तामिति निश्चितः स व्युवाह खलु मरीयाम्। किञ्चित्कार्यव्यपदेशेन बेथ्लहमाभिधे पुरे गतासन्नप्रसूतिः सा पान्थशालासु रिक्तं स्थलं नाप्यैकस्यां मन्दुरायामेव तं पूर्वनिर्धारितं जगत्कर्तारमीश्वरं तथेश्वरपुत्रं सुषुवे। तेन स्वर्दूताः समे मिलित्वा तस्य माहात्म्यं प्रसन्नमानसा गातुं प्रारेभिरे। तदा सर्वमेतदाकर्ण्य शिष्यमनसि प्रादुरभूत् कश्चन प्रश्नः –

"योऽवतीर्णो नृरूपेण त्राताऽसौ कथमीश्वरः।

कथमीशात्मजश्चेति कृपया वद मे गुरो।।"[80] इति।

---

[79] श्री. येषू. मा., पृ. १८-१९.

[80] तत्रैव, पृ. २३.

एवं गुरुरीश्वरशिष्ययोर्योहन्निपौलयोरास्येन श्रीखृष्टस्यापारं महिमानं तथामितमैश्वर्यं प्रकाशयामास। ततश्च जन्मनः परमष्टमे दिवसे मोसिशास्त्रोक्तं संस्कारमवाप्य येषूनाम दधार स पुण्यो बालकः। हेरोदनामा राजा येषूत्पत्तिविषयकं भव्यवक्तृप्रोक्तं वृत्तान्तमाकर्ण्य व्याकुलः सन् बहुत्र तमन्विष्यापि न प्राप्य बेथ्लहमान्तिके द्विवर्षोनान् शिशून् सर्वान् हन्तुमादिदेश। ततः स्वर्दूताज्ञया पुनः स येषूर्देशान्तरं नीतः समाजगाम च स्वदेशम्।

तदनु द्वादशवर्षीयो बालको येषूः कस्मिंश्चिदपि पर्वणि निजपितृभ्यां समं येरूशालेमनगरीं (Jerusalem) यदा प्राप्तस्तदा पर्वान्ते स तत्रैव तस्थौ, पितरौ च बह्व्यन्विष्यापि तं नाप्य प्रत्यावृत्तौ स्वगेहम्। अन्तिमे दिवसत्रयात्परं परमात्मनो मन्दिरे तं शास्त्रिणां सदसि वसन्तं शास्त्रालोचनां शृण्वन्तं तथा पृच्छन्तं प्रश्नानपश्यताम्। ततो नितरामेवोत्कण्ठिता तदीया माता तमुवाच यत्कथं स एवं समाचरतीति। तदा येषूः स्वस्य पितुर्गृह एवास्तीत्याश्चर्यं वचोऽवचत्। किन्तु केनापि जिज्ञासुना 'पिता तु तव कोऽस्तीति गृहं वा तस्य किंविधमि'[81]ति प्रश्नो न पृष्टः। तदनन्तरं पित्राभ्यां सहागम्य नशरेतपुरं (Nazareth) पुनस्तत्रैव तस्थौ सिद्धो येषूखृष्टः। विविधशास्त्रेष्वनुदिनमेव निष्णातः स सर्वेभ्यो नृभ्यस्तथेश्वराच्चोत्तरोत्तरमाप्नोद्धि प्रसादमिति '**येषूत्पत्तिवर्णन**'नामको द्वितीयोऽध्यायः।

ग) *अद्भुतक्रियावर्णनम्* - तृतीयोऽध्यायः

श्रीयेषूखृष्टस्य माहात्म्यं ख्यापयितुमीश्वरेण नियुक्तेन योहन्निनामकेन साधुना समं यदा येष्वः साक्षात्कारोऽभूत्तदा कोलालसंस्कृतिसंस्कृतस्य खृष्टस्योपरि कपोतवत् ईश्वरात्मा संपतितस्तथा च स्वर्गाद् दैववाणी प्रादुर्बभूव –

"मदीय आत्मजन्माऽयं विद्यते परमप्रियः।

एतस्मिन्नेव सन्तोषो मामको विद्यतेऽपि च।।"[82] इति।

---

81 श्री. येषू. मा., पृ. २९.

82 तत्रैव, पृ. ३२.

योहन्नेः (John) सर्वतोविश्रुता कीर्तिर्यदा यहूदिनां प्रधानयज्वनां कर्णगोचरतां प्राप, तदा तमेव शास्त्रोक्तं महात्रातारं मत्वा ते याजका योहन्निमाध्यमेन जगत्पापहरं येषूं ददृशुः। ततश्च सर्वैः शिष्यगणैः स्तुतोऽपि स येषूः स्वकर्मणि प्रवृत्तः सन् गालीलीयं देशं परिव्रजन् नवीनधर्मराज्यस्य वार्तां न्यघोषयत्। ईश्वरेण ऐशशास्त्रप्रचाराय नियुक्तः स इति सिद्धये ततः सोऽगण्याः खल्वद्भुताः क्रिया अकार्षीत्। यथा कस्यचित् कुष्ठिनो वपुः प्रभोर्वाक्यप्रभावेणैव दारुणाद्रोगान्मुमुचे, तथैव द्वावन्धौ जनौ प्रभोः स्पर्शमात्रमेव दृष्टिं प्रापतुः। एवमेव दुष्टेन भूतेन पीडितायाः कन्यकायाः समुद्धारायार्तनादं कुर्वन्त्याः कस्याश्चिद्विदेशिन्याः श्रद्धां तथा नम्रतां परीक्ष्य प्रभुस्तदीयां कन्यां भूतविवर्जितां चकार।

ततश्चैकदा कस्याश्चिद्विधवाया मातुरेकमेव सूनुं मृतमिति दृष्ट्वा सदयो येषूरद्भुतक्रियया तं कालग्रासात् समुद्दधार। तेन च सर्वे द्रष्टारो विस्मयान्विताः सन्तः परेश्वरं तुष्टुवुस्तथा चोचुर्यत् 'महाचार्योऽयमस्माकं मध्ये प्रादुरभूदि'[83]ति। एवमेव यैरनामकस्य (Jairus) मठाध्यक्षस्य मृतां दुहितारमपि येषूश्चक्रे स्पर्शमात्रेणैव प्राणान्विताम्। ततश्च मृत्युशक्तिविनाशकमत्याश्चर्यतरं प्रभोः कर्म गुरुमुखेन वर्णयता कविना लाजारस्य (Lazarus) मृत्युवृत्तान्तमुक्त्वा तस्यैव लाजारस्य दिवसचतुष्टयं यावदश्मावरोधिते गह्वरे तिष्ठतः पुनर्जागरणवृत्तं सम्यक्तया वर्णितम्। इत्थमेवान्धेभ्यो दृष्टिदानेन कुष्ठरोगिजनेभ्यः शुद्धवपुःप्रदानेन तथा मृतेभ्यश्च जीवनदानेन प्रभोः खृष्टस्याद्भुतक्रियाकलापाः समग्रेऽपि जगति ख्यातिं गता इति '**अद्भुतक्रियावर्णन**'परस्तृतीयोऽध्यायः।

घ) ***जगद्गुरूपदेशमाला*** - चतुर्थोऽध्यायः

मनुष्यान् सत्पथे नेतुं तथा पापवशात्त्रातुमवतीर्णस्य विभोः सूनोरुपदेशमालात्र कविनानेकैः श्लोकात्मकैः पुष्पैर्ग्रथिता। प्रभोर्मतेन स्वभ्रात्रे यः क्रुध्यति स यथा दण्डार्हस्तथैव यः खलु भ्रातरम् 'अरे' इति ब्रूयात् सोऽपि दण्डयोग्यो भवेत्। एवं कीर्तिलिप्सये कदापि न सत्कर्म कुर्यात्। दानं

---

[83] श्री. येषू. मा., पृ. ४१.

कृत्वापि कदापि न सभासु मार्गेषु वा स्वप्रशंसातूरीं न वादयेत्। प्रार्थनापि सदा निजभवनस्यान्तः प्रविश्यैव द्वारं रुद्ध्वा कार्या। उपवासोऽप्यभक्तशीर्षेण तथा च धौतास्येन कर्तव्यो यथा लोको न जानीयादुपवासविषयमेव। आत्मानं यः सदोन्नेष्यति, स सदैव नमयिष्यते, किन्तु यस्तु स्वं सदा नमयेत्, स एवोन्नतिभाग् भवेदिति प्रभुणा फरीष्यकरग्राहिदृष्टान्तेन दर्शितं सम्यक्तया। परेषामपराधान् कश्चिद्यदि क्षमते, तदास्माकमप्यपराधान् स्वर्ग्यो नः पिता क्षमेत।

बन्धौ स्नेहपरस्तथा च शत्रौ द्वेषपरो भवेति श्रूयते भाषितम्। परन्तु श्रीखृष्टस्य नये तु रिपुष्वपि प्रीतिभावापन्नैर्भाव्यम्। अहितमिच्छद्भ्योऽप्याशिषः प्रदेयास्तथा द्रुह्यद्भ्यश्चाप्यनुग्रहो विधेयः। तदैव स्वर्ग्यपितुः सदृशा भवितुं समर्था वयं भवितास्मः। जीवनव्ययार्थं किं खाद्यं, किं पेयं, किं वा परिधेयमित्यादिविषयिकी चिन्ता न कार्या, यतो जीवनं नः सर्वतुच्छविषयादेतस्मादतिरिच्यते।

मनुष्याणां पापात्परावृत्तिमीशः कीदृशीं समीहत इति त्रिभिर्दृष्टान्तैर्वर्णयामास श्रीप्रभुः। तत्र सर्वत्रैव दृश्यते यत् स्वर्लोके कस्यचित् पापिनस्तथा भ्रान्तस्य पापात्परावृत्तिः सदैवाधिकहर्षप्रदा भवतीति। ईश्वरोक्तानामाज्ञानां मध्ये केयमाज्ञा महत्तमेति पृष्टोऽब्रवीद् येषूः –

“ईशोक्ता प्रथमाज्ञेयम् एक एव परेश्वरः।

तस्मिंस्तावद्धृदा प्रेम तावच्चित्तेन चाचर।

द्वितीयाज्ञेयम् अन्यस्मिन्नात्मवत् प्रेम कुर्विति।

एतदाज्ञाद्वयाद् अन्या कापि नास्ति महत्तरा।।”[84] इति।

सद्भक्तैर्विहितार्चना यत्र कुत्रापि रोचते खलु प्रभवे इत्येतत्सर्वं प्रभुपादैरेव भाषितम्।

नीकदेमाभिधेन (Nicodemus) यहूदिनां बुधोत्तमेन केनचित् पुनर्जन्मविषये पृष्टो येषूर्वदति यद्वायुः स्वेच्छयैव वाति, तत्स्वनमपि शृण्मो वयं, परं कुत एति कुतो वा यातीति न विद्मस्तत्तत्त्वमिति। अतः परमात्मनः शक्त्या एव जीवितानां पुनर्जनिर्भवेदिति श्रीखृष्टमतिः। तथाहि भगवति

---

[84] श्री. येषू. मा., पृ. ७३-७४.

परमात्मनि सदैव विश्वासं यः कुरुते स कर्हिचिदपि न दण्डभाग् भवतीति निश्चितम्। य एव मानवस्तं समाश्रयेन्न स कदापि क्षुध्येत्, यो वा तस्मिन् विश्वस्यान्न कदापि स पिपासेदिति श्रीयेष्वो मतम्। विपत्तिभ्रान्तिपापादिनानाभाराक्रान्तान् नरानुद्दिश्य श्रीप्रभुर्दृढमवोचत् –

"हे समस्ताः परिश्रान्ता भाराक्रान्ताश्च मानुषाः।

उपयात ममाभ्यर्णमहं दास्यामि विश्रमम्।।"[85] इति।

प्रभोरिच्छां ज्ञात्वापि यो नानुरुध्यते, दुष्टः स सेवकोऽनेकैः प्रहारैस्ताडयिष्यते। परन्त्वज्ञात्वा ये ताडनार्हाणि कार्याणि कुर्वते, तेऽल्पैस्ताडयिष्यन्ते प्रहारैः। संसारलिप्तचित्तानां स्वीयमात्रसुखार्थिनां धनिनामपि दुर्गतिः प्रभुणात्र स्पष्टतयैव प्रकाशिता। बाल्ययौवनावस्थयोर्दृष्टान्तमुखेन कविनात्र पौलवचसा ऐहिकस्वर्ग्यभावयोर्भेदो विनिर्दिष्ट इत्येवम्प्रकारेण '**जगद्गुरूपदेशमाले**'ति संज्ञकेऽस्मिन्नध्याये कविनासंख्यैर्दृष्टान्तैः प्रभोः श्रीखृष्टस्योपदेशावलिरालेखि।

ङ) *येष्वः प्राणसमर्पणम्* - पञ्चमोऽध्यायः

जगत्यस्मिन् विराजमानानां बहुजनानां निष्कृत्यै स्वजीवनं विस्रष्टुमायातः श्रीयेषूखृष्ट इति स्वमृत्युविषयकं यद्वचनं स्पष्टतया सूचितं स्वयं प्रभुणैव, तद्विषये पृष्टेन गुरुणा प्रभोर्विविधा उक्तीः शास्त्रेभ्यः समुद्धृत्य वक्तुमारब्धम्।

यिरूशलेम्पुरस्थाः प्रधानयाजकाद्याः श्रीयेषूं वधोचितं निर्णीय परदेशिनां हस्तेषु दण्डायार्पयिष्यन्ति। ततश्च तत्र भृषं ताडितस्तिरस्कृतो नः प्रभुर्निदयं हनिष्यते। मृत्योस्तृतीयेऽह्नि च स श्मशानतः प्रोत्स्थास्यति। कोऽपि तस्य जीवनं हर्तुं न शक्नोत्यपि तु स स्वयमेव विसृजेज्जीवमित्येतत्सर्वं भाविवृत्तं येषूरेव स्वयमब्रवीत्।

यहूदिधर्मशास्त्रोक्ते निस्taराख्ये महोत्सवे समीपमागते येषूर्यदा राजधानीमुपागतस्तदा यात्रिकगणैर्विहितं प्रभोः कीर्तनं श्रावं श्रावं ते प्रधानयज्वानोऽत्यन्तं चुक्रुधुः। किञ्च, बाह्याचारमूलकं

---

[85] श्री. येषू. मा., पृ. ८६.

धर्मतत्त्वं प्रत्नशास्त्रोक्तेन नूत्नेन तत्त्वेन निराकृत्य दुरात्मकास्तेऽस्माकं येषूपादाय द्रुह्यन्तस्तद्धाताय सुयोगमन्वेष्टुं प्रचक्रिरे। प्रभोरेव शिष्येषु कश्चन यूदाख्यो लोभाविष्टः स्वनाथं द्विषां हस्तेऽर्पयितुमकल्पयत्। एकदा येषूर्यदा प्रार्थनां कर्तुमुद्यतः कश्चिदुद्यानं प्राविशत्तदा तत्रानुयायिभिः समं यूदोऽपि समागमत्। एवं प्रभोः शिष्यैः साकं विपक्षिणां युद्धे प्रवृत्ते येषूं तेऽन्ततो निन्युः सद्म श्रेष्ठस्य यज्वनः। वधदण्डार्हं येषूं निर्णेतुमिच्छवस्ते यज्वानः सङ्गतं साक्ष्यं नावाप्य 'किं खृष्टः परमेशस्य सूनुस्त्वं विद्यसे न वा'[86] इति पप्रच्छ प्रधानो यज्वा। तदा प्रभुणा नितान्तं सारल्येन तानुद्दिश्यावाचि यत् –

"त्वदुद्दिष्टः स एवाहं, सर्वशक्तेश्च दक्षिणे।

नृपुत्रं द्रक्ष्यथासीनमायान्तं च घनोपरि।।"[87] इति।

परमेश्वरं निन्दत्येष येषूरिति मिथ्यावचनमुद्घोष्य विरोधान्धाः सभासदस्तं विनिर्णिन्युर्वधदण्डार्हम्। केचन निष्ठीवं प्रभोर्वक्त्रे निचिक्षिपुः, केचन वा चपेटैः प्राहरन्, अन्ये वा केचिदुपहासं च चक्रिरे। पीलातनामकः (Pilate) अध्यक्षस्तदा सर्वमाकर्ण्य श्रीयेषूं निर्दोषमवाप्य केवलं ताडयित्वा मुमोच। परन्तु येषूविरोधिनस्तदाभीष्टं हननादेशं न प्राप्य विविधेनोपायेन तं प्रजह्रुः। कीदृक् कष्टं प्रभुणा सोढमिति करुणातिकरुणा कविवागेवात्र प्रमाणम् –

"ततोऽध्यक्षः कशाघातैर्येषूं प्राहारयद् भृशम्।

सैन्याश्च निर्दयाः क्लिष्टं बाधितुं प्रारभन्त तम्।।

धूम्राभं राजवस्त्रं हि गृहीत्वा पर्यधापयन्।

किरीटं कण्टकैर्बद्ध्वा चार्पयंस्तस्य मस्तके।।

86 श्री. येषू. मा., पृ. १०३.

87 तदेव।

प्रणम्य चोपहासेन तिरस्कृत्य ववन्दिरे।

नमो यहूदिनां राज्ञे तुभ्यमित्यादिवादिनः।।"[88] इति।

पीलातस्याशेषेण प्रयत्नेनापि शूलेन वधार्थं पुराद्बहिः स्कन्धारूढशूलं तं निन्युस्ते पापिनो लोकाः। शिष्येण तच्छूलविषये जिज्ञासितो गुरुर्वर्णयति तच्चतुर्भिः श्लोकैः –

"शूलस्तैः रोमिभिर्द्वाभ्यां दारुभ्यां निरमीयत।

तदेकं लम्बमन्यच्च तिर्यक् तस्मिन्ननह्यत।।

यंत्रस्याधस्तने भागे दृढमारोपिते भुवि।

सार्द्धव्यामोन्नतं तस्थौ तिर्यक् काष्ठं महीतलात्।।

तस्मिंस्तिरश्चिकाष्ठे तु विततौ दोषिणः करौ।

लोहैः कीलैरवध्येतां पादौ लम्बे च दारुणि।।

विद्धाङ्घ्रिपाणयस्तद्वल्लम्बमानाश्च दोषिणः।

सुतीव्रां वेदनां भुक्त्वा शनैः पंचत्वमाप्नुवन्।।"[89] इति।

यातनां नितरां सहमानोऽपि स दयामयो जगत्त्राता दण्डपाशिकानां पामराणामपि तेषां कृते क्षमामेवाप्रार्थयत्। याजकाश्चोपहासच्छलेनाब्रुवन् यद्यः खल्वात्मानमेव रक्षितुं न समर्थः स कथमन्येषां रक्षां कुर्यादिति। एवमीश्वरहस्ते स्वमात्मानं समर्प्य येषूः नृरक्षायै स्वजीवनबलिं दत्वा मूर्द्धानं नमयन् प्राणांस्तत्याज। पश्चात् प्रभोर्भक्तो योसेफाख्यो महाजनः पीलातसमक्षमेत्य येष्वो देहं

[88] श्री. येषू. मा., पृ. १०९-११०.

[89] तत्रैव, पृ. ११३.

लब्ध्वा शुचिवस्त्रेण वेष्टयित्वा नवनिर्मिते शिलाखाते श्मशानेऽन्तः समार्पयदिति **'येष्वः प्राणसमर्पणमि'**ति पञ्चमोऽध्यायः।

च) *श्रीयेष्वः स्वर्गारोहणम्* - षष्ठोऽध्यायः

मृत्योः परं तृतीयेऽहनि श्मशानतः पुनरुत्थातेति प्रभोर्मुखनिःसृतं वचनं केन प्रकारेण सिद्धमभूदिति शिष्येण पृष्टो गुरुस्तत्सर्वं वक्तुमारेभे। शुक्रवासरे शूलबिद्धोऽभवद्येषूः। व्यतीते खलु विश्रामवासरे शनिवारे सूर्यवासरस्य प्रत्यूष एव महता भूकम्पेन तथा स्वर्दूतैश्च श्मशानमुखतः पाषाणापसारणेन प्रभुं द्रष्टुं समागताः काश्चित्स्त्रियो गुहाह्वरं प्रविश्य कञ्चन दूतं समासीनमालोक्य परमं विस्मयं ययुः। ततश्च येष्वा परिहितानि वासांसि भूमौ त्यक्तानीति विलोक्य योहन्नि-पत्राख्यौ (John & Peter) येषूशिष्यौ चमत्कृतौ पुनर्गेहमागतौ।

अन्यत्र च प्रभुविषयकं संलापं कुर्वन्तौ वर्त्मना यान्तौ विषण्णौ द्वौ शिष्यौ हठादेव ताभ्यां समं गच्छन्तं येषूं पश्यन्तावपि न विज्ञाय वार्तालापे रतावभूताम्। एवं स्वविषयिणीं वार्तामाकर्ण्य तद्भक्तानाञ्च भक्तित्वं तथा विश्वासपरत्वं सम्यङ् निरीक्ष्य येषूस्ताभ्यां निमन्त्रितो गेहं प्रविश्य ईश्वरस्तुतिपूर्वकं पूपं भङ्क्त्वा ताभ्यां ददौ। तस्मिन्नेव दिवसे सायंकाले शिष्यपरिवृतायाः कस्याश्चित् शालाया अवरुद्धेऽपि द्वारेऽन्तः प्रविश्य प्रभुस्तेभ्यः प्राचीनशास्त्रार्थे बोधशक्तिं प्रदाय नूतनस्य च धर्मस्य सर्वतत्त्वान्यशिक्षयत्।

एवं वासरेभ्यो दशभ्यः परमद्भुतैर्लक्षणैः सूचितः प्रभुः स्वशिष्यस्वान्तेष्वावातरत्। तथा च, ते महोद्यमाः शिष्या विदेशिभाषासु पारङ्गताः सन्तो न केवलं स्वीये देशेऽपि तु देशान्तरमेत्य प्रभोर्धर्ममकीर्तयन्। कल्पितान् स्वान् देवान् परित्यज्य सत्यमीश्वरं सेवध्वमित्युपादिशंस्ते विदेशीयान् मूर्त्यर्चकान् लोकान्। तेन नानाश्चर्यक्रियान्वितैर्वचनैराकृष्टा भूरयो लोकाः खृष्टे विश्वसितुं प्रारब्धा इति खृष्टधर्मस्योदयं वीक्ष्यमाणास्ते पामरा याजका बलात्कारेण तत्सर्वं रोद्धुं चेष्टमाना नानादण्डैस्तान् बबाधिरे। परन्तु यस्य धर्मस्य रक्षायै प्रचाराय वा खृष्टीयाः स्वप्राणानपि हसन्तस्तत्यजुः सोऽवश्यं भवेत् श्रेष्ठ इति मत्वापरेऽप्यनेके तमाश्रयन्नित्युत्तरोत्तरं खृष्टीयधर्मोऽयमैधतेति **'श्रीयेष्वः स्वर्गारोहणमि'**ति नामकः षष्ठोऽध्यायः।

छ) *खृष्टीयमतपारमार्थिकत्वम्* - सप्तमोऽध्यायः

खृष्टीये शास्त्रेऽस्मिन् सद्गतिविषयकं यत्तत्त्वं प्रतिपादितं तत्सर्वं किं मानवानां पारमार्थिकमुक्तिप्रदायकमिति जिज्ञासोदिता शिष्यमनसि। तदा गुरुस्तद्वाक्ये सम्मतिं सूचयन्नुवाच –

"श्रीखृष्टमाश्रितैः सद्भिर्याऽमुत्रारोक्ष्यते गतिः।

सा सिद्धीनां नृगम्याणां परमाऽस्ति न संशयः।।

यतो यां सद्गतिं दातुमीश्वरोऽवातरत् स्वयम्।

ततोऽन्या श्रेयसो मुक्तिर्नृजातेः संभवेत् कथम्।।

नृगम्या का परा सिद्धिरिति सम्यगवेद् हि सः।

नृजातेरुत्तमं श्रेयः सुकारुण्यादियेष च।।"[90] इति।

वस्तुतस्तु यत्र खृष्टीयशास्त्रे स्वर्ग्या गतिरेव श्रेष्ठेति कथ्यते, अन्यत्र धर्मशास्त्रेषु तु तत्र स्वर्ग्यं सुखं स्थूलं तुच्छं तथास्थायीति मन्यते विद्वद्भिरिति खृष्टशास्त्रस्य पारमार्थिकत्वं वक्तुमुद्यतेन कविना गुरुमुखेन स्वर्गशब्दस्य परमार्थो यथा सूचितस्तथैव बाह्यवस्तुभोगप्रधानिका न हि श्रीखृष्टोक्ता गतिरपि तु सा सम्पूर्णतया अन्तर्भावसंसिद्धिरूपिणीति प्रकृतार्थः समुपन्यस्तः।

पण्डितास्तु स्वीयमस्मदीयं देहमपवित्रं तथाशुद्धमिति मन्यन्ते। तर्हि पापादिमूलेन देहेन समं संयुक्तस्यात्मनः पारमार्थिकी सिद्धिः कथं स्यादिति शिष्यस्य दृढा शङ्का। तथाहि गुरुर्विविधेन युक्तिजालेन शिष्यचेतसि समुदितां शङ्कां दूरीकर्तुं प्राचेष्टत। तेन 'पापादिकारणं देहं स्वभावादिति यन्मतं' तत्तु खण्डयता समुपस्थाप्यते स्वयुक्तिः –

"आत्मनः शुद्धये देहमुक्तिरावश्यकी भवेत्।

---

90 श्री. येषू. मा., पृ. १२८.

इति केनापि निर्णेतुं प्रमाणेन न शक्यते।।

प्रवृत्तिर्ह्यात्मनो देहात् पृथगत्र न सिध्यति।

परत्रात्मा विना यंत्रात् सेत्स्यतीत्यूह्यते कुतः।।

किंचेश्वरः स्वयं स्वीयाज्ज्योतिर्धाम्नोऽवतीर्णवान्।

अधार्षीद् मानुषं देहमाचरीच्च सदेहवत्।।

वपुर्मात्रं महामूलमभविष्यद् मलस्य चेत्।

तदेश्वरो धरेत् तादृग् देहमित्थं न संगतम्।।”[91] इति।

मनुष्याणामादिमो यदा प्रभोराज्ञामत्यक्रमीत्तदैव शरीरनियन्तुरात्मनः स्वभावजा शक्तिरपागता, शरीरेन्द्रियाणि स्वाधीनत्वमाप्तुमचेष्टन्त। श्रीयेषूरेव नरविग्रहेण धराधाम्नि स्वकीयेन मृत्युना सर्वान् पापान्वितान् मनुष्यानुद्धृत्य प्राचीनं व्युत्क्रमं निरस्य नवीनं च सुक्रममस्राक्षीत्। अतः शरीरेण समं नित्यसम्बन्धे सत्यप्यात्मनः सिद्धौ न कापि हानिर्भवितेति खृष्टीयशास्त्रस्य पारमार्थिकत्वविषयिकी शङ्का कदा च न कार्येति ‘**खृष्टीयमतपारमार्थिकत्वमि**’त्याख्यः सप्तमोऽध्यायः।

ज) *प्रार्थनापद्धतिः* - अष्टमोऽध्यायः

सुतरामेव सरलया भाषया षट्त्रिंशत्श्लोकैः कविना प्रस्तुता खलु श्रीयेषूखृष्टस्य प्रार्थना यत्र प्रभोः खृष्टस्य गुणा एव प्राधान्येन गीताः सन्ति, तथा चास्माकं लौकिकानां मनुष्याणां कलुषचित्तत्वमप्यत्र प्रकाशितम्। दिङ्मात्रमुदाहरणं यथा –

“नमस्ते जगतां कर्त्रे शासित्रे पालकाय च।

दयामयाय पुण्याय नमस्ते परमात्मने।।

---

[91] श्री. येषू. मा., पृ. १३०-१३१.

क्व ते पवित्रताऽचिन्त्या क्व च पापिष्ठता मम।

तवाग्रे विनयं कर्त्तुं नार्होऽस्म्यंघो मलीमसः।।

क्व ते माहात्म्यमत्यन्तं क्व च मे तुच्छता विभो।

गुणांस्ते परमान् स्तोतुं ज्ञातुं वाऽप्यहमक्षमः।।

परन्तु कोऽस्ति दीनानामाश्रयस्त्वां विनेश्वर।

त्वमेको दुर्दशां वेत्सि त्वमेकस्त्रातुमर्हसि।।”[92] इति।

अपि च, खृष्टीयशास्त्रोक्तां परमां गतिमारुरुक्षुणा शिष्येण किं कर्तव्यमिति पृष्टो गुरुरुपदिदेश यत् श्रीयेषूं प्रत्यकुण्ठं विश्वासं हृदि निधाय स्वकृतानां पापानां स्खलनाय सर्वथा खृष्टधर्मोक्तवर्त्मना भृशमनुतप्यासत्पथं परित्यज्य भगवतस्त्राणकर्तुः सर्वशक्तिमतः प्रभोः श्रीयेषूखृष्टस्याश्रयः सर्वैः खार्ष्टैकैः सदाश्रयणीय इति। तथाह्याह कविर्म्यूरः –

“स्वीकृत्य स्वीयपापानि तद्धेतोरनुतप्य च।
श्रीयेषूं त्राणकर्तारं विश्वासेन समाश्रय।।
ततस्तेन समादिष्टां लब्ध्वा कोलालसंस्कृतिम्।
आत्मानं प्रभवे भक्तं सप्रकाशं समर्पय।।
स ह्येकः पाप्मनो हन्ता सिद्धेर्हेतुश्च विद्यते।
तद्द्वारमन्तरा कोऽपि परमार्थं न विन्दति।।
किन्तु स्वमात्रयत्नेन प्रसादादैश्वराद् विना।
विहायासत्पथं शिष्य त्राणं गन्तुं न शक्यसि।।
अतः प्रसादलाभाय प्रार्थनीयः परेश्वरः।”[93] इति।

---

[92] श्री. येषू. मा., पृ. १३४.

[93] तत्रैव, पृ. १३३.

अन्तिमे च श्रीयेषूं सम्बोध्य भक्तिपूर्णवचसा प्रभोः सकाशाद् यथा पारमार्थिकी दृष्टिः काङ्क्ष्यते तथैव संसारान्मनसो वियोजनमाध्यमेन परमात्मनि च तन्मानसं योजयितुं प्रार्थ्यते खलु स महात्मा श्रीखृष्ट इति '**प्रार्थनापद्धति**'र्नामाष्टमोऽध्यायः।

- **अन्वर्थसंज्ञात्वम्**

श्रीम्यूरपादैः प्रणीतस्यास्य *श्रीयेषूखृष्टमाहात्म्यम्* इति महाकाव्यस्याभिधात्रितयं सम्पूर्णग्रन्थस्य सूक्ष्मेक्षिकयावेक्षणादस्माकं नयनयोः पान्थायते। तानि च नामानि यथा –

क) *श्रीयेषूखृष्टमाहात्म्यम्* - काव्यस्यास्यादौ नामकरणपृष्ठे तथा पञ्चमतोऽन्तिमाध्यायं यावत् प्रत्यध्यायमन्तिमे नामैतदस्माभिरालक्ष्यते।

ख) *श्रीयेषूखृष्टमहात्म्यम्* - काव्यस्यास्य प्रथम-द्वितीयाध्याययोरन्तेऽवाप्यते खल्वेतन्नाम। परन्तु व्याकरणदृष्ट्यायमभिधासङ्गत इत्येव प्रतीयते। मन्ये मुद्रणप्रमादत एव 'माहात्म्य'-स्थले आकारराहित्येन उट्टङ्कणात् 'महात्म्यमि'ति मुद्रितं पदमेव दृष्टिपथमायाति।

ग) *श्रीमहामोक्तृयेषूखृष्टमाहात्म्यम्* - महाकाव्यस्यास्य तृतीय-तुरीययोरध्याययोः शेषेऽस्माभिरेतन्नाम दृश्यते। व्याकरणदिशा नितरामेव सङ्गतेयं संज्ञा श्रीयेष्वो महामोक्तृत्वं सूचयतीति कवेः परमकारुणिकं भगवन्तमीश्वरपुत्रं श्रीखृष्टं प्रति भक्तित्वमेव प्रकाश्यत इत्यत्र न सन्देहः।

श्रीयुक्तः येषूखृष्टः श्रीयेषूखृष्ट इति शाकपार्थिवादिवत्समासः, ततस्तस्य माहात्म्यमिति षष्ठीतत्पुरुषसमासे 'श्रीयेषूखृष्टमाहात्म्यमि'ति पदं निष्पन्नम्। माहात्म्यं नाम महत्त्वं, गुरुत्वं, यशः, कीर्तिर्वा। पुराणेष्वपि कस्यचिद्दैवतस्य ख्यातिं वर्णयता पुराणकृता माहात्म्यमिति पदस्य बहुशो व्यवहारो विहित इत्यालक्ष्यते। प्रसङ्गेऽस्मिन् प्रख्यातं 'दुर्गामाहात्म्यं' स्मर्यते। तत्रापि जगन्मातुर्दुर्गाया जयगीतिरेव गीतेत्यस्माभिः ज्ञायते। अत्रापि तथैव पुराणकारदिशा जगत्त्रातुः श्रीखृष्टस्य गुणगानमेव विधीयते गुरुशिष्यसंवादच्छलेन इत्यस्य काव्यस्यान्यतमं तावद् वैशिष्ट्यमिति तु सर्वथानुसन्धेयम्।

महाकाव्यं लक्षयता विश्वनाथेन 'साहित्यदर्पण'स्य षष्ठेऽध्याये सुस्पष्टतया महाकाव्यस्य नामकरणविषये व्यक्तीकृतं तावत्स्वमतम् –

'कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।'[94] इति।

अत्र लक्षणस्थं वृत्तपदं वर्णयता प्रख्यातबङ्गीयटीकाकृता श्रीहरिदाससिद्धान्तवागीशेन *साहित्यदर्पणस्य* 'कुसुमप्रतिमा'ख्यायां टीकायामाटीकितं यत् –

'अनयोर्वंशचरितशब्दपर्य्यन्तव्यवहारे तु वृत्तनामत्वम्।'[95] इति।

तथाह्यत्र म्यूरविरचिते काव्येऽपि नायकस्य श्रीयेषूखृष्टस्य चरितमाश्रित्यैवास्य नामकरणं खलु विहितं कविना। तेन श्रीयेष्वोऽपारा तथा जगन्मोहिनी प्रख्यातिश्चतुर्षु दिक्षु यथा सूचिता भवेत्तथा चाज्ञातखृष्टवृत्तान्तानां समेषां मनुजनूनां चेतसोऽभिनिवेशो यथास्मिन् समापतेदित्याकाङ्क्षमाणेन महाकविना जान्म्यूरवर्येण प्रभोः श्रीयेष्वो जीवनं तथा चरित्रमाधारीकृत्य प्रणीतस्यास्य महाकाव्यस्यान्वर्थं तथा गर्भितार्थप्रकाशकं नाम प्रादायि *श्रीयेषूखृष्टमाहात्म्यम्* इति मामिका निश्चिता मतिः।

- **छन्दोऽलङ्कारविमर्शः**

  **♣ छन्दोविमृष्टिः**

श्रीम्यूरपादैः प्रणीतेऽस्मिन् महाकाव्ये सर्वत्रैवानुष्टुप्छन्दसः प्रयोगोऽवलोक्यते। पुरातनवृत्तावलम्बिनि काव्येऽस्मिन् भगवतः श्रीयेषूखृष्टस्य पूततमं चरित्रमष्टभिरध्यायैः कविनोपवर्णितमित्यालक्ष्यते। वस्तुतस्तु पौराणिकवृत्तवर्णनावसरे कविनानुष्टुप्छन्दसः प्रयोग एव समुचित इति संस्कृतच्छन्दोग्रन्थानां मतम्। तथाहि म्यूर-वर्यैस्तु तदीयेऽस्मिन् काव्येऽनुष्टुप्छन्दसः श्रुतबोधानुसारि लक्षणमेवानुसृतमित्यवलोक्यते। काव्यस्यास्य मङ्गलाचरणश्लोको यथा –

---

[94] सा. द. (हरिदास.), ६.३०२.

[95] तत्रैव, ६.३०२, वृत्तौ।

"जगन्मोक्तुर्गुणान् गातुमुद्यतस्तनुवागहम्।

सार्थां मनोहरां वाणीमर्थये परमेश्वरम्।।"[96] इति।

अपि च, काव्यस्यास्योपान्तिमः श्लोकः –

"अन्धाय निर्मलां दृष्टिं देहि मे पारमार्थिकीम्।

मनो वियोज्य संसारात् परमात्मनि योजय।।"[97] इति।

♣ **अलङ्कारविचारः**

श्रीयेषूखृष्टचरितमाश्रित्य प्रवृत्तेऽस्मिन् जान्-म्यूर-प्रणीते प्रकृते महाकाव्ये यद्यपि नैवालङ्काराणां नैकेषां व्यवहारो दृग्गोचरीभवति, तथापि तत्र क्वचित् क्वचित् शब्दार्थालङ्काराणां प्रयोगो नितरामेव रम्यः। विशेषतया शब्दालङ्कारेष्वनुप्रासस्य प्रयोगे सुतरामेव पारदर्शी नः कविः। तथाहि प्रथमाध्याये येषूं वर्णयता कविनानुप्रासमुखेन निगदितम् –

"जगद्गुरोर्जगद्बन्धोर्जगन्मोक्तुर्जगत्प्रभोः।

जगत्कल्याणमूलस्य सर्ववंशोपकारिणः।।"[98] इति।

अत्र जकार-गकार-दकाराणां पौनःपुण्येनावृत्तेर्वर्णसाम्याद्वानुप्रासालङ्कारस्तु स्फुट एव। काव्यस्यान्यत्राप्यस्यालङ्कारस्य रमणीयः प्रयोगः सहृदयहृदयान् ह्लादयतीति सत्यम्। तद्यथा –

---

96 श्री. येषू. मा., पृ. १.

97 तत्रैव, पृ. १३९.

98 तत्रैव, पृ. ३.

"यथा प्रतीच्यलोकेषु तथा प्राच्येऽत्र भारते।

क्षितावैशावतारस्य मतमाशिश्रिये सदा।।"[99] इति।

'द्रष्टारस्त्वखिलास्त्रेसुस्तुष्टुवुश्च परेश्वरम्।'[100] इति।

एवमेवार्थालङ्काराणामुपमादीनां प्रयोगोऽपि न दुष्प्राप्यः। काव्यस्यास्योपदेशप्रदानमेव यतो हि मुख्यमुद्देश्यमतोऽलङ्कारां बहुलो व्यवहारोऽत्र नैवोचित इति हेतोरेव कविनेहाधिकतया अर्थालङ्काराणां प्रयोगो न कृतः। यद्यपि यत्र तत्राधिकाव्यं तेषां व्यवहारो नयनपथमुपैति। उपमानुप्राणितोऽर्थालङ्कारो यथा –

"ये च स्वेष्वर्पितां शक्तिं विफलीकुर्वते नराः।

अमुत्र दण्डमाप्स्यन्ते तेऽलसाः किंकरा इव।।"[101] इति।

- **वैयाकरणदिशा विमृष्टिः**

महाकविना जान्म्यूरेण कृतं *श्रीयेषूखृष्टमाहात्म्यम्* इति महाकाव्यमिदं व्याकरणव्युत्पत्त्यवाप्तये महदुपकारकमित्यत्र न संशीतिः। अत्र प्रायः समेषामेव लिट्-लुट्-लिङ्-लुङ्-लोटादीनां लकाराणां सुष्ठु प्रयोगः कविनामुना साधितः। विशेषतया वस्तुतस्तु लिट्-लकारस्य व्यवहारे कविः सिद्धहस्तः। यथा – सिषेविरे, चिचेष्टिरे, बबाधिरे, विव्यधुः, विव्यधुः, सेहिरे चुक्रुधुः चेत्यादयः।

एतद्व्यतीत्य प्रथमाध्यायस्यैकस्मिन् श्लोके कर्मत्वं तु लक्षणीयम्। वैदेशिकोऽपि स संस्कृतशास्त्रेष्वाप्तव्युत्पतिः व्याकरणशास्त्रस्य गूढातिगूढतत्त्वैः साकं परिचित इति प्रतीयते। पश्यन्तु तावन्म्यूरभणितिम् –

---

99 श्री. येषू. मा., पृ. १८.

100 तत्रैव, पृ. ४१.

101 तत्रैव, पृ. ८९.

“जगन्मोक्तुर्गुणान् गातुमुद्यतस्तनुवागहम्।

सार्थां मनोहरां वाणीमर्थये परमेश्वरम्।।”[102] इति।

अत्र याचनार्थकस्य अर्थ्-धातोः प्रधानं कर्म हि ‘वाणीमि’ति पदम्। सा वाणी परमेश्वरात् प्रार्थ्यते इति भावार्थः। अतो गौणकर्मणोऽत्रापादानत्वं स्पष्टम्। तथाहि ‘अकथितं च’[103] इति सूत्रेणात्र ‘परमेश्वर’-पदे अकथितकर्मत्वं ध्रुवमिति शेषः।

अस्मिन्नेव श्लोके ‘तनुवागि’ति पदं तु द्रष्टव्यम्। अत्र बहुव्रीहिसमासस्यापूर्वः प्रयोगो नयनपथमुपैति। तन्वी वाक् यस्य स इति विग्रहे बहुव्रीहिसमासे निष्पन्नः शब्दः कविमेव बोधयति बहुव्रीहेरन्यार्थप्रधानत्वात्। मृदुभाषीत्यर्थः पदस्यास्य।

प्रत्ययानामपि प्रयोगो नितरामेव विशेषतामाधत्ते। तथाहि ‘विफलीकुर्वते’ ‘सूक्ष्मीकृतमि’त्यादिषु स्थलेषु च्वि-प्रत्यस्य व्यवहारः सुतरामेव रमणीयः।

लिट्-लकारमतिरिच्यान्येषामप्यप्रचलितानां लृङादिलकाराणां व्यवहारेऽपि कविरयं निष्णातः। तथाह्यालोच्यमानस्य महाकाव्यस्य तृतीयाध्याये मार्थावचसा यत्र कविनोक्तम् –

“वत प्रभो भवान् पूर्वं यद्यस्थास्यद् इह स्थले।

तदा स्वामिन् मम भ्राता नामरिष्यत् कदाचन।।”[104] इति।

---

102 श्री. येषू. मा., पृ. १.

103 पा. सू., १.४.५१.

104 श्री. येषू. मा., पृ. ४५.

तथाह्यत्र 'अस्थास्यत्' तथा 'अमरिष्यत्' इति पदद्वयस्य लृङ्-लकारे प्रयोगोऽनुसन्धेयः। अत्र पाणिनीयं सूत्रं हि – 'लिङ् निमित्ते लृङ् क्रियातिपत्तौ'[105] इति।

संस्कृतालङ्कारिकदिशा काव्यस्यास्य समीक्षात्र न कृता यतः काव्यमिदमाश्रित्य समीक्षायै एव यादवपुरविश्वविद्यालयतः एम.फिल. इत्युपाधिरधिगता मया। अन्तिमे वक्तुं शक्यते यद् रसादीनां यथायथं व्यवहारे, विषयवस्तुनो विन्यासे, विविधानां पात्राणां चरित्रचित्रणे, प्रसादगुणस्य सुष्ठु प्रयोगे महाकाव्यमिदं सुतरामेवान्यानि लौकिकसंस्कृतकाव्यानि अतिशेत इत्यत्र किं चित्रम् ?

## ५.२. *मतपरीक्षा*

हिन्दुखृष्टधर्मयोर्मूलभूततत्त्वान्याश्रित्य १८३९-संवत्सरतः १८४५-संवत्सरमध्ये वादानुवादप्रसङ्गः समग्रेऽपि भारतवर्षे प्रख्यातिं गतः। विशेषतया संस्कृतभाषायां रचितैर्वादग्रन्थैर्विषयस्यास्य पल्लवनात्समेषां सकाशे प्रसङ्गोऽयं नितान्तं रुचिकरः सञ्जातः। वस्तुतः जान्-म्यूर-वर्येण १८३९-खृष्टाब्दे *मतपरीक्षा* इति नाम्ना कश्चन ग्रन्थोऽलेखि यत्र तेन भारतीयशास्त्राणां वेदादीनां विचारो विहितः। १८४०-खृष्टाब्दाभ्यन्तरे तेनास्य ग्रन्थस्य साकल्येन त्रीणि संवर्धितसंस्करणानि प्रकाशितानि। अत्रोल्लेख्यं यत् त्रयो हिन्दुपण्डिता म्यूरमतखण्डनाय त्रीणि पुस्तकानि रचयामासुः संस्कृतगिरैव। तत्रादौ सोमनाथः १८३९-संवत्सरे *मतपरीक्षाशिक्षा* इति ग्रन्थं व्यरचयत्। ततः हरचन्द्रतर्कपञ्चानन-नामा कश्चन बङ्गीयविद्वान् *मतपरीक्षोत्तरम्* इति संज्ञकं काव्यं प्रणिनाय १८४०-खृष्टाब्दे । ततश्च नीलकण्ठ-गोरे-महोदयेन १८४४-संवत्सरे *शास्त्रतत्त्वविनिर्णयः* इति शीर्षको ग्रन्थो विरचितः। अन्तिमे च, म्यूरमतं समर्थयता हरचन्द्रमतं च दूषयता श्रीमता प्रख्यातपण्डितेन कृष्णमोहन-व्यानार्जी-पादेन बङ्गगिरा *सत्य स्थापन ओ मिथ्या नाशन* इत्याख्यया कश्चन ग्रन्थोऽरचि १८४१-खृष्टाब्दे ।

प्रख्यातेन ऐतिहासिकेन श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण ग्रन्थमिममुपजीव्य गवेषणाकार्यम् अपूर्वं (पि एइच्. डि.) कृतं पेनसिलभेनिया-विश्वविद्यालयतः। तत्कर्म पुस्तकाकारेणापि प्रकाशितं वर्तते

---

[105] पा. सू., ३.३.१३९.

*Resistant Hinduism: Sanskrit Sources on Anti-Christian Apologetics in Early Nineteenth-century India* इति शीर्षकेण। तदर्थं *मतपरीक्षा* इति ग्रन्थमाश्रित्याधिकतया किमपि नालोच्यतेऽत्र चर्वितचर्वणभिया, केवलं केचन विशिष्टा विषया एवात्र समालोच्यन्ते। यथा कृष्णमोहनकृतस्य *सत्य स्थापन ओ मिथ्या नाशन* इत्याख्यस्य बङ्गभाषायां विरचितस्य ग्रन्थस्य समीक्षान्यत्र कुत्रापि न सुलभेति कृत्वात्रालोच्यते। विस्तृततया *मतपरीक्षाख्यस्य* म्यूरकृतग्रन्थस्य विषये ज्ञानप्रेप्सुभिरुपर्युक्तं श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण प्रणीतमाङ्गलभाषाबद्धं पुस्तकं द्रष्टव्यम्।

- **विषयवस्तु**

✓ *मतपरीक्षा – भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः*

ग्रन्थोऽयं श्लोकात्मकत्वाद्यद्यपि काव्यसंज्ञात्वमाप्तुमर्हति, तथाप्यस्य वस्तुगतदिशा विचारे विहिते ज्ञायते यदिदं सम्पूर्णतया दर्शनशास्त्रपदवीमाधत्ते। अत्र केनचिद्वेदविद्वता समं कस्यचित्सत्यार्थिनः परस्परमालापः प्रस्तुतः। परन्त्वनेनैवालापेन भारतस्य प्रायः समेषामेव प्रधानशास्त्राणां समालोचनात्मकस्तर्कः पुरतोऽस्मान् समुपस्थितः। वस्तुतो म्यूरपादस्य कृतिरियं भारतीयसंस्कृतेस्तथैतिह्यस्य मूलस्तम्भभूतेषु वेदाद्युपनिषत्पुराणादिषु शास्त्रेषु निहितानां निगूढानां तत्त्वानां सविचारमालोचनमेव प्रस्तुतीकरोति। अपि च, येभ्यः खलु शास्त्रेभ्यो वचनानि विचारसौविध्यार्थं म्यूरपादैरिह साधूद्धृतानि, तानि तावत् शास्त्राणि यथा –

| भारतीयशास्त्रम् | | भारतीयशास्त्रम् | |
|---|---|---|---|
| १. | *ऋग्वेदः* | २. | *ऐतरेयब्राह्मणम्* |
| ३. | *विष्णुपुराणम्* | ४. | *वायुपुराणम्* |
| ५. | *मत्स्यपुराणम्* | ६. | *ब्रह्मवैवर्त्तपुराणम्* |
| ७. | *पद्मपुराणम्* | ८. | *लिङ्गपुराणम्* |
| ९. | *भागवतम्* | १०. | *रामायणम्* |
| ११. | *महाभारतम्* | १२. | जैमिनिकृतं *पूर्वमीमांसूत्रम्* |
| १३. | विश्वनाथविरचिता *न्यायसूत्रवृत्तिः* | १४. | *मनुसंहिता* |
| १५. | *रघुवंशम्* | १६. | *विष्णुधर्मतन्त्रम्* |

एवं नानाशास्त्रेभ्यः समाकलितान्युद्धरणान्यतिरिच्यापि नवत्यधिकाष्टशतसंख्यकैरुपजात्यनुष्टुब्भ्यां छन्दोभ्यां प्रणीतेऽस्मिन् काव्यात्मके शास्त्रे विविधभारतीयशास्त्रेभ्यः संगृहीतानां मतनिचयानां विचारात्मिका परीक्षा विहितेत्यस्य *मतपरीक्षा* इत्यन्वर्थसंज्ञा संज्ञितेत्यत्र न स्यात्कापि विप्रतिपत्तिः।

✓ *मतपरीक्षा – ख्रिस्तीयमतप्रदर्शनात्मको द्वितीयः खण्डः*

म्यूरपादैः प्रणीताया *मतपरीक्षा*या द्वितीयः खण्डः ख्रिस्तीयमतविचारपरः। अत्रापि पूर्ववदेव वेदविद्वता सह सत्यार्थिनः संलापः कविना समुपस्थापितः। परन्त्वस्मिंस्तु विस्तरेण खृष्टवृत्तान्तं तथा तद्धर्मस्योद्भवं वर्णयति कविः सत्यार्थिमुखेन। धर्मस्यास्य सर्वत्र प्रचारः, श्रीयेषूखृष्टस्याद्भुतकर्माणि, तेषां समालोचना, यिहूदीनामितिहासः, येष्व ईश्वरपुत्रत्वतत्त्वं, खृष्टधर्ममाश्रित्य विविधैः खृष्टीयभक्तैः पुस्तकप्रणयनं तन्मतानि च, भारतीयशास्त्रेषु विशेषतया पुराणादिषु प्रख्यातानां दैवतानां मानववासनापूर्तित्वेऽसामर्थ्यं, श्रीयेष्वः श्रीकृष्णादिचरित्रापेक्षया वैलक्षण्यं, वेदान्तिनां भगवता सममेकीभवनतत्त्वस्यासम्भवपरत्वं, जगतो मुक्तिप्रदातुः श्रीयेष्वः शरणागतित्वप्रशंसा तथा तस्य सततं प्रार्थना चेत्यादिको विविधो विषयः कथोपकथनात्मकेन वाग्विन्यासेन नितरामेव विस्तृततया कविना छन्दोभिरनेकाभिर्विचारितो नवत्युत्तरनवशताधिकैकसहस्रसंख्यकैः (१९९०) श्लोकसमूहैः। अत्र कविकृतौ येषां खृष्टीयमतावलम्बिनां प्रख्यातचरित्राणां मतानि समुद्धृतानि, तानि नामतः समुपन्यस्यन्तेऽधस्तात् –

| प्रख्यातखृष्टीयचरित्रम् | | प्रख्यातखृष्टीयचरित्रम् | |
|---|---|---|---|
| १. | श्रीयेषूः | २. | श्रीपौलः |
| ३. | योहन्निः | ४. | ऐरेणायः |
| ५. | लूकः | ६. | रौम्यः क्लेमत् |
| ७. | इग्नात्यः | ८. | क्वाद्रातः |
| ९. | पलुकार्पः | १०. | युस्तीनः |
| ११. | यूसेब्यः | १२. | ओरिगिणिः |
| १३. | कुप्रियाणः | १४. | तर्त्तुल्याणः |
| १५. | मार्था | १६. | मरीया |

- **मामकीनं समीक्षणम्**

भारतवर्षे समागतानां खृष्टीयधर्मसम्प्रदायानां प्रधानं लक्ष्यमेवासीत् खृष्टधर्मस्य प्रचार इति। ते विश्वसन्ति स्म यद्भारतीया वेदादीनां वचांसि सश्रद्धं स्वीकुर्वन्ति यतस्तानि संस्कृतभाषया निगदितानीति। परन्तु तैर्नावगतं यत्तेषां तत्त्वानामैश्वरिकतत्त्वप्रतिपादनत्वात् परमपुरुषार्थमोक्षतत्त्वाधायकत्वाद्वा महत्त्वमस्तीति। खृष्टीयानां भारतागमनाद्बहुपूर्वमपि विविधासु प्रादेशिकभाषासु तत्त्वानामेतेषां प्रचारः साधुभिर्विहित इति तत्प्रान्तीयभाषानिबद्धग्रन्थानामपि समानमेव गुरुत्वम्।

परन्तु पूर्वोक्तं मूलभावं बोद्धुमसमर्थो जान्-पादः स्वयमेव संस्कृतभाषायामनुष्टुप्छन्दसा खृष्टीयमतानि प्रतिपादयितुमना भारतीयमतानि च दूषयितुकामो *मतपरीक्षा* इति खण्डद्वितयोपेतं विशालं ग्रन्थमेकं प्राणैषीत्। कर्मण्यस्मिन् प्रकाण्डे म्यूरवर्येण दरिद्राणां भारतीयविदुषां साहाय्यमपि प्राप्तमिति केषाञ्चिन्मतम्। तथाहि सीतारामगोयेल-पादेन निगदितं तदीये ग्रन्थे –

“Muir was out to impress Hindu Pandits with his mastery of Sanskrit literature. The mastery came easy to him, as to many other Christian scholars and missionaries, because he could employ poor Hindu Pandits to find him the references he fancied.”[106] इति।

म्यूरवर्येण स्वकीये सर्वस्मिन्नपि ग्रन्थे प्रधानसत्यधर्मशास्त्रस्य त्रीणि वैशिष्ट्यानि स्थिरीकृतानि। प्रथमतः, अद्भुतकर्मणां साधनाय भगवति सामर्थ्यम्। द्वितीयतः, शास्त्रे प्रतिपादित एक एव ईश्वरः। तृतीयतश्च, धर्मशास्त्रस्य सर्वजनीनता। अयं तार्किकोपायः खृष्टीयधर्मे ‘Evidential Apologetics’[107] इत्याख्ययाख्यायते। अनेन धर्मतत्त्वमीमांसावर्त्मना श्रीम्यूरेणात्यन्तं सारल्येनैव खृष्टधर्मीयशास्त्रस्य केवलस्य ऋतत्वं प्रकाशितम्, अन्येषां धर्मीयशास्त्राणामनृतत्वञ्च प्रतिपादितम्। किं बहुना, स पुराणस्य विश्वसृष्टितत्त्वस्याप्यसत्यतां प्रकटीकर्तुमैच्छत्। मन्ये तेन विस्मृतं यत्

---

[106] Goel, Sita Ram. *History of Hindu-Christian Encounters (AD 304 to 1996)*, p. 65.

[107] तदेव.

ग्यालिलिओ-वर्येण तथा कोपार्निकास-वर्येण केन प्रकारेण खृष्टधर्मीयविश्वसृष्टेस्तत्त्वं सप्रमाणं खण्डितमिति म्यूरमतं समालोचयता वक्रोक्त्या श्रीसीतारामगोयेलवर्येणोररीकृतं स्वीये ग्रन्थे –

"…Muir was deliberately dishonest. He criticised the cosmography of the Puranas as erroneous. Surely he must have known what Galileo and Copernicus had done to the cosmography of the Bible and how they had suffered persecution at the hands of the Church."[108] इति।

- सोमनाथस्य *मतपरीक्षाशिक्षा*

म्यूरप्रदत्तप्रत्याह्वानं स्वीकुर्वता महाराष्ट्रीयपण्डितेन सुबाजि-बापुना *मतपरीक्षाशिक्षा*[109] इति ग्रन्थः प्रकाशितः सोमनाथ इति छद्मनाम्ना। स यतो ह्याङ्गलसर्वकारीयसेवकस्य प्राच्यतत्त्वविदः श्री-ल्यान्सेलट्-उइल्किन्सन्-वर्यस्य सकाशे ज्योतिषशास्त्रस्यानुवादकत्वेन कार्यं कुर्वन्नासीत्, तस्मात्स्वनाम्नः प्रकाशः प्रकृतग्रन्थकृत्त्वेन नैवोचितो बभूव। अत एव छद्मनाम्नो ग्रहणम्। आङ्गलप्रशासकेन सह कार्यकरणाय भारतीयाः सतीर्था यद्यपि तं दूषयन्ति स्म, परन्तु तस्य खृष्टीयधर्मविषयाणां ज्ञानं तु सम्यग् जातम्। येन ग्रन्थस्यास्य विरचने सौविध्यमेवाभवत्तस्य।

अध्यायेषु त्रिषु विभक्तेऽस्मिन् *मतपरीक्षा* इत्याख्ये ग्रन्थे साकल्येन सन्ति सप्ताधिकैकशतसंख्यकाः श्लोकाः। म्यूरप्रयुक्तरचनारीत्यैव गुरुशिष्यसंवादमाध्यमेन प्रणीतोऽयं ग्रन्थः। भगवतो येष्वोऽद्भुतकर्मणां कापि विशिष्टता नैवास्ति यतः सर्वेऽपि भगवदवताराः स्वीयजीवद्दशायामेवंविधानि कार्याणि कृतवन्त इति सोमनाथेनादावेव प्रतिपादितम्। तथा च धर्मशास्त्रस्य सर्वजनीनतापि न सम्भवति। तथा सति भगवान् कथं सवान् जनान् समानचारित्रिकवैशिष्ट्योपेतान्न कृतवान् ? तदर्थमेव परमश्वरमो वा प्रभुस्त्वेक एव, स यथा बौद्धधर्मे गौतमबुद्धः, महम्मदीयानां शास्त्रे आल्ला, खृष्टीयशास्त्रे येषूः तथैव भारतीयशास्त्रेषु वेदपुराणतन्त्रादिषु परमेश्वर-शक्ति-श्रीश-गिरीशादिभिः नानाविधैर्नामभिः पूज्यते। सोमनाथः खृष्टीयमतानि खण्डयन् गवादिपशूनां हत्यादिविषयं पापमूलमुवाच, तन्निषेधञ्च पौनःपुण्येन

108 Goel, Sita Ram. *History of Hindu-Christian Encounters (AD 304 to 1996)*, p. 65.

109 ग्रन्थस्यास्यैका प्रतिलिपिरेव प्राप्यते इंलण्डदेशस्य लण्डननगरस्थिते India Office Library इत्याख्ये ग्रन्थागारे।

कृतवान्। यतस्ते पशव एव कृषिकर्मणि साहाय्यं विदधति, पानीयं दुग्धमपि प्रददति। यद्यपि भारतीयशास्त्रेऽहिंसायास्तत्त्वमितोऽपि गूढं वर्तते, तथापि तेन खृष्टीयानां सरलतया बोधाय पशुहननप्रसङ्गो लौकिकदृष्ट्यैवाधिग्रन्थं प्रतिपादितः।

अन्तिमे च, अन्यधर्मीयमतानां दूषणाय तत्परान् खृष्टीयमतप्रचारकानुद्दिश्य तस्य स्पष्टा गीः यत् स्वीयधर्म एव समेषां सकाशे श्रेयस्करः, परधर्मीयमतनिरासनं यथानुचितं तथैव स्वधर्मत्यागोऽपि नैव काम्यः। अतो हे खृष्टीयमतसेवकाः! परधर्मीयजनानां धर्मान्तरसम्पादनेनालम्, परधर्मं प्रति सहिष्णुभिर्भाव्यं तथा च स्वधर्माचरणेन सुखिनो भूत्वा अहिंसामार्गः सदाश्रयणीयः। तदुच्यते –

"You should never revile people who are satisfied with their own religion... For each person his own religion is best; the same religion would be perilous for another person."[110] इति।

- हरचन्द्रतर्कपञ्चाननस्य *मतपरीक्षोत्तरम्*

म्यूरप्रणीताया *मतपरीक्षा*याः द्वितीयसंस्करणप्रकाशनात्प्रागेव बङ्गीयविद्वता श्रीहरचन्द्रेण प्रणीतमिदं लघुकाव्यं *मतपरीक्षोत्तरम्* इति। ग्रन्थेऽस्मिन् सन्ति साकल्येन बङ्गलिप्या प्रकाशिताः सप्तत्रिंशदधिकैकशतसंख्यकाः श्लोकाः। परिच्छेदाभ्यां द्वाभ्यां विशिष्टेऽस्मिन्ननुष्टुब्वृत्तोपेते ग्रन्थे गुरुशिष्ययोः संवाद एव पल्लवितः इति म्यूरप्रयुक्तकाव्यप्रणयनरीतिरेव ग्रन्थकृतानुसृता। आङ्गलभाषायामालिखिता पृष्ठद्वयात्मिका प्रस्तावना ग्रन्थमिमं पुरस्करोति। एकस्यैव काव्यस्य प्रणेतृत्वेनास्य कवेः परिचितिः, नान्यत्किमपि तथ्यमस्य कवेः प्राप्यते। दारिद्र्यकारणात्तेन लघुतयैव म्यूरकाव्यस्य खण्डनं विहितम्, यतः मुद्रणव्ययभारभरणं नितरामेव दुष्करमासीत्तस्य कृते। तथाहि तेन स्पष्टमुदीरितं यत् –

"तस्माद्विना वेतनेन न शक्ताः क्रमिकोत्तरे।

न वा मुद्रार्थमेतस्य व्ययं कर्त्तुं पुनः पुनः।।

---

[110] Goel, Sita Ram. *History of Hindu-Christian Encounters (AD 304 to 1996)*, p. 67.

क्रियते यदि तेनैव श्रमव्ययविशोधनं।

तदाहं सर्व्वयत्नेन नियुक्तोऽस्म्यत्र कर्म्मणि।।"[111] इति।

'अस्माकं धर्ममालम्ब्य चिरं व्याप्य सुखीभव'[112] इति ब्रुवन्तः खृष्टधर्मप्रवर्तकाः नगरे राजमार्गे आपणे सर्वत्रैव क्रोशन्ति। धूर्तानां तेषां मायाजाले पतन्तः साधारणा दरिद्रा भारतीयाः खृष्टीया भवन्ति। तथाह्याह कविः पञ्चाननः –

"केवलं धूर्त्तपृष्टानां मायाजाले पतन् जनः।

मद्यमांसादिलोभेन पृष्टकन्यादिरूपतः।।

मोहितो भोगलोभेच्छुरविचार्य्य स्वकं मतं।

खृष्टधर्म्मस्य दोषं वा नावेक्ष्य खृष्टिको भवेत्।।"[113] इति।

खार्ष्टं वेदोक्तं च मतं विचारयितुं प्रवृत्तः हरचन्द्रो वक्ति यद् ग्रन्थे यदि विश्वासोऽस्ति तदा सृष्टिकालादिचलितत्वाद्वेद एवास्माभिः सर्वैरबाधतो मान्योऽवलम्बनीयश्च। वेदार्थस्य दुरूहत्वात्तस्य टीकास्वरूपतः पुराणस्मृतिग्रन्था विरचिताः। वेदप्रामाण्यात्तेषामपि प्रामाण्यं स्वीकार्यं सुधिभिः। पुराणस्मृतितन्त्रादिषु परस्परविरोधो यद्दृश्यते, तद्विषयं स्पष्टीकुर्वता पञ्चाननो ब्रूते यद् यो जनो यत्पथं तस्य श्रद्धाविवृद्धये समातिष्ठेत्, स तत्पथस्य प्रशंसां विदधाति, परपथं निन्दति। एवं देवानां स्तुतिनिन्दयोः प्रवृत्तिर्लोके सम्मतास्त्येव। तथाह्युदीरितं हरचन्द्रेण स्वकीये *मतपरीक्षोत्तरम्* इति ग्रन्थे –

ब्रह्मोपासनमेवास्ते मुख्यं शास्त्रेषु दर्शितं।

---

111 *मतपरीक्षोत्तरम्*, पृ. १६.

112 तत्रैव, पृ. १.

113 तदेव.

तस्य दुःसाध्यताहेतोर्मूर्खाणां दुर्लभा गतिः।।

अतः साकारदेवस्य भजनं क्रियते भुवि।

तेन मूर्खस्य लोकस्य मोक्षप्राप्तिः शनैर्भवेत्।।

यथा समुद्रो गन्तव्यो नानानद्यादिवर्त्मना।

तथा ब्रह्म समासाद्यं शिवविष्ण्वादिसेवया।।[114] इति।

सनातनधर्मस्य दश लक्षणान्यपि तेन प्रतिपाद्य खृष्टीया यथा तेषां विशुद्धचेतसा पालनं कुर्युस्तथोपदेशः प्रदत्तः। तेन च ते परजन्मनि हिन्दुत्वं प्राप्नुयुरित्यपि तन्मतम्। तथाह्याह पञ्चाननः –

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणं।।

एवं साधारणैर्धर्म्मैर्यापिताशेषजीवनाः।

परजन्मनि हिन्दुत्वं प्राप्य धर्म्माधिकारिणः।।"[115] इति।

ग्रन्थस्य द्वितीयपरिच्छेदे खृष्टधर्मस्य दोषाः संशयाश्च तेन सम्यक् प्रकटीकृताः। अन्तिमे खृष्टधर्मप्रचारकान् प्रति हरचन्द्रस्य प्रत्याह्वानं ध्वनितं यत् खृष्टधर्मस्य सत्यत्वं वेदोक्तधर्मस्य च मिथ्यात्वं यदि खृष्टीयैः सयुक्ति बोधयितुं शक्यते तदा सबान्धवः स खृष्टधर्मं स्वीकुर्यादिति। तदुच्यते तेन –

"खृष्टधर्म्मस्य सत्यत्वं मिथ्यात्वं वेदवर्त्मनः।

यदि बोधितमेव स्यात्तदाहं बन्धुभिः सह।

---

114 *मतपरीक्षोत्तरम्*, पृ. ४.

115 तत्रैव, पृ. ८.

खृष्टधर्म्मं ग्रहीष्यामि प्रतिज्ञेयं कृता मया।।”[116] इति।

- कृष्णमोहनव्यानार्जी-वर्यस्य *सत्य स्थापन ओ मिथ्या नाशन*

हिन्दुकुलोद्भवाः पण्डिता जात्यभिमानेन मात्सर्येण चोन्मत्ताः श्रुतिस्मृतिपुराणादिविरुद्धशास्त्रं वीक्ष्य तुच्छज्ञानेन तद्विषयकं ज्ञानं न लब्ध्वैव तन्मतखण्डनाय तत्परा बभूवुरिति श्रीकृष्णमोहनमतिः। तेष्वन्यतमो भवति बङ्गीयब्राह्मणः श्रीहरचन्द्रतर्कपञ्चाननः। स म्यूरमतं खण्डयन् *मतपरीक्षोत्तरमि*ति ग्रन्थं प्रणिनाय १८४०-संवत्सरे। पञ्चाननप्रणीतग्रन्थस्यास्य बङ्गभाषयानुवादोऽपि तत्कालप्रसिद्धस्य *प्रभाकर* इत्याख्यस्य बङ्गीयसंवादपत्रस्य सम्पादकेन समादरपूर्वं प्रकाशितः। न केवलं पञ्चाननः, अपि च तदानीन्तनबङ्गदेशे सुतरामेव विख्यातो वाग्बाजारनिवासी श्रीयुतः बाबु-काशीनाथवसु-महोदयोऽपि गौडीयभाषया खृष्टधर्मविपरीतमतं प्रकाशयन् ग्रन्थमेकं प्रकाशयामास। तस्मात्तयोः पञ्चानन-काशीनाथयोर्ग्रन्थयोः मतखण्डनपरो म्यूरकृतमतपरीक्षोक्तमतमण्डनपरश्च प्रकृतो ग्रन्थः १८४१-खृष्टाब्दे कृष्णमोहनेन बङ्गभाषया प्रणीतः *सत्य स्थापन मिथ्या नाशन* इति।

हरचन्द्रतर्कपञ्चानेन खृष्टीयकन्यानां रूपेण मोहितो जनः खृष्टिको भवतीति यदुक्तं, तन्मतं खण्डयन् कृष्णमोहनो वक्ति यत् – प्रथमतः, महानगर्यामस्यां खृष्टीययाजकवर्गेषु सुतरामेवात्यल्पा जनाः सन्ति येषां विवाहयोग्याः कन्या विद्यन्ते इति। द्वितीयतः, एतावत्कालपर्यन्तं कलिकातास्थसाहेबजनाः बङ्गीयजनैः साकं तादृक् सौहार्द्यं न संस्थापितं येन तत्कन्यानामुद्वाहार्थं स्वाभिलाषं प्रकाशयेयुरिति। अतस्तर्कपञ्चाननः स्वेच्छानुसारं पञ्चाननः सन् मिथ्याकटुवाग्जालोपेतं स्ववक्तव्यं यदि प्रकटीकुर्यात्, तेन तस्य तर्कपञ्चाननत्वं नैव कदापि प्रमाणीभवति।

ब्राह्मणादीनां श्रेष्ठत्वं प्रतिपादयता हरचन्द्रेण शूद्रादिजातिं प्रत्युद्घोषितं यद्विजादीनां पादपृष्टोदकपानेन शूद्रादीनां पुण्यं जायत इति। यथोच्यते –

[116] *मतपरीक्षोत्तरम्*, पृ. १६.

"पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे।

सागरे सर्व्वतीर्थानि पदे विप्रस्य दक्षिणे।।"[117] इति।

अतो यच्छास्त्रं कस्याश्चिद् जातेः प्राधान्यं प्रकटीकर्तुं जात्यन्तरं दूषयति तच्छास्त्रं निःसन्देहतया दुर्वृत्तैः धूर्तैश्च जनैः प्रणीतमिति कृष्णमोहनस्य सुनिश्चितो राद्धान्तः।

अधिग्रन्थं कृष्णमोहनवर्येण श्रीकाशीनाथवसुप्रदत्तोत्तरस्यापि प्रत्युत्तरं प्रस्तुतम्। खृष्टीयहिन्दुधर्मयोः मध्ये यदन्तरं वर्तते, तद्वर्णयितुकामो यदि केवलमिन्द्रियसुखस्यानित्यत्वं कोऽपि व्याख्यायते, तदा तद्व्याख्यानमसम्पूर्णं भवतीति कृष्णमोहनमतम्। खृष्टस्य शिष्याः पार्थिवं सुखं नैवाकाङ्क्ष्यते। पृथिवीस्थं द्रव्यं प्रत्यासक्तिस्तेषां यथा न जायेत तदर्थं प्रभुणा पौनःपुण्येन स्वर्गीयानन्दावाप्तिं व्याख्याय परकालीनविभवप्रत्याशाविषयो दृढीकृतः। तथाहि काशीनाथकृतपुस्तके सांसारिकसुखस्य क्षणत्वं यदालोचितं, तेन खृष्टधर्मस्य दोषं तथा हिन्दुधर्मस्य गुणं प्रमाणीकर्तुं न शक्यत इति स्पष्टतया प्रतिपादितं कृष्णमोहनवर्येण।

ग्रन्थस्यान्तिमे स हिन्दुकुलोद्भवभद्रसन्तानादिमुद्दिश्य वक्ति यत् सत्यान्वेषणं न कृत्वा धर्मविषये कुतर्कं कुर्वन् केवलं विवादिनं परास्तं कर्तुं यदि कोऽपि प्रयतेत, तस्य तत्त्वज्ञानावाप्तिर्न कदापि सम्भवतीति।

- नीलकण्ठस्य *शास्त्रतत्त्वविनिर्णयः*

महाराष्ट्रीयचित्पावनब्राह्मणकुलोत्पन्नो नीलकण्ठशास्त्री वाराणस्यां षडशीत्यधिकसप्तशतसंख्यकैः अनुष्टुब्वृत्तैः ग्रन्थमिमं १८४४-खृष्टाब्दे प्रणिनाय। भारतशासनसेवातन्त्रे विशिष्टपदभाजा श्री-जान्म्यूरेण सुरगिरा प्रणीतस्य प्राचीनभारतीयधर्माचारदर्शनादिखण्डनखृष्टीयधर्मतन्त्रमण्डनपरस्य *मतपरीक्षा* इत्याख्यस्य ग्रन्थस्य निराकरणात्मकोऽयं ग्रन्थः *शास्त्रतत्त्वविनिर्णयः* इति। तथाहीह प्राचीनभारतीयमतानां मण्डनं तथा खृष्टीयमतानां खण्डनं च ग्रन्थकृता समीचीनतया

[117] Banerjea, Krishna Mohan. *Satya Sthāpana O Mithyā Nāśana*. 1841, p. 12.

कृतमित्यालक्ष्यते। ग्रन्थेऽस्मिन् सन्ति षडध्यायाः। अधिग्रन्थं विवेचिता विषयाः सर्वसमक्षं प्रकटिता भवेयुरिति धिया तेषामध्यायानां नामग्राहमुल्लेखोऽत्र विधीयते –

प्रथमोऽध्यायः – *परोक्तमतप्रामाण्यपरीक्षाप्रकारनिराकरणम्*

द्वितीयोऽध्यायः – *परमतदूषणनिरूपणम्*

तृतीयोऽध्यायः – *हितोपदेशः*

चतुर्थोऽध्यायः – *शास्त्रश्रद्धावश्यकताकथनपूर्वकतर्कप्रतिष्ठाननिरूपणम्*

पञ्चमोऽध्यायः – *शास्त्रस्योपपत्तिनिरपेक्षस्वतःप्रामाण्यम्*

षष्ठोऽध्यायः – *स्वमतदोषाशङ्कानिराकरणम्*

ग्रन्थकर्ता नीलकण्ठशास्त्री प्राचीनभारतस्य संस्कृतेरन्यतमारक्षकः सन्नपि ग्रन्थस्यास्य प्रणयनात् पश्चात् त्रिचतुरवत्सराभ्यन्तरे एव स्वमतपरिवर्तनं कृत्वा खृष्टीयधर्मे दीक्षां स्वीचकारेति नितरामेव दुःखावहा वार्ता। ततः स्वीयजीवनस्यान्तिमानि सप्तचत्वारिंशद्वर्षाणि तेन खृष्टीयधर्माचार्यादिपदं स्वीकृत्यातिवाहितानि। खृष्टीयधर्मप्रचाराय तत्परः सन् स प्राचीनभारतीयधर्मं दूषयितुं *षड्दर्शनदर्पणा*दीन् ग्रन्थान् बहून् प्रणीतवानित्यपि विशेषः। परन्त्वद्यापि प्रकृतस्य ग्रन्थस्यास्ति महत्त्वं तथा गौरवमाध्यात्मिकमैतिहासिकम्। अत्र सर्वत्रैव ग्रन्थेऽस्मिन् कवेः प्राचीनभारतीयसंस्कृतिसंस्कृतं चित्तं विरहमाणमवलोक्यते।

खृष्टीयमतस्य ग्राह्याग्राह्यताविनिर्णये भगवतो येष्वोऽद्भुतकर्मणः वैफल्यं प्रमाणीकर्तुं प्रवृत्तः शास्त्रिवर्यः खृष्टीयमतपरिपोषकान् नानाविधैः प्रश्नबाणैर्विव्याध। तदुच्यते गोरेमहोदयेन स्वीये *शास्त्रतत्त्वविनिर्णये* –

"इदं खल्वत्र पृच्छामः सामर्थ्यं मतकर्तृगम्।

चिरातीतं कथं ज्ञेयं पुरुषैरधुनातनैः।।

तस्यापि साक्षिभिः साक्षात्कृतत्वं ज्ञायतां कुतः।

बोद्धव्यं च कृतं कस्माद्विपक्षैस्तत्परीक्षणम्।।

स्वमतग्रन्थतो ज्ञेयं सर्वं तदिति चेत्तदा।

हन्त ग्रन्थोक्तितः कस्मादैश्वरत्वं न मन्यताम्।।

यः पुनः स्वमतैशत्वं मृषा वक्तुं समुद्यतः।

स तत्प्रामाण्यसिद्ध्यर्थं कथा नो कल्पयेत्कथम्।।"[118] इति।

विश्वासमात्रेण यदि पापक्षयो जायेत, तदा मानवा ईश्वरं प्रति विश्वस्ताः सन्तोऽपि पापानि कुर्युः। पापवर्जनसंयुक्तो विश्वासोऽपेक्षते चेत्तन्न कदापि सम्भवति, यतो नास्ति कोऽपि जनः पृथ्व्यामस्यां यो हि भवत्यघविवर्जितः। यदि च ईश्वरः खृष्टमतेऽनुतापमात्रेणैव दयापरवशतया पापक्षमां विदध्यात्, तदा खृष्टे विश्वासेन किं प्रयोजनम् ? एवं विचारे कृते म्यूरप्रोक्ते खृष्टीयमते नैकमपि दोषोज्झितं पदं प्राप्तुं शक्यते इति तु ध्रुवम्।

भारतीयशास्त्राणां न्यायवैशेषिकवेदान्तादीनां वेत्त्रा श्रीमता नीलकण्ठशास्त्रिणा सुतरामेव प्राञ्जलया गिरा प्राचीनशास्त्रीयरीत्यैव म्यूरमतानि खण्डितानि। खृष्टधर्मं मूर्खतावशाद्ये खलु भारतीयाः हिन्दवः समाश्रयन्ति, तान् प्रति तस्य खेदोक्तिरधिग्रन्थं बहुत्रैव प्रकाशिता। खृष्टधर्मं परित्यज्य सर्वैरेव भारतीयैः 'स्वधर्मे निधनं श्रेयः परधर्मो भयावह' इति गीतोक्तगिरं मनसि निधाय स्वीयः पवित्रतमः सनातनधर्म एवाश्रयणीय इत्यत्र नास्ति कापि विप्रतिपत्तिर्विदुषाम्। यथा दिङ्मात्रमुदाहरणम् –

---

118 *शास्त्रतत्त्वविनिर्णयः*. (सम्पा.) एस्. एल्. कातरे, १९५१, पृ. २-३.

"न खल्वत्यन्तगम्भीर आशयः पारमेश्वरः।

अल्पबुद्ध्यर्पितैर्दोषैस्त्यक्तुं युज्येत सर्वथा।।"[119] इति।

"भवद्भिरपि तर्केण यदि दोषाः प्रकल्पिताः।

तावता ब्रूत किं त्याज्य एष पन्थाः सनातनः।।"[120] इति।

"तस्माच्छुद्धतमं शास्त्रं वैदिकं मङ्गलावहम्।

क्षुद्रबुद्धिसमुद्भूतैर्न त्याज्यं दोषसंशयैः।।"[121] इति।

"इदमत्यन्तममलं खलु वेदान्तदर्शनम्।

स्वबुद्धिकल्पितैर्दोषैर्न त्यक्तुं युज्यते क्वचित्।।"[122] इति।

"हन्तास्मदीयं शास्त्रं ये त्यजन्ति लघुदर्शनाः।

दोषाभासाकुलहृदस्तेभ्यः खिद्याम्यहं भृशम्।।"[123] इति।

- **म्यूरजीवने *मतपरीक्षा* - खण्डनप्रभावः**

स्कटल्याण्डं प्रति प्रत्यावर्तनात्परं पुनरपि म्यूरपादैः तदीया *मतपरीक्षा* संस्कृता प्रकाशिता च १८५२-१८५४-संवत्सरमध्ये। ततश्च संस्कृतकाव्यरचना कदापि तैर्न विहिता। किन्तु

---

119 *शास्त्रतत्त्वविनिर्णयः*. (सम्पा.) एस्. एल्. कातरे, पृ. ५.

120 तत्रैव, पृ. ३७.

121 तत्रैव, पृ. ६६.

122 तत्रैव, पृ. ८३.

123 तत्रैव, पृ. ८५.

आङ्गलभाषया *Original Sanskrit Texts* इति नाम्ना पञ्चखण्डोपेतं शास्त्रं प्रणीतं यत्र तेन भारतीयशास्त्राणां जयगाथैव गीतेति भारतस्य गभीरशास्त्रीयतत्त्वनिचयानां माहात्म्यम्। संस्कृतस्य विविधगूढतत्त्वानामध्ययनस्य प्रभावो म्यूरजीवने निश्चयेनापतितः। पूर्ववत्तेन नैव संस्कृतभाषा 'golden casket full of pebbles and trash' इत्याख्ययाख्यायते। भाषायामस्यां समालोचितैर्विषयैरेतादृशः प्रभावित आसीत्स यत् स्कटल्याण्डदेशस्य एडिनवार्गविश्वविद्यालये तेन संस्कृतसाहित्यस्य दर्शनस्य तथा तुलनात्मकभाषाविज्ञानस्य च कृते नूत्नं पदमेकं प्रतिष्ठापितम् १८६२-खृष्टाब्दे। विषयमिममाधारीकृत्य १८६०-संवत्सरे तेनाङ्गलगिरा *Reasons for the Establishment of a Sanskrit Chair in the University of Edinburgh* इत्याख्यं पुस्तकमप्येकं प्रणीतम्।

*बाइबेलो*क्तखृष्टमतानि नैव समालोचनायाः पारं गतानीति विश्वासः समजनि म्यूरहृदि। तदर्थं १८६१-संवत्सरे स प्रकाशितवान् *Brief Examination of Prevalent Opinions on the Inspiration of the Old and New Testament* इत्याख्यं ग्रन्थम्। मतपरीक्षाविवादस्य प्रभावेण नितान्तं प्रभावितः स स्वयमेव वक्ति –

"We may be assured that as Christianity comes into actual close contact with Orientals of acute intellects...it will be met with a style of controversy which will come upon some among us with surprise. Many things will be disputed which we have been accustomed to take for granted, and proofs will be demanded, which those who have been brought up in the external evidence school of the last century, may not be prepared to supply."[124] इति।

खृष्टीयधर्मग्रन्थानां प्रतिपत्तिं तथा प्राधान्यं स्वीकुर्वता श्रीजान्म्यूरेण साम्प्रतं कस्यापि धर्मस्य प्रामुख्यं तथा श्रेष्ठत्वं न मान्यते। वैश्विकमानवतायाः पूजारी भूत्वा स मृत्योर्वर्षत्रयात्प्राक् *Metrical Translations from Sanskrit Writers* इत्याख्यं ग्रन्थं विरचयामास यत्र सदुपदेशात्मकानि

---

[124] Young, Richard Fox. *Resistant Hinduism: Sanskrit Sources on Anti-Christian Apologetics in Early Nineteenth-Century India*, pp. 167-168.

पद्यानि गद्यानि च खृष्टीयशास्त्रीयग्रन्थेभ्यस्तथा भारतीयशास्त्रेभ्यश्च समुद्धृत्य परिवेशयाञ्चकार इत्येतत्सर्वमेव मतपरीक्षाविवादफलमित्यत्र नास्ति संशीतिः।

## ५.३. *पापमोचनीययथार्थोपायप्रदर्शनम्*

१८४०-खृष्टाब्दे श्रीमता जान्-म्यूरेण अनुष्टुपा छन्दसा गुरुशिष्ययोरुक्तिप्रत्युक्तिच्छलेन प्रणीतमिदं त्र्यधिकैकशतसंख्यकश्लोकसमन्वितं खण्डकाव्यं संस्कृतखृष्टीयसाहित्ये सुतरामेव भिन्नास्वादस्य प्रतीकमित्यत्र किं चित्रम् ? श्रीयेषूखृष्टस्य सर्वातिशायि माहात्म्यं कीर्तयितुं प्रवृत्तमिदं काव्यं गाङ्गे सलिलेऽवगाहनेनाङ्घोमोचनोपायरूपं भारतीयविश्वासाधारितं तत्त्वं सर्वथा न्यक्करोतीतीह विशेषः। येषूखृष्टे यदि स्याद्विश्वासस्तदैव स्वर्गीयानन्दसंयुतमघमोचनं सम्भवमित्यपि कवेः सिद्धान्तः सुनिश्चितः।

- **काव्यसारः**

भारतीयशास्त्रेषु पवित्रतमाया गङ्गाया महिमा शस्यते। तस्यां स्नानेन चाङ्घांसि नश्यन्तीति नः मतम्। अतः प्रश्नः क्रियते शिष्येण यत्कथङ्कारं गङ्गावगाहनेनाङ्घोमोचनं जायत इति। इत्थं पृष्टो गुरुः शिष्यमुद्दिश्य वक्ति यद् यावन्तो जनाः गङ्गायां पापमुमुक्षया स्नान्ति, तावन्तो वस्तुतः स्वीयपापानां दुष्टत्वं स्वीकुर्वन्तस्तस्माद्विमोचनमिच्छन्तीति। गङ्गास्नातृगणानिवान्येऽपि मनुजाः प्रायश्चित्तेन तपस्यया यज्ञेन वा पापक्षमामीहन्ते। पापाद्विमुक्तिस्त्ववश्यमेवावश्यिकी, यतस्तां विना मानवानामुद्धृतिः कथमपि न भवेत्। *पूजापद्धतिः* इत्याख्याद्भारतीयशास्त्रादुद्ध्रियते कविना –

“पापोऽहं पापकर्माहं पापात्मा पापसम्भवः।

त्राहि मामित्यादिना।।

अपि च,

पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः।

दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये।।

अपराधसहस्राणि क्रियंतेऽहर्निशं मया।

दासोयमिति मां मत्वा क्षमस्व परमेश्वर इति।।”[125] इति।

तथाह्यङ्घोनाशाय सततं सयत्नं चेष्टितव्यं जनैरिति तु ध्रुवम्। परन्तु गाङ्गं सलिलं पापं हर्तुं न समर्थमस्तीति तन्मतम्। कथं नेत्युच्यते गुरुणा यद् गङ्गास्नानं यतो हि सुलभं, तत्कर्मणि श्रमो यतो हि नापेक्षते, तस्मात् स्नानशोधिताघकलङ्ककेऽघघृणा न कदाप्युत्पद्येतेति। यदि स्नानमात्रेणैव पापमोचनं जायेत, तदा धर्मेण किं प्रयोजनम्, अनुतापेनैव वा किं प्रयोजनमित्यस्ति कवेः जिज्ञासा। अतो गाङ्गोदमात्रे स्नानेन पापमुक्तिर्भवतीति ये विश्वसन्ति, ते वस्तुगत्या हृदि स्थितामुत्कृष्टां पवित्रतामेवावमन्यन्ते। बाह्यधर्मेण भगवान् कदापि सन्तुष्टो न भवति, हृदयस्य निर्मलत्वं सदैवापेक्षत इति कवेर्दृढः प्रत्ययः। तथाह्याकूतं कविना तदीये *पापमोचनीययथार्थोपायप्रदर्शनम्* इत्याख्ये काव्ये –

ईशस्तु बाह्यधर्म्मेण हृन्मर्मज्ञो न तुष्यति।

हृदश्च निर्म्मलत्वेन केवलेन प्रसीदति।।”[126] इति।

येषां मनसि कुत्सैव वर्तते पापासक्तिः कथमपि तेषां न नश्यति। गङ्गास्नानमनु कामलोभादिपाप्मनां नराणामघासक्तिः पूर्ववदेव स्वान्ते तिष्ठति। ईशात्तदर्थं किल्विषक्षमामप्याप्तुं न समर्था भवन्ति ते। अतोऽङ्घोनाशसामर्थ्यं नास्ति गङ्गायामिति स्वीकुर्युर्जना इति जान्-म्यूर-मतिः।

गङ्गाशक्त्युद्भवानि आरोग्यवित्तवृद्ध्याद्यन्यान्यपि फलानि भारतीयशास्त्रे कथ्यन्ते। यथा चोक्तं *प्रायश्चित्ततत्त्वे* –

‘आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलम्।’[127] इति।

---

[125] पापमोचन., पृ. २.

[126] तदेव.

[127] तत्रैव, पृ. ३.

निःस्वा जना गङ्गावगाहनादर्थसम्पदं न प्राप्नुवन्ति, न वा गङ्गा दैहिकान् रोगान् हर्तुमस्ति शक्ता, न वा विपद्ग्रस्तान् त्रातुमस्ति समर्थेति तु सर्वे जानन्ति। अतो धनादिप्रदानायाक्षमां जाह्नवीं विनिश्चित्य जना बाह्यकर्माण्येतानि न कुर्युरिति कवेर्विवक्षा। एवमेव गङ्गास्नानं यथा व्यर्थं तथैव तीर्थयात्रामपि निष्फलामिति मन्तुमर्हन्ति साधारणा जनाः। वस्तुतः श्रीखृष्टसंसिद्धे प्रायश्चित्ते यो विश्वस्यात्, स एव वर्जितैनस्कः स्वपापेभ्यो मुच्यते।

खृष्टधर्मानुसारं संसारेऽस्मिन् नास्ति कोऽपि मनुजो निष्पापः। सर्वे नरा एव न्यूनाधिकमीश्वरसमक्षं दूष्यन्ति। लोके ये साधव इव भान्ति, तेऽपि स्वभावतः स्वीयपापात्प्रभ्रष्टा दण्डयोग्या भवन्ति। केवलं खृष्टप्रायश्चित्तेनैव जनाः पापक्षमामवाप्तुमर्हन्ति, नान्यथा। यः प्रभोराज्ञां निष्ठापूर्वं पालयति, यश्च खृष्टे श्रद्धां करोति, स एव सदात्मनः प्रसादेन मृत्यमनु स्वर्गं प्रयान्ति।

अधिकाव्यं श्रीखृष्टस्य ईशपुत्रत्वमस्तीति सम्यग्व्याख्यातं कविना। खृष्टीयशास्त्रे वस्तुत ईश्वरो भवति पितृपुत्रसदात्मेति त्रिरूपात्मकः सन्नपि निर्विकारः सदास्थितः स एक एवेति मन्तव्यः। अतस्ते त्रय ईश्वरा न ज्ञेयाः, स तु एक एव, अनादिरनन्तः शाश्वतः निर्विकार्यात्मरूपकः। परेश्वरेण प्रेरितः स्वपुत्रो येषूः मनुष्याणां त्राणाय धराधाम्नि प्रायश्चित्तं ससाध। सदात्मा च स्वप्रसादेन मनुष्येषु श्रद्धां समुत्पाद्य तत्स्वान्तानि सदैव पुनाति। तस्मात् पितृपुत्रसदात्मनां प्रेम्णा क्वचिच्च भयेनास्माभिः स्तुतिर्नित्यं करणीया।

एवमेव काव्येऽस्मिन् खृष्टादिष्टवर्त्मानुवर्तिनामाचारोऽपि प्रपञ्चितः प्राञ्जलया गिरा कविवरेण। किं बहुना, काव्यस्यास्याध्ययनेन खृष्टशास्त्रानुसारं स्वर्गलोकवैशिष्ट्यानि तथा च मुक्तितत्त्वान्यप्यवगन्तुं शक्यन्ते। खृष्टे विश्वासमात्रेणैव मनुजाः पापार्णवे न मज्जन्तीति ये मन्यन्ते, ते खार्ष्टकाः किमङ्घोमुक्तिसौगम्यात् पुनः नाघे पतन्तीत्यन्तिमे शिष्येण पृष्टो गुरुः प्रत्युत्तरति –

“विश्वासात् केवलात् यान्ति खृष्टीयाः पापमोचनं।

अन्यत्रैशदयातः क्व शरणं दोषिणां भवेत्।।

तिष्ठेत्तु यो रतोऽङ्घस्सु श्रीखृष्टस्यानुगोपि सन्।

नरस्स व्यर्थविश्वासः किल्विषैः स्वैर्न मोक्ष्यते।।

विश्वासो वास्तवो यस्य खृष्टीयस्य स सन्ततं।

करोत्यङ्घोघृणां धर्म्यः कुकर्माणि च वर्जति।।

अङ्घःकृतेऽनुतापं तु पापवर्जनसंयुतं।

अकृत्वा पुरुषः कोपि वास्तवो नास्ति खार्ष्टकः।।"[128] इति।

तथाहि विभुना दण्ड्यं दुःखदं नरकावहं पापं यत्नान्मनुष्यैरवश्यं त्याज्यमिति कवेराशयः।

- **काव्यस्य रचनारीतिः**

काव्यस्यास्य रचनाप्रकृतिः कथोपकथनात्मिका। नैवेयं रीतिर्नूत्ना कवेर्मस्तिष्कप्रसूता वा। शैवतन्त्रेऽपि वयं पश्यामो यत् पार्वती-शिवयोर्मध्ये कथोपकथनद्वारेणैव काव्यप्रवृत्तिः। *चरकसंहितायाम्* अपि तथैव रीतिरनुसृता। कथोपकथनमाध्यमेन प्रवृत्ते काव्ये कवेर्विवक्षा सारल्येनैव प्रकाशिता भवति यतस्तत्र कश्चन प्रश्नं पृच्छति, कश्चन च तस्य प्रश्नस्योत्तरं प्रददातीति। तेन सहृदया अपि काव्यास्वादग्रहणे नानुभवन्ति किञ्चिदपि कष्टम्। तस्मादेव मन्ये कविवर्येणाश्रितेयं सहजा सरला च रीतिः। अस्माभिरेतदपि चिन्तनीयं यदिदं खलु काव्यं धर्मप्रचारायालिखितम्। अतोऽत्र यदि गुरुशिष्यमुखेन कवेर्विवक्षा निगदिता स्यात्तदा काव्यरचनोद्देश्यमपि संरक्षितं स्यादित्यत्र नास्ति काचिद्विप्रतिपत्तिः।

- **विषयगतं नावीन्यम्**

गङ्गायां स्नानमाहात्म्यमस्माकं शास्त्रेषु बहुत्रैव काशते। यथा प्रख्याते आदिशङ्कराचार्यप्रणीते *गङ्गास्तोत्रे*। दिङ्मात्रमुदाहरणं यथा –

"तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम्।

मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः।।४।।

---

[128] पापमोचन., पृ. ११-१२.

तव चेन्मातः स्रोतःस्नातः पुनरपि जठरे सोऽपि न जातः।

नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुङ्गे।।७।।

येषां हृदये गङ्गाभक्तिस्तेषां भवति सदा सुखमुक्तिः।१३.१।" इति।

परन्तु गच्छता समयेन गङ्गायाः पवित्रं जलं दूषितमप्यभवदित्यस्यापि वर्णना नः शास्त्रेष्वेवावाप्यते, यथा द्वादशशतकस्य श्रीधरदासप्रणीते *सदुक्तिकर्णामृते*।

विषयेऽस्मिन् चर्चादावेव शास्त्रकारैर्विहिता। परन्त्वस्य काव्यस्य विशेषवैशिष्ट्यं त्वस्त्येव। यतः काव्यमिदं गङ्गावगाहनमाहात्म्यं यथा खण्डयति, तथैव खृष्टधर्मप्रचारमप्यातनोति। कवेर्दृढः प्रत्ययो यद् ईशः कदापि बाह्यधर्मेण नैव तुष्यतीति। हृदयस्य निर्मलत्वमेव भगवत्प्रसादकारणम्।

- **काव्यमूल्यम्**

केवलं प्रचारार्थं निर्मीयमाणस्य काव्यस्यास्योत्कर्षतास्माभिर्नैव प्रत्यक्षीक्रियते। यतस्तत्र कविना यत्किमपि वक्तव्यं वर्तते तत्तु सर्वमेवाभिधामाध्यमेनैव कविरस्मत्पुरतः समुपस्थापयति। नास्ति तत्रानन्दवर्धनोदीरितस्य ध्वनेरवसरः। तथा कृते तु प्रचारे विघ्नता समुपजायेत। साधारणजनानां बोधनेऽपि सौकर्यं न स्यात्।

अत्रेदमवश्यमस्माभिरवधेयं यत्प्रचारनिमित्तं कविवर्यैः प्रायः समेषामेव प्राचीनशास्त्रग्रन्थानामध्ययनं सुष्ठुतया विहितम्। ज्ञानमप्यगाधमर्जितम्। कीदृशो महानुत्साहः कविं खलु प्रचोदयामासेत्यपि विभाव्यमस्माभिः। केवलं खृष्टधर्मस्य प्रसाराय प्रचाराय च तेन प्रायः त्रयोदश काव्यानि प्रणीतानि। तदपि सम्पूर्णतया भिन्नया कयाचिद्भाषया या हि तस्य मातृभाषापि नासीदित्येवास्मान् विस्मापयति सुतराम्।

आलङ्कारिकशेखरेण राजशेखरेणोदीरिते काव्यविभागेऽस्य काव्यस्य स्थानं वादमूलके काव्ये एव भवेन्न तु खण्डकाव्ये। नैवात्र काव्यमाधुर्यं, नैवात्र रसप्रसक्तिः, परन्तु केवलमेव शास्त्रखण्डनपरम्परा काव्याकारेण। अत एवास्माकं कविरपि नूनमेव राजशेखरनये शास्त्रकविः।

'न हि रसादृते कश्चिदप्यर्थः प्रवर्तते' इति भरतभारत्या काव्यमिदं नैवाश्वघोषप्रणीतस्य *बुद्धचरितस्य* समकक्षतामर्हति नीरसत्वादिति तु स्वीकर्तव्यमेव। अतः समग्रेऽस्मिन् काव्ये शिष्येण पृष्टानां साकल्येन सप्तसंख्यकानां प्रश्नानामुत्तरप्रदानपुरःसरं गुर्वास्येन कविना प्रामुख्येन प्रतिपादितानि खृष्टधर्मीयतत्त्वानि।

## ५.४. *शर्म्मपद्धतिः*

श्रीजान्-म्यूरेण *शर्म्मपद्धतिः* इत्याख्यं लघुकाव्यमिदं लण्डनतः १८४१-खृष्टाब्दे प्रकाशितम्। श्रीरिचार्ड-ओयाट्स-वर्येण (Richard Watts) च मुद्रितमिदम्। काव्यस्यास्य प्रधानविषयस्तु भवति मनुष्याणामानन्दावाप्तेर्यथार्थोपायान्वेषणमिति। तदर्थं च हिन्दुशास्त्रोक्तः शर्मावाप्त्युपायस्तेन खृष्टीयनयानुसारं यथामति खण्डित इत्येव विशेषः काव्यस्य। अपि च, परमकारुणिकस्य भगवतश्चारित्रिकं वैशिष्ट्यं तथा चेश्वरेण समं मनुजानां कीदृशः प्रकृतः सम्बन्धोऽस्तीत्यादयो विषया अपीहालोचिताः। तदुच्यते स्वयमेव कविना काव्यस्यास्य प्रस्तावनायाम् –

"The object of the following Tract is, to correct certain false principles of the Hindus, in regard to human happiness, the relations of man to his Maker, and the character of God."[129] इति।

तदर्थमाङ्लभाषयास्य काव्यस्य नाम तेन प्रदत्तम् – *The Way of Happiness: A Sketch of the True Theory of Human Life* इति। लण्डनस्य प्रख्याताद् ब्रिटिश-लाइब्रेरी-इति ग्रन्थागारात्प्राप्ते आद्यन्तमनुष्टुपा प्रणीते काव्येऽस्मिन् साकल्येन सन्ति एकोनाशीत्यधिकद्विशतसंख्यकाः श्लोकाः।

- **काव्यसारः**

काव्यस्यास्यादावेव मङ्गलाचरणे कविना परमेश्वरो यथा सर्वानस्मान् शाश्वते शर्मवर्त्मनि नीयादिति प्रार्थना क्रियते। तदुच्यते –

---

129 *शर्म्मपद्धतिः*, Preface, पृ. १.

"लोकानां यः स्थितः कर्त्ता पाता शास्ता च सत्तमः।

अस्मान् स ईश्वरो नीयाच्छाश्वते शर्म्मवर्त्मनि।।"[130] इति।

शिष्यगुरयोः संवादच्छलेन प्रवर्तितेऽस्मिन् काव्ये शिष्येण पृष्टानां प्रश्नानामुत्तरप्रदानेन कविः यथार्थानन्दप्राप्तेरुपायं निर्दिशति। संसारेऽस्मिन् केचिज्जना इन्द्रियपोषका कायिकान् भोगान् जुषन्ते, केचन वा कान्ताप्रेमोन्मत्ताः केवलं शृङ्गारं सेवन्ते, अन्ये केचन यशोऽभिलाषिणः पुनः मुदा भीप्रदं रणोत्सवं भजन्ते, अपरे च केचिन्मूर्खाः सदैव विनोदक्रियासु लीलासु सज्जन्ते। एवं पुरुषार्थं कामं सेवन्तः पुनः केचन जनाः अर्थमपि पुरुषार्थं श्रेष्ठं मन्यन्ते। ते विभवासक्तचित्ताः सदार्थोपार्जने यतन्ते, सम्भ्रमान्वितां गुर्वीं पदोन्नतिं वा चेष्टन्ते। परन्तु समग्रेऽपि विश्वे सन्त्यल्पे केचन नरा ये खलु सांसारिकाणां विषयाणामसारतां निश्चीय परमात्मनः सेवायै यत्नपरा भवन्ति। अतो वित्तज्ञानादिलाभेन ये तावत् सिद्धार्थाः प्रतिभान्ति, प्राप्तेन सम्पदादिना तेषां सन्तोषः कदापि न जायते, लक्ष्म्याश्चञ्चलस्वभावत्वात्। तस्मात्प्रश्नो मनसि जायते शिष्यस्य यत् केन तर्हि पुरुषार्थेन वास्तविकं यथार्थं शर्म गम्यं भवतीति।

संसारो वस्तुतोऽसारः, परं रूपतः स सुतरां रमणीय इव प्रतिभाति। नवीनं यौवनं क्षीणतेजस्कं जराग्रस्तं च सत्त्वरितमेव प्रसर्पति। सर्वेष्वपि पुरुषार्थेषु कामस्तु तुच्छतमः स्मृतः। कामनिरता जना जातु न सन्तोषं प्राप्नुवन्ति। वस्तुतस्तु तारुण्ये नूत्नः प्रबलः कामरसोऽनुभूयते, परं व्याहतेन्द्रिये वार्द्धक्ये सुखबुद्धिः शीघ्रमेव शुष्यति। अतः कामतत्त्वं धीमन्तः ज्ञानचक्षुषा विचार्य रागमोहानां वशं न प्रयान्ति। कायिकानि सुखानि च मितरूपेण भुञ्जानास्ते धीराः परमार्थतत्त्वमधिगन्तुं प्रभवन्ति।

कामपुरुषार्थस्यासारतां व्याख्यायार्थस्यानिष्टत्वं प्रतिपादयति कविः। वित्तं खल्ववश्यं नानेष्टसाधकं नानासुखावहं परेषामुपकारि चेत्यत्र नास्ति सन्देहः। परन्तु मर्त्यानामिष्टाय शर्मणेऽर्थः कथमपि न कल्पते, बाहुल्येनाप्यर्थं भुक्त्वात्मा तृप्तिं न विन्दति। अन्नवस्त्रसद्मादिप्रापणाय यद्यपि धनं साहाय्यं विदधाति, तथापि धीविद्याशीलादिप्रदानाय तन्न कल्पते। तथाहि धनासाध्या ह्यात्मनस्तृप्तिरिति निश्चप्रचम्।

[130] *शर्म्मपद्धतिः*, पृ. १.

विद्यया यद्यपि जायते हि श्रेयोवृद्धिस्तथापि सा सर्वसिद्धार्थान् मर्त्यान् न विदधाति। रुक्पीडादुःखखिन्नस्य मर्त्यभावस्य दुर्दशा नूनमेव दुर्वारा। विद्यया तस्याः प्रतीकारो नैव सम्भवति। रोगे शोके दुःखे विपदि यथा मूर्खाः पतन्ति तथैव बुधा अपि। तथाहि पुरुषार्थैरेतैः वास्तवं शर्म प्राप्तुं न शक्यत इति त्वस्माभिः ज्ञेयम्। तर्हि प्रकृतानन्दार्थिन आत्मनस्तृप्तिः कथं सम्भवेदिति जिज्ञासायां गुरुर्वक्ति –

“दृढा परेश्वरे श्रद्धा शिष्यैकैवात्मतृप्तिदा।

परमेश्वरसेवा हि परमार्थस्वरूपिका।।

असाध्यो मिलितैः सर्वैः पुरुषार्थान्तरैरपि।

संसिद्ध्यत्यात्मसन्तोषः परमार्थस्य सेवनात्।।”[131] इति।

कदाचित् क्लेशभारेण पीडितान् सज्जनान् वयं पश्यामः, क्वचित्पुनः सर्वकामभुजः सम्पदा युक्तान् दुष्टान् पश्यामः। तेन मनुष्यः कर्मणां फलानि नैव सम्यगश्नुत इति प्रतीतिर्जायते। वस्तुतः संसारेऽशेषा एव मानवाः भगवता परीक्ष्यन्ते। मानवकर्मणां समाप्तायां परीक्षायामैहिक्यां परमेश्वरः धर्मविचारणपुरःसरं न्याय्यं विदधात्यमुत्र। तदा ते नराः यथाकर्म फलानि लप्स्यन्ते, धार्मिकाः श्रेयः अधार्मिकाश्च भीषणं दण्डं भोक्ष्यन्ति। अतः काः काः क्रियाः प्रभोरिष्टेति सर्वदा विचार्यैव सावधानेन कर्मणि प्रवृत्ता भवेयुर्मानवा इति कवेर्मतम्।

एवमेव विषयासक्तिः कथं नियन्तव्या कथञ्चेश्वरेऽप्रत्यक्षे श्रद्धा कर्तव्येत्यादिविषया अपि सुतरामेव सरलया गिरा कविनाधिकाव्यं प्रपञ्चिताः। अतः सर्वदैव विनीतेन हृदयेन दया परमेश्वरात्प्रार्थनीया। ततश्च कविना पञ्चविंशतिश्लोकैः कस्मिन् विषये प्रार्थना कार्येति प्राञ्जलेन वाग्विन्यासेन प्रतिपादितम्।

---

131 *शर्म्मपद्धतिः*, पृ. ११.

काव्यस्यान्तिमे खृष्टीयसंज्ञकं शास्त्रमुद्दिश्य प्रभोः श्रीखृष्टस्य चरितवृत्तान्तश्रवणार्थं मिलपादेन विरचितं *श्रीखृष्टसंगीता* इत्याख्यं शास्त्रं पठनीयमित्यादिदेश कविः गुर्वास्येन। पुनश्च खृष्टीयस्य धर्मस्य प्रामाण्यं तथा श्रेष्ठत्वं प्रतिपादितं यस्मिन् कविनैव प्रणीते *मतपरीक्षाख्ये* शास्त्रे, तस्याप्यध्ययनं शिष्येण सावधानं कार्यमित्यवोचत्कविवरः। परिशेषे पुनः श्रीयेषूखृष्टमाश्रित्य प्रकृतानन्दप्रार्थिनो जनास्तस्मात्सदैव दयां प्रार्थयेयुरित्युक्तं कविना –

"अतोऽघदण्डमोक्तारं येषूखृष्टं त्वमाश्रितः।

विनीतस्त्यक्तपापश्च प्रार्थयस्वेश्वरं दयां।।"[132] इति।

- **काव्यमूल्यायनम्**

काव्येऽस्मिन् कविना जान्म्यूरेण शास्त्रीयविषया एव सुतरामेव सुन्दरतया समालोचिताः। भारतीयशास्त्रेषु परमश्चरमो वा पुरुषार्थो भवति मोक्षः। परन्तु खृष्टीयशास्त्रे स्वर्गप्राप्तिरेव परमः पुरुषार्थ इति प्रतीतिर्भवति। तत्प्राप्तेरनन्तरं पुनः मानवजन्म न जायते। परन्तु सूक्ष्मतया विचारे कृते तु खृष्टीयमतेऽस्मिन् दोषा बहवो दृश्यन्ते। यतः सुकर्माचरणात् समवाप्ते स्वर्गे तत्कर्मणः फलभोगमनु पुनः कर्माचरणाय धराधाम्नि मनुजेनावतीर्णेन भाव्यमित्येव समीचीनं मतम्।

धर्मप्रचाराय प्रवृत्तो जान्-म्यूरो वर्णनानुगुणेन रसानुगुणेन च यथार्थस्यानुष्टुपः छन्दसः प्रयोगो विहित इति तु वक्तुं शक्यते। विषयाणामेकैकशो विस्तारेऽपि तस्य दाक्ष्यं प्रतीयते। काव्ये बहुत्रैव अश्वघोषस्य तथा च कालिदासस्य प्रभावः समालक्ष्यते। यथा काव्यस्यान्तिमे प्रार्थनायां *रघुवंशस्य* काव्यच्छटा नितरामेव स्पष्टा –

"क्व ते पवित्रताऽत्यन्ता क्व च पापात्मता मम।

तवाग्रे विनयं कर्तुं नार्होऽस्म्यङ्घोमलीमसः।।

---

132 *शर्म्मपद्धतिः*, पृ. ३०.

तव क्क महिमाऽपारः क्क च मे तुच्छता विभोः।

गुणांस्ते परमान् स्तोतुं ज्ञातुं वाऽप्यहमक्षमः।।"[133] इति।

अपि च, मानवजन्मनोऽसारतां प्रतिपादितेन *बुद्धचरितस्य संवेगोत्पत्त्याख्यस्य* तृतीयसर्गस्य वर्णितेन विषयेण साम्यं धत्ते म्यूरवर्यस्य प्रकृतकाव्यस्यादौ वर्णितो विषयः। तथाह्युभययोः कविवर्ययोर्वाचनभङ्गीभणितिरत्र समुपस्थाप्यते। तथाह्याह म्यूरः –

"नूत्नो यौवनसारश्च परिणम्याशु शुष्यति।

वार्द्धक्यं क्षीणतेजस्कं चाचिरेण प्रसर्पति।।

मिष्टः स्वादश्च भोगानां विरसो जायतेऽचिरात्।

तीक्ष्णा च यौवने पश्चाच्छिथिलीभवति स्पृहा।।"[134] इति।

तथैव जरामुपवर्णयता महाकविनाश्वघोषेण *बुद्धचरिते* निगदितं –

"रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम्।

नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः।।

पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिमृष्टमूर्व्याम्।

क्रमेण भूत्वा च युवा वपुष्मान् क्रमेण तेनैव जरामुपेतः।।"[135] इति।

तथाहि शास्त्रीयग्रन्थत्वेन खृष्टीयमतेन प्रकृतानन्दावाप्तिमार्गज्ञानाय च काव्यमिदमवश्यमध्येयम्।

---

133 *शर्म्मपद्धतिः*, पृ. २६.

134 तत्रैव, पृ. २.

135 *बुद्धचरितम्*, तृतीयसर्गः, श्लोकसंख्या ३०-३१.

## ५.५. *निस्तारमार्गदीपिका*

गुरुशिष्यसंवादच्छलेन उपजातिवृत्तेन रचितमिदं काव्यम्। अत्र पापोर्मिभिर्निराशाग्रस्ताया भवार्णवक्षुब्धमनुष्यजातेरुद्धारायोपाया एव गुर्वास्येन कविना श्रीजान्-म्यूर-पादेनास्मिन् लघुखण्डकाव्ये प्रदर्शिता इत्यवश्यमन्वर्थं काव्यमिदम्। अत्र साकल्येन सन्ति सप्ताशीतिसंख्यकाः श्लोकाः। काव्यस्य प्रकाशनकालविषये किमपि तथ्यं नावाप्यते। मन्येऽस्य काव्यस्य प्रकाश एव नाभवत्, यतः काव्यमिदं पाण्डुलिप्याकारेणैव प्राप्तं मया। तस्यां पाण्डुलिप्यां सन्ति एकादश पत्राणि देवनागरीलिप्यालिखितानि।

- **विषयवस्तुसारः**

काव्यस्यास्यादावेव 'श्रीपरमेश्वरो जयति' इति जगत्प्रभुं परेश्वरं जयति-पदेन नमस्कुर्वन् शिष्यास्येन काव्यस्य प्रतिपाद्यं विषयमुररीचकार कविः। संसारेऽस्मिन् सर्व एव मनुष्या भवसमुद्रे पतिताः सन्तः पापकर्माचरणेन नितान्तमेवाशाहताः सन्ति। तेषां त्राणोपायं ज्ञातुमिच्छता शिष्येण पृष्टो गुरुः विमोहादुद्धारोपायमेव वक्त्यस्मिन् काव्ये।

सुविज्ञा जनाः स्वां पापजां दुर्दशां सम्यग्विचार्य तन्मोचनार्थाय च चेष्टमाना निस्तारसिद्धेरुपायान् विविधान् चिन्तयामासुः। स्वकृतेन पुण्यकर्मणा सिद्धाः सन्तः तन्मात्रशक्त्यास्माकं पापशुद्धिर्भविता इति केचन विश्वसन्ति। केचन वा स्वनाथभक्त्या मुक्तिं प्राप्नुयुरिति मतं पोषयन्तः स्वेष्टदेवस्य नित्यमर्चनां सयत्नमाचरन्ति। केचिच्च वेदान्तमतानुयायिनः ज्ञानेनैव मुक्तिर्भवतीति मत्वा ज्ञानार्जने नित्यं निरताः सन्ति। परन्तु कवेर्नये जनानां कृत्स्नस्त्रिविध उपर्युक्तो वर्ग एव भ्रमाब्धौ पतितोऽस्ति, यतः न हि कर्ममार्गः, नाप्युपासना, न वा ज्ञानं सद्गतिं प्रदातुं शक्नोतीति।

गुरोर्मते बाह्यासु क्रियासु पापशोधयित्री नास्ति कापि शक्तिः। पापकार्याय यत्फलं खलु भोग्यं तत्तु सत्कर्मशतैरपि न हार्यं भवति। वस्तुगत्या, न कोऽपि मर्त्यो जनोऽस्तीहलोके यस्तु किमपि सत्कर्माचरति, सर्वेष्वपि कार्येषु पापमिश्रितत्वात्। तस्मात्सत्कर्म परां गतिं प्रापयितुं न समर्थमस्तीति मन्तव्यम्। केचनाज्ञानतः गङ्गाप्सु स्नानेन पापशुद्धिर्जायत इति प्रलपन्ति। परन्त्वत्र प्रश्नस्तु भवति यत्कथं बाह्यैरुपायैरान्तरदोषशुद्धिः सम्भवेति।

भारते ये खलु कृष्णादयः सन्ति देवाः, तेषां भक्तास्तदुपासनेन कदापि मुक्तिं न प्राप्नुयुरिति कवेर्मतम्। ब्रह्म-विष्णु-महेश्वरा वस्तुतो मनुष्यमात्रबुद्ध्या प्रकल्पिताः सन्ति, ते नैव ईश्वरपदभाजो भवन्ति। अन्येऽपि च ये सन्ति देवाः, तेऽपि नैव पूजार्हा भवन्ति तेषु ऐश्वर्यराहित्यात्। पुरा भारतेऽतिशौर्योपेतावुदारौ च राजानौ द्वावास्तां राम-कृष्ण-नामानौ। तौ स्वशक्त्या गुणैर्वा प्रथितौ सन्तौ समग्रेऽपि देशे समादरं प्रापतुः।

वस्तुतस्तु अविज्ञा लोका एव सदसद्विवेकमविचारयन्तः पुरा कथितामद्भुतां वार्तां यथार्थामिति मन्यमाना विश्वसन्ति। सुकवयोऽपि परम्पराप्राप्ताः कथास्ताः संगृह्य स्वीयकाव्यशक्त्यालङ्कृत्य प्रबन्धरूपेण समुपस्थापयामासुः। अतः सम्यक् प्रमाणेन विहीनत्वात् तत्तद्भूपेषु देवत्वं नास्तीति विज्ञाः प्रतीतिं कुर्युः। शास्त्रेषु निखिलेषु श्रुतिर्हि प्राचीनतमा। पश्चात् पुराणादीनां प्रणयनं कविभिः क्रमेण कृतम्। तदा दिवौकसौऽग्नीन्द्रपुरःसरा ये खलु देवा मन्त्रेषु पूज्या भवन्ति स्म, वैदिकदेवानां तेषामभीष्टता शास्त्रेषु परेषु नैव पूर्ववदीक्ष्यते। केवलं ब्रह्मविष्णुमहेश्वरा एवाधिकतया प्रसिद्धाः सन्ति साम्प्रतमस्मिन् देशे।

अतः को देवः समुपासनीयः, कतमश्च मुख्यः, साधारणानां मानवानां त्राता वा कोऽस्ति इत्यादीनां प्रश्नानामुत्तरं तु नितान्तमेव दुर्लभं भारतीयशास्त्रेषु। यतस्तानि शास्त्राणि मिथस्तद्विषये सर्वथासम्मतानि क्वचित्तु विरुद्धानीत्यालक्ष्यतेऽस्माभिरिति कवेः समयः। तथाह्युच्यते –

“परश्च देवः कतरो निषेव्य इत्यत्र शास्त्राणि न सम्मतानि।

एकेषु विष्णोः क्रियते प्रशंसा परेषु रुद्रस्य तु पक्षपातः।।

क्वचित् पुराणेषु च वैष्णवेषु निन्दोच्यते शंकरसेवकानां।

आक्रुश्यते रुद्रपरैश्च तद्वत् पुराणकृद्भिर्हरिभक्तवर्गः।।”[136] इति।

---

136 *निस्तारमार्गदीपिका*, पृ. ४.

जगदिदं ब्रह्ममयं, मामक आत्मा परमात्मनः अंश एव, तस्मिन्नेव परमात्मनि वयं सर्वेऽन्तिमे लीना भवेमेति मतमसत्यं खृष्टीयमतं पोषयतः कवेः नये। तन्मते तु विश्वमिदं परमात्मनो भिन्नमेवास्ति। आत्मनाञ्च बहुत्वमपि स्वीकार्यम्। ईशाख्यो य आत्मा सोऽनादिरप्रमेयः सर्वत्रगः अनन्तशक्तिः पवित्रः सद्गुणाढ्यश्चास्ते। परन्तु देहधारिणो नैव परमात्मनोंऽशा इति ज्ञेयम्। तन्नये तु वेदादिशास्त्रमेव स्वयमप्रमाणमीश्वरानुक्तत्वात्। स्वबुद्ध्यनुसारं वेदादिशास्त्राणि बुधाः प्रणिन्युः। लोकेऽस्मिन् प्रसिद्धैर्मुनिभिः प्रणीतानां शास्त्राणां परीक्षा मनीषिभिः कार्या, अन्यथा स्वबुद्धिरेव विफला भवेत्।

अङ्घोलहरीषु निमग्नां नृजातिमुद्धर्तुं समर्थोऽस्त्येक एव प्रभुः – स भवति श्रीयेषूः। समग्रापि मनुष्यजातिः केन प्रकारेण दुःखावहं पापवशं प्राप इति वर्णयितुकामः कविरादौ मानवानां चरित्रं समुपन्यस्यति। पुरा परमेश्वरः नृजातेः पितरौ सद्भावयुतौ अनघौ ससर्ज। परन्तु तौ प्रभोराज्ञामुल्लङ्घ्य मलिनावभूताम्। तत एवारभ्य सर्वदेशीया एव जना वाचा मनसा कर्मणा च स्खलन्तः कर्तव्यकर्माचरणे विरक्ता अकार्यकृतौ च प्रसक्ताः सन्ति।

मनुष्यकर्तुः परमोपकर्तुरीशस्य सेवास्ति परमो धर्मः। अशेषसद्भावनिधौ दयालौ तस्मिन् परमात्मनि परमो प्रेमा सदैव विधेयः। परन्तु तुच्छेष्वर्थेषु रता मर्त्याः सर्वकल्याणनिधिं त्यक्त्वा नानापापाचरणं कुर्वन्त आदेशमीशस्य विलङ्घयन्ति। तेन च प्रभोः कोपपात्राणि ते नूनमेव भवन्तीत्यत्र किं चित्रम् ? किन्तु परमदयालुः परेश्वरः दण्ड्यानपि तान्नादण्डयत्। तेषां त्राणाय च स्वीयं पुत्रं पृथ्व्यां प्रेषयामास। गुरुवाक्यमाकर्ण्य नितरामेव विमोहितः शिष्यः प्रश्नं कुरुते यत् कथमीशे पितृपुत्रभावः सम्भवेत्, अनीशे वा कथं भवेद् ईशपुत्रता इति। गम्भीरमपीशतत्त्वमधुना समासेन वक्ति गुरुः –

"एकोऽपि नित्यं परमेश्वरः सन् रूपत्रयेणापि विशिष्ट आस्ते।

पिता च पुत्रश्च तथा पवित्र आत्मेति रूपत्रयमीश्वरस्य।।

पिता परेशोऽस्ति सुतश्च तद्वत् पवित्र आत्मा च परेश्वरोऽस्ति।

किन्तु त्रयस्ते न पृथक् परेशा एकस्त्रिरूपात्मक ईश्वरस्तु।।"[137] इति।

अथ ईशसूनुः श्रीयेषूः स्वदीप्तिधाम त्यक्त्वा धरायामवतीर्णः कुमार्या गर्भात्प्रसूतः निरघः सन् मनुष्यमध्ये न्यवसत्। असौ भिषजामपि वरिष्ठो भिषग् रोगातुरादीन् लोकान् स्ववाग्व्यवहारेणैव सुस्थानकरोत्। दिव्यैर्वचोभिः स नरान् कुमार्गे चलतो वीक्ष्य सत्पथमादिदेश। अतः समेषां शरणं प्रभुं येषूमाश्रयेज्जनः। तथाह्याह कविः –

"उदारमुद्धारकमेकमेतं श्रीयेषुखृष्टं शरणार्थिबन्धुं।

यः कोपि दीनो दुरितानुतापी समाश्रयेत् तस्य दयां स विन्देत्।।

जना हि ये तं प्रभुमाश्रयन्ति नित्यं च धर्म्माचरणे यतन्ते।

चित्तानि तेषां क्रमशः पुनाति पवित्र आत्मा परमेश्वरस्य।।"[138] इति।

प्रभुणादिष्टो धर्ममार्गोऽयमेव यथार्थमार्गः, अयमेव ज्ञानमार्गः, अयमेव भक्तिमार्गः, अयमेव च कर्ममार्ग इति ज्ञेयम्। अतोऽस्मिन् चलन्तो जना परमात्मनो यथार्थं ज्ञानं लभन्ते, परमां चरमां च सिद्धिं प्रयान्ति। परमात्मनः श्रीयेष्वः सन्ति खलु ये यथार्था अनुगास्ते शुद्धहृदयाः परमेश्वरं तथा च साधारणान् जनांश्च प्रति सदैव धर्ममाचरन्तीति तन्महिमास्माभिरवश्यमनुसन्धेयः।

- **वैशिष्ट्यम्**

काव्यस्य रचना संवादमाध्यमेनैव प्रवर्तिता। गुरुणा समं शिष्यस्य संलापेन प्रस्तुतविषयस्योपस्थापनं तस्य प्रायः सर्वस्मिन्नपि काव्ये दरीदृश्यते इति जान्-म्यूरीया रचनाप्रकृतिः। अत्र कारणं यत्काव्यादीनां प्रधानं लक्ष्यं तु धर्मप्रचार इति। तथाहि सुतरां सरलच्छन्दसां स्वल्पाक्षरविशिष्टानां प्रयोगः, समासबद्धपदानां स्वल्पता तथा चालङ्कारच्छटाभावः काव्येष्वेषु परीलक्ष्यते। यथा प्रकृते काव्येऽपि उपजातिच्छन्दसः प्रयोग एवालक्ष्यते। अन्यत्र तु केवलमनुष्टुब्वृत्तस्य व्यवहारो विहितः

---

137 *निस्तारमार्गदीपिका*, पृ. ८-९.

138 तत्रैव, पृ. १०.

कविवरेण काव्यरचनोद्देश्यं मनसि निधाय। वस्तुतः तेन धर्मप्रचारः सम्यग्भवेत्, साधारणा जना अपि सारल्येन वक्तव्यं विषयं ज्ञात्वा तद्धर्मं प्रत्याकृष्टा भवेयुः।

जन्मन आरभ्यैव जनाः पापबिद्धा भवन्तीति तेषां त्राणोपायः सर्वैः ज्ञेयः। तस्मात्कविना मनुष्याणां निस्तारमार्गस्यान्वेषणं कुर्वता श्रीयेषूखृष्टोदीरितानि सुभाषितानि काव्यमाध्यमेनैव लोके प्रचारितानि। अत एव काव्यस्याभिधानं तु *निस्तारमार्गदीपिका* इति। अनेन यथा काव्यस्य रचनापि जाता, तथैव संस्कृतकाव्येन धर्मप्रचारोऽप्यभवदित्यवश्यं चिन्तनीयम्।

सुतरामेव स्वल्पसंख्यकश्लोकसंयुतमिदं काव्यं मूलभूत-*खृष्टसंगीता*-महाकाव्यस्यैकदेशानुसारित्वात् कथमपि खण्डकाव्यत्वाख्यां प्राप्तुमर्हति। केचन पुनः विद्वांसः पर्यायबन्धकाव्यत्वेनाप्यस्य व्यपदेशं कर्तुं शक्नुवन्ति। आधुनिकसंस्कृतसाहित्यस्य प्रख्यातकवेः श्रीसीतानाथाचार्यस्य नये यं कमपि भावविशेषमाश्रित्य विरचितानां श्लोकानां संघातरूपं यत्काव्यं तद्भवति पर्यायबन्धकाव्यम् इति। अत्रापि तल्लक्षणानुसारं संसाराबद्धजनानां निस्ताराय प्रभूद्दिष्टमार्गोल्लेखरूपं भावमेवाधारीकृत्य प्रस्तुतकाव्यस्य पल्लवनात्काव्यस्य पर्यायबन्धत्वं सिद्धमिति मामकीनं मतम्।

इति

समाप्तः पञ्चमोऽध्यायः।



धर्मग्रन्थः।

Title Page of

***The Holy Bible in the Sanscrit Language***




Title Page of

***The New Testament of Our Lord and Saviour Jesus Christ in Sanscrit*.**

# षष्ठोऽध्यायः

## ।। जान्-म्यूर-कृतं संस्कृतसाहित्यम् - सामग्रिकं समीक्षणम् ।।

# ।। जान्-म्यूर-कृतं संस्कृतसाहित्यम् - सामग्रिकं समीक्षणम् ।।

सर्जना समीक्षा चेति सरस्वत्यास्तत्त्वद्वितयं परस्परसम्बद्धमविच्छेद्यमावह्नोः कालाद्युगपदेव प्रवहमानम्। सर्जना समीक्षाया विषयो भवति, समीक्षा च सर्जनाममरां विदधाति। अतः संस्कृतसाहित्यपरम्परायां कविसहृदययोरन्योन्याश्रयत्वं स्फुटमेव। स्वरूपभेदाद्[139] विषयभेदात्[140] च कवित्वाद्भावकत्वं, भावकत्वाच्च कवित्वं पृथगेवेति विदुषां केषाञ्चिन्मतम्। तदुच्यते साहित्यमीमांसकमौलिनाभिनवगुप्ताचार्येण – 'सरस्वत्यास्तत्त्वं कविसहृयाख्यं विजयते' इति। तस्मात्कारयित्री-भावयित्र्योः प्रतिभयोः सहावस्थानं नामालौकिकोऽपूर्वश्च विषयः कश्चन। तदभ्यधायि चतुर्थाध्याये राजानकेन राजशेखरेण *काव्यमीमांसा*याः –

"कश्चिद्वाचं रचयितुमलं श्रोतुमेवापरस्तां
कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति।
नह्येकस्मिन्नतिशयवतां सन्निपातो गुणाना-
मेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः।।"[141] इति।

प्रागुक्तोभययोः प्रतिभयोराधारो यथार्थः खलु श्रीजान्-म्यूर-वर्यः इति निश्चयेन स ह्याधुनिकसंस्कृसाहित्यस्यालौकिकोऽपूर्वश्च कश्चन कविरिति सुनिश्चिता नो मतिः। तथाह्यध्यायेऽस्मिन् म्यूरवर्येण प्रणीतानां संस्कृतखृष्टीयकाव्यानां सामग्रिकं समीक्षणं यथामति विधास्यते, येन तदीयाया नवनवोन्मेषशालिन्याः प्रज्ञायाः प्रकाशो भवेत्।

---

139 स्वरूपभेदः – 'यः कवते, काव्यं कुरुते स कविः। यस्तु काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यहृदयसंवादभाक् स भावकः इति स्वरूपभेदः।'

140 विषयभेदः – 'एकस्य शब्दार्थौ विषयः। अपरस्य रसास्वादो विषयः इति विषयभेदः।'

141 का. मी., पृ. १४.

## ६.१. समीक्षकसमीक्षा

संस्कृतगिरा खृष्टीयतत्त्वाश्रितविषयाण्यवलम्ब्य प्राच्यपाश्चात्यपण्डितैः प्रणीतानां काव्यानां मिश्रप्रतिक्रिया भारतवर्षे तदानीन्तने काले साधारणजनेष्वापतिता। दरिद्रा भारतीयाः केचनावश्यं खृष्टमतं स्वीचक्रुः सम्पदादिप्राप्त्याशयेति तु सत्यम्। परन्तु, न केवलं दीनजनाः, शिक्षिताः संस्कृतशास्त्रं प्रति विश्वसन्तोऽपि भारतीयाः खृष्टधर्मं परिगृह्य भारतीयशास्त्राणि दूषयितुं बद्धपरिकरा बभूवुः। अत्र प्रख्यातबङ्गीयपण्डितस्य श्रीकृष्णमोहनव्यानार्जीवर्यस्य नाम यथा श्रूयते तथैव वाराणसीस्थसंस्कृतविदुषः श्रीनीलकण्ठगोरेवर्यस्यापि धर्मान्तरवृत्तं विशेषेण कर्णपथं समायाति।

संस्कृतखृष्टीयसाहित्यसमीक्षणं कुर्वता प्रख्यातप्राच्यतत्त्वविशारदेन श्रीराघवन्-वर्येण काव्यानामेतेषां नास्ति किमपि महत्त्वं तथा भारतीयसाहित्ये समाजे वा तेषामन्तर्भुक्तिरेव कारणान्तरं सूचयतीति मतं प्रकाशितम्। भारतीयसंस्कृत्या साकं किमपि योगसूत्रं काव्यानामेषां न सञ्जातमिति कृत्वा काव्यानां रचनावैफल्यं तु स्फुटमेव। तथाह्याह राघवन्-पादः –

“Another strange product of the early British age, at the beginning of the Christian missionary movements in India, is the attempt to put into the classical language of Hinduism the text of the Bible or its parts. Over a score of such Sanskrit versions of Biblical selections are known; one common feature of these is the very crude and unintelligible jargon in which most are written, which shows the significant failure of the Christian missions to establish any link with the learned of the land.”[142] इति।

एवमेव काव्यानां संस्कृतसाहित्यविस्ताराय कश्चनापि प्रभावो नास्तीति ब्रूते *Modern Indian Literature: An Anthology* इत्याख्ये प्रबन्धे भारतस्यान्यतमः प्रख्यातः शास्त्रतत्त्ववेत्ता विद्वान् श्रीकृष्णमूर्तिचरणः –

[142] Raghavan, V. *Modern Sanskrit Writings*. Madras: The Adyar Library and Research Centre, 1956, pp. 5-6.

"The Serampore missionaries, as far back as the first half of the nineteenth century, had issued several editions of the Sanskrit translation of the Holy Bible. But these did not have any noticeable impact on the growth of new literature in Sanskrit."[143] इति।

परन्तु चिन्ताहरणचक्रवर्तिना तदीये बङ्गभाषाबद्धे *आधुनिक संस्कृत साहित्य* इत्याख्यस्य ग्रन्थस्य *भाषा साहित्य संस्कृति* इति प्रबन्धे निगदितं यद् ऊनविंशशतकस्य प्रथमभागे यदा भारतवर्षे विशेषतया कलिकातायां खृष्टीयसम्प्रदायाः *बाइबेल* इति धर्मीयग्रन्थस्यानुवादसंस्करणप्रकाशनाय न्यस्तप्रतीतयो बभूवुस्तदैव येषूखृष्टस्य तच्छिष्याणां वा जीवनवृत्तान्यवलम्ब्य संस्कृतपुराणानां रचनारीत्या प्राच्यैः पाश्चात्यैश्च मौलिकसंस्कृतकाव्यानि प्रणीतानि। तत्र प्रतीच्यभवस्य म्यूरसाहेबस्यावदानं तु वाचामगोचरमिति चिन्ताहरणमतिः। अपि च, प्राच्यपण्डितेन श्रीताराचरणचक्रवर्तिना प्रणीता *ख्रीष्टोपनिषत्* इत्याख्या काचन उपनिषदपि प्रकाशिता विंशशतके इति तथ्यं तेनैवोपर्युक्ते प्रबन्धे प्रदत्तम्।

भारतवर्षे संस्कृतखृष्टीयसाहित्यस्य प्रथमसमीक्षकेण श्रीमता सत्यव्रतशास्त्रिणापि काव्यानामेतेषां महत्त्वं स्वीकृत्योक्तं यत् –

"…there has grown in Sanskrit a considerable corpus of Christian literature both in original and in translation. The literature, though composed primarily to reach the Sanskrit-knowing intelligentsia to motivate it to Christianity, has a lot to commend itself even as work of art and consequently deserves wide notice not only in India but also beyond its shores."[144] इति।

यद्वा भवतु नाम समीक्षकाणां दृष्टिः, मन्मते तु प्राच्यैः प्रतीच्यैश्च पण्डितैः संस्कृतेन प्रणीतस्य खृष्टीयवाङ्मयस्याध्ययनं तु नितरामेवापेक्षितम्। काव्यानामुत्कर्षतास्ति न वेति विचारार्थमपि तेषां समीक्षात्यावश्यिकीत्यत्र मन्ये नास्ति कस्यचिदपि विमतिः।

---

[143] Kishnamoorthy, K. "Sanskrit" in *Modern Indian Literature: An Anthology*, vol. 1: *Surveys and Poems*, New Delhi: Sahitya Akademi, p. 356.

[144] खृष्टसाहित्य., पृ. ५.३२३.

## ६.२. धर्मतत्त्वमीमांसा – श्रीजान्म्यूरदिशा

संस्कृतखृष्टीयसाहित्यमिदं सम्पूर्णमेव विविधधर्मीयतत्त्वाश्रितं मोक्षोपयोगिवाक्यसमेतं तथा चोपदेशसमृद्धम्। अत्र मुख्यतया खृष्टीयतत्त्वानामेव व्याख्यानं सुलभम्। परन्तु प्रसङ्गगत्या संस्कृतखृष्टीयसाहित्यस्य कविभिरन्यैर्धर्मैः साकं खृष्टीयधर्मीयतत्त्वानां तौलात्मिकमालोचनं कृतमत्र। तथाहि खण्डनमण्डनदिशा पल्लवितेऽस्मिन् साहित्ये विद्यमानानां नानाधर्मीयतत्त्वानां सूक्ष्मेक्षिकया समीक्षयेदमत्र प्रतिभाति यदिदं साहित्यमान्तर्धर्मीयविश्वासानां ज्ञानोपलब्धये सुतरामेवोपयोगीति। साम्प्रतं श्रीजान्-म्यूरेण तदीयसंस्कृतखृष्टीयकाव्येषु प्रदर्शिता धर्मतत्त्वमीमांसा समासेन समीक्ष्यते समीक्षात्मकदृष्ट्या।

मुक्तिरेव परमः पुरुषार्थः समेषामितरपुरुषार्थानामनित्यत्वात्, मुक्तेश्च नित्यत्वात्। अतो मुक्तेरुपाय एवास्माभिः सदानुसन्धेयः। अस्माकं कवेर्नये मुक्तेरुपायः केवलं शास्त्राद् नाम ईश्वरोपदेशादेव ज्ञेयः, उपायान्तरेण तज्ज्ञानमशक्यमिति। वस्तुतः पृथ्व्यां नास्ति कोऽपि मनुष्यो यो धीरोऽपि सन् स्वबुद्धिप्रभावमात्रेण मुक्तेरशेषविषयान् जानीयात्। मनुजाः स्वबुद्धिशक्त्या बहूनतीन्द्रियपदार्थान् दृष्टश्रुतपदार्थेभ्यो हेतुभ्यो जानन्ति। यथा सिकतासु मनुष्यपदलक्ष्माणि दृष्ट्वा मार्गेणानेनास्यां दिशि कश्चन जनोऽगच्छदित्यनुमातुं शक्यते, यथा वा दग्धं शून्यं भग्नप्राकारं कञ्चिद् ग्रामं वीक्ष्यानुमितिर्भवति यत्केनचनारिणा ग्रामोऽयं लुण्ठितः अग्न्युत्पातादिहेतोर्वा तस्माद् ग्रामात् प्रजाः सर्वाः स्वस्ववेश्मानि परित्यज्य पलायिता इति, तथैवानुमानेनेश्वरसम्बन्धि ज्ञानमपि भवितुमर्हति। तथाहि विशालस्यास्य विश्वस्य कश्चनावश्यमुत्पादकः स्यात्। तेनातिविचित्रकर्मकृता तत्सूचितसद्गुणैर्विशिष्टेन परमात्मना भाव्यमिति स हि सर्वात्मविलक्षण ईश्वरः। एवं परलोकमपि ज्ञातुं शक्नुमो वयम्। यदा संसारेऽस्मिन् सत्पुरुषा यावज्जीवं दुःखमुपभुञ्जानाः दुष्टाश्च सुखमनुभवन्तो दृश्यन्ते, तदा विचारिणां मनसि शङ्का समुत्पद्यते यदेतादृशोऽपि कश्चन लोकोऽवश्यं स्यात्, यत्र साधवो दुष्टा वा स्वस्वकर्मानुसारं फलं प्राप्नुयुरिति। इत्थं परलोकस्यानुमानेन ज्ञानं यद्यपि कथमपि सम्भवति, परन्तु नैव तन्निःसंशयं निरवशेषं वा। अतीन्द्रियपदार्थेषु बुद्धिमद्भिर्बहवः परस्परविरुद्धा मतवादाः समुत्थाप्यन्ते, तस्मात्प्रकृतज्ञानी जनः सन्तोषमलभमानः सत्यं तथा सम्पूर्णं ज्ञानमपेक्षते। अतो मुक्त्युपायज्ञानाय शास्त्रमवश्यमपेक्षितमित्यत्र नास्ति संशीतिरिति कवेर्मतम्।

ईश्वरीयं ज्ञानं जगतः सर्वदेशीयजनैरेकस्मादेवादिमूलात्समवाप्तमित्यपि कविना प्रतिपादितम्। यथा मनुष्यद्वये वदनवचनगमनादीनां साम्यावेक्षणात्तयोर्मिथो भ्रातृत्वमनुमीयते, तथैव नानादेशीयानां धर्माणां मतानाञ्च रीतिसाम्यदर्शनात् तेषामेकमूलत्वमवश्यमस्तीति वाच्यम्। यद्यपीश्वरस्य गुणविषये सर्वेषां जनानां मतसाम्यं नास्ति, तथापि प्रायः सर्वदेशीयाः कमप्यतिमानुषं प्रभुं स्वीकुर्वन्तीत्येकं प्रमाणम्। विश्वस्य मुख्यदेशानां प्राचीनशास्त्रेषु सृष्टिक्रमो मिथो न्यूनाधिकतया समान एवेति द्वितीयं प्रमाणम्। विविधदेशानां शास्त्रेषु मानवानां प्रथमावस्थावर्णनाविषयेऽपि सम्मतिरस्तीति तृतीयं प्रमाणम्। यथा भारतवर्षस्य शास्त्रेषु प्राप्यते तत्त्वमिदं यत्प्रथमे सत्ययुगे सर्वे जनाः पवित्राः सुखिनश्चासन्, पश्चात् त्रेताद्वापरकलियुगेषु क्रमेण ते दुष्टाः धर्ममार्गतः प्रभ्रष्टा दुःखिनश्च सञ्जाताः। एवमेव ये प्राचीना यवना महम्मदानुगेभ्योऽपि पूर्वमासन् तेषां पुराणकथास्वपि सौवर्णाख्यः कश्चनादियुग आसीत्, पश्चात् रजतपित्तललोहानां युगाः क्रमेण समागताः। एवमेव यहूद्यानां प्राचीनशास्त्रेष्वपि मानवानामाद्या दशा पूता सुखावहा चासीत्, परं यदादिमपुरुषेण तत्पत्न्या चेश्वराज्ञा उल्लङ्घिता, तदा तौ स्वकीयपूतावस्थातोऽपतताम्। तदारभ्य तयोः सन्ताना अपि दिग्भ्रष्टा भ्रमन्ति तत इतः। इत्थं संसारस्य प्रलयोऽपि पूर्वोक्ते त्रिविधे शास्त्रे प्रायः समभावेनैव वर्णित इत्यालक्ष्यते।

पशुयागस्य होमस्य वा विषयोऽपि प्रायः सर्वस्मिन्नपि शास्त्रे चर्चित आस्ते। यथा भारते वेदादिशास्त्रेषु यहूदीये तौरेताख्ये शास्त्रे च यज्ञविषयी विधिः समानतयैव वर्णितः। प्राचीनयवना अपि वलिदानेन धूपादिज्वलनेनैव स्वस्वदेवता अयजन्त। प्रायः सर्वस्मिन्नपि देशे कालपरिच्छेदार्थं सप्ताहः कल्पितोऽस्ति। तस्मादिदमनुमीयते यत् सर्वदेशीयशास्त्राणां तु मूलमेकमेवास्ते।

सर्वदेशीयशास्त्राणामेकमूलत्वादपि तेषां मध्ये बहुत्रैव मिथो विरोधो दृग्गोचरीभवति। वस्तुतो धर्ममार्गस्य यज्ज्ञानमादौ यथार्थं तथा च निर्मलमासीत्, तत्परम्पराप्राप्तं ज्ञानं ग्रन्थेषु लिपिबद्धं नासीत्। वेदस्य श्रुत्यपरं नाम तदेव तत्त्वं निर्दिशति। अत ईश्वरीयमादिशास्त्रं भिन्नभिन्नदेशीयजनैः भ्रमेण दुष्टतया च विभ्रश्य स्वस्वनूत्नमतैर्मिश्रितम्। यथा बह्व्यो नद्यः कस्माच्चित् पर्वतनिर्झरात् निर्गत्यादौ स्वच्छप्रवाहास्तिष्ठन्ति, ततश्च विविधदेशेषु प्रसरन्तो मलसंसर्गान्मलिना जायन्ते, तथैव धर्ममार्गस्यापि ज्ञानमादौ निर्मलमेवासीत्, पुनश्च नानादेशेषु प्रसरणात्क्रमशो प्रचुरमलसंसर्गाद्

अशुद्धमभवत्। परन्तु सत्यस्यैकरूपत्वात् भ्रमाणाञ्च नानारूपत्वान्मानवानां रुच्यनुसारेण विविधेषु देशेष्वयथार्थमतान्यजनिषत।

कस्यापि शास्त्रस्येश्वरोक्तत्वं प्रतिपादयितुमवश्यं स्यात्प्रमाणं किञ्चिदपीति तु कवेः सुनिश्चिता मतिः। तथाहि खृष्टीयमते किमपि शास्त्रं यदुपज्ञं भवेत्, स आचार्योऽवश्यमेव साधारणमनुष्यैरसाध्यानि अद्भुतकर्माणि कर्तुं शक्नुयादिति। सा चाद्भुतशक्तिस्तु द्विधा विभक्ता – अद्भुतकार्यजनिका प्रथमा, अद्भुतज्ञानरूपा हि द्वितीया। तत्र प्रथमा शक्तिर्यथा रोगपीडितानां स्ववचनप्रभावमात्रेण सपदि स्वस्थीकरणं मृतजनानां वा सञ्जीवनमित्यादिकमद्भुतकर्म। द्वितीया पुनः भवति भविष्यद्वक्तृता, यथा शतवर्षेभ्यः पश्चाद् यद्वृत्तं संघटिष्यते तस्य सविस्तरं वर्णनमिति।

अद्भुतशक्तिर्यस्मिन् खल्वाचार्ये दरीदृश्यते तस्मिन् यद्यपि ईश्वरप्रेरितोऽयमिति प्रत्ययो जायते तथापि यावत्तच्छास्त्रं न सूक्ष्मेक्षिकया विचार्येत तावत्तद्बुद्धिमन्तो जना न गृह्णीयुरिति धिया शास्त्रस्येश्वरोक्ततायामन्यं स्यात् प्रमाणम्। तद्धि भवति ईश्वरप्रेरिताचार्येण प्रतिपादितस्यार्थस्य शुद्धिः, यया खलु धर्मः सदैव विवर्द्धेतेति। वस्तुतः समेषां मानवानां मनसि धर्माधर्मविवेकोऽस्ति यतः खला अपि जानन्ति यद्धर्माचरणमुत्तममुचितं भाविफलदं च, अधर्माचरणं पुनः कुत्सितमनिष्टं च फलदायि भवतीति। अतः परमात्मा स्वयमेव धर्मात्तुष्यति, अधर्माच्चासन्तुष्टो भवति। तर्हि योऽपि कश्चनाचार्यस्तादृक् शास्त्रं प्रचारयेत्, यस्मिन् विश्वासे कृते मनुष्येषु सद्भावस्य हानिः सत्यन्यायदयादिसद्गुणानां विनाशो भवेत्, द्वेषहिंसाकपटव्यभिचाराद्यसद्गुणानां च वृद्धिर्भवेत्, तादृक् शास्त्रं कदापि ईश्वरोक्तं भवितुं नार्हतीति बुद्धिमन्तो जनाः सम्यग् जानन्ति। कोऽपि धार्मिकः ईश्वरप्रेरितः पुरुषः स्वपुत्रान् असन्नोपदिशेत्, येन तदीयमन्तःकरणं दूषितं पापपूरितं च जायेत। तथैव परेश्वरोऽपि मर्त्यान् कदापि भ्रामकमसत्यं च शास्त्रं न ददेत।

केन खलु पुरुषार्थेन वास्तवं शर्माधिगन्तुं शक्यत इति शिष्येण पृष्टो गुरुराह यत् परमेश्वरसेवात एव सर्वथात्मसन्तोषः प्राप्यत इति। अतः सदाचारान्वितां श्रद्धां ये खल्वाश्रयन्ति, तेषां चित्तेषु सदानन्दो विराजते। समग्रस्यापि जगतो यो हि कर्ता पाता शास्ता सत्तम ईश्वरो वर्तते, स एव केवलं मानवान् सर्वथोपकर्तुं शक्नोति। ये पुनः दरिद्रा दुःखिनोऽविद्वांसो जनाः सन्ति, तेऽपि परमेश्वरे श्रद्धां कृत्वा शान्तिं प्राप्नुवन्तीत्यत्र नास्ति संशीतिः। तथाह्याह कविः स्वीये *शर्म्मपद्धतिः* इत्याख्ये काव्ये –

"दृढा परेश्वरे श्रद्धा शिष्यैकैवात्मतृप्तिदा।

परमेश्वरसेवा हि परमार्थस्वरूपिका।।

असाध्यो मिलितैः सर्वैः पुरुषार्थान्तरैरपि।

संसिद्ध्यत्यात्मसंतोषः परमार्थस्य सेवनात्।।"[145] इति।

खृष्टीयनये स्वर्गः कीदृक् लोकः मुक्तिर्वा कीदृशीति प्रतिपादयितुमनाः कविराह यद् ब्रह्मणि लयो नैव मुक्तिरिति खार्ष्टकानां मतम्। मर्त्यैः स्वीयपुण्यकर्मभिः स्वर्गो नार्जितः, अपि तु खृष्टस्यानन्तेन पुण्येनोपार्जितः हि सः। अतस्तत्स्वर्लोकं प्रविश्य जनाः कदापि पुनः न पतेयुः, तत्रैवेष्टे स्वर्गलोके सदा तिष्ठेयुरित्यत्र भारतीयशास्त्रेभ्यो वैपरीत्यं तु सुस्पष्टमेव। वस्तुतस्तु पापान्धीभूतमानसैः संसारकारास्थैर्मर्त्यैः पारलौकिकं तत्सुखं बोद्धुं न शक्यते। तस्मिन् शुभानन्दान्विते सत्तमे लोके कदाचन दुःखसंघः शोको वा प्रवेष्टुं न शक्नुयात्। अतः परेश्वरस्यार्चनात् तन्माहात्म्येन भययुतात् तत्प्रेम्णश्च स्वर्गीयानन्दः प्राप्यते। किं बहुना, यैस्तु मुक्तिर्न गम्यते, तेषां कृते भयङ्करो दण्डोऽपेक्षते। अतस्तस्मिन्नुग्रपीडायुक्ते भयानकेऽक्षये स्थाने यथा न कोऽपि पतेत्तदर्थं प्रभोः सकाशात् क्षमा प्रार्थनीया सदैव। वस्तुतः खृष्टे यः कश्चिदपि विश्वस्यात्, स स्वर्गीयशर्मोपेतं पापमोचनं लब्ध्वा स्वर्गभाग्भवेदित्यस्ति खार्ष्टकानां नयः। तदुच्यते कविना तदीये *पापमोचनीययथार्थोपायप्रदर्शनम्* इत्याख्ये काव्ये –

"फलं हि खृष्टसिद्धस्य त्राणस्याखिलवंशजैः।

मनुष्यैः शक्यते लब्धुं पापघ्नं नित्यशर्मदं।।"[146] इति।

तथाहि म्यूरवर्येण धर्मतत्त्वानां यन्मीमांसा प्रस्तुता स्वकाव्येषु तेषां समीक्षणात्स्पष्टमेतत्प्रतीयते यद् भारतीयशास्त्रोक्तधर्मतत्त्वमीमांसातः सावश्यं वैभिन्न्यं बिभर्तीति तद्विषयिणी समीक्षाप्यपेक्षत एव।

---

145 *शर्म्मपद्धतिः*, पृ. ११.

146 *पापमोचनीययथार्थोपायप्रदर्शनम्*, पृ. ११.

## ६.३. प्राग्भवानां कवीनां शास्त्राणां च प्रभावः

भारतीयानां कवीनामन्यतममेकं वैशिष्ट्यं तावद् यत्तेषां काव्येषु प्राग्भवान् कवीन् प्रति अकुण्ठश्रद्धामिश्रिता सरस्वती प्रायः प्रतिच्छत्रं दृग्गोचरीभवतीति। प्राचीनमतं खण्डनसमयेऽपि ते कवयः शास्त्रकारा वा पूर्वपक्षिणां पण्डितानां स्तुतिमेवादौ विदधति। अत्र महिमभट्टकृता ध्वनिवादप्रवक्तुरानन्दवर्धनस्य स्तुतिरेव प्रमाणम्। अन्यत्रापि भवभूतिना 'उत्तररामचरित'स्य प्रारम्भ एव गुरुप्रसादमिच्छता पूर्वेभ्यो वाल्मीकिभासकालिदासादिभ्यो व्याह्रियते च प्रणतिः। तदुच्यते *उत्तरे रामचरिते*–

"इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।

विन्देम देवतां वाचममृतामात्मनः कलाम्।।"[147] इति।

एवमेवास्मिन् जान्म्यूरप्रणीते संस्कृतखृष्टीयसाहित्येऽपि नैकेषां भारतीयशास्त्राणां तथा खृष्टीयधर्मग्रन्थानां वचनान्यत्र कविः क्वचित्स्वमतं प्रतिष्ठापयितुं तथा दृढीकर्तुं क्वचिच्च दूषयितुं प्रयोजयामास।

विशेषतया महाकविना कविकुलकोकिलेन कालिदासेन नितरां प्रभावितो बभूव सः। किं बहुना, संस्कृतसाहित्यस्य कालिदासेन इव संस्कृतखृष्टीयसाहित्यस्य कालिदासेन श्री-उइलियम-हज-मिल-वर्येणापि स म्यूरो नितरामेवासीत्प्रभावित इत्यत्र नास्ति सन्देहावसरः।

तथाहि *श्रीयेषूखृष्टमाहात्म्यस्य* प्रथमाध्याये चतुर्भिः श्लोकैः कविना श्रीखृष्टस्याद्भुतकथाया यद्वर्णनमकारि, तत्र तेन महाकवेः कालिदासस्य रचनाप्रणाल्येव समाश्रिता। कालिदासेन यथा 'रघुवंश'स्य प्रथमे सर्गे रघूणामन्वयः प्रतिपादितस्तथैवेहापि म्यूरपादैः श्रीयेष्वश्चरितमुपवर्णितम्। अहो सादृश्यं धत्ते तयोर्वाचनभङ्गीभणितिः। तथाह्यधस्तात् कविवर्ययोः कालिदास-जान्म्यूरयोर्वैदग्ध्यमिश्रिताया वाचः साम्यमतुलनीयं समेषां सहृदयहृदयानां हृदयाह्लादनाय समुपस्थाप्यते –

---

[147] उत्तर. राम., पृ. ४३.

| *रघुवंशम्* | *श्रीयेषूखृष्टमाहात्म्यम्* |
|---|---|
| यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।<br>यथापराधदण्डानां<br>यथाकालप्रबोधिनाम्।।१.६।।<br>त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।<br>यशस्ते विजिगीषूणां प्रजायै<br>गृहमेधिनाम्।।१.७।।<br>शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।<br>वार्धके मुनिवृत्तीनां योगेनान्ते<br>तनुत्यजाम्।।१.८।।<br>रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।<br>तद्गुणैः कर्णमागत्य चापलाय<br>प्रचोदितः।।१.९।। | अथेश्वरात्मजस्याहमनादेर्जगदीशितुः।<br>नृमध्ये त्ववतीर्णस्य<br>संगुप्तैश्वर्यलक्ष्मणः।।१.११।।<br>कुमारीगर्भजातस्य धृतबालकवर्ष्मणः।<br>अस्पृष्टस्याघलेशेन भुक्तपापफलस्य<br>तु।।१.१२।।<br>जगद्गुरोर्जगद्बन्धोर्जगन्मोक्तुर्जगत्प्रभोः।<br>जगत्कल्याणमूलस्य<br>सर्ववंशोपकारिणः।।१.१३।।<br>श्रीखृष्टस्याद्भुतां वक्ष्ये सत्कथां हृष्टमानसः।<br>तस्योदारात्मनः प्रेम्णा परमेण<br>प्रवर्तितः।।१.१४।। |

श्रीखृष्टस्यावताराद्वर्षशतत्रयात्प्रागेव भव्यवक्तृभिरारचिता सम्पूर्णा ग्रन्थसंहिता यहूदिन्या तथा यावन्या वाण्याप्यनूदिता। न केवलं यवना रोमिणो वा तद्गुणैर्महोन्नतिं प्राप्ताः, अपि तु भारतेऽपि तस्य कीर्तिगाथा क्रमेण विस्तृता। तदुच्यते कविना *श्रीयेषूखृष्टमाहात्म्ये* –

"देशेषु परितःस्थेषु क्रमशश्च प्रणादितः।

तेषां कीर्त्तेः प्रतिध्वानः शुश्रुवेऽत्रापि भारते।।"[148] इति।

तथाहि 'महाभारत'स्य श्लोकमुद्धृत्य कविना तदीयवचनस्य याथार्थ्यं प्रतिपादितम्। तेन तु केवलमेकस्यैव श्लोकचरणस्योद्धृतिः *श्रीयेषूखृष्टमाहात्म्ये* सन्निवेशितः –

148 श्री. येषू. मा., पृ. १७.

'तथा च महाभारते ।। सर्वज्ञा यवना राजन् शूराश्चैव विशेषत इति।'[149] इति।

एवं प्रतीच्यां यथा भविष्यतस्त्रातुर्विस्तृता कथानेकैः सद्भिर्जगृहे स्वकीयां दुर्दशामनुभूय, तथैव प्राच्येऽपि भारते खृष्टमतानि नैकेऽनुमेनुर्जना इति कवेर्मतम्। तथाहि मतमिदं प्रतिष्ठापयितुमना जान्म्यूरः 'श्रीमद्भगवद्गीता'तः प्रभोः कृष्णस्य मुखनिःसृतां वाणीमपि तदीये *श्रीयेषूखृष्टमाहात्म्ये* प्रथमाध्यायस्यान्ते समुद्दधार –

"यथा प्रतीच्यलोकेषु तथा प्राच्येऽत्र भारते।

क्षितावैशावतारस्य मतमाशिश्रिये सदा।।

यथा भगवद्गीतायां –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।"[150] इति।

न केवलं भारतीयशास्त्रेभ्यस्तेन स्वमतप्रतिष्ठापनाय वचांस्युद्धृतान्यपि तु संस्कृतखृष्टीयसाहित्ये सुतरामेव प्रथितयशस्काया मिलपादैः प्रणीतायाः 'खृष्टसंगीता'याः बहवः श्लोका अत्रामूलचूडमुद्धृताः। क्वचिद्वा केषाञ्चित् श्लोकानां भावमादाय स्वभाषया प्रस्तुतं स्वकीयं मतम्। प्रायः सर्वस्मिन्नेव तदीये काव्ये संस्कृतखृष्टीयसाहित्यस्य गुणगरिम्णा मुख्यतमायाः 'खृष्टसंगीता'याः न्यूनाधिकं प्रभावस्त्ववश्यमस्तीति स्वयं जान्-वर्यः स्वीकरोति। अस्य नितान्तमेव रोमाञ्चकरं तथा करुणातिकरुणं निदर्शनमुपलभ्यते प्रभोः खृष्टस्य शूलबिद्धीकरणवर्णनावसरे। तथाह्यधस्तात्प्रदर्श्यते तयोरुभयोः कविवर्ययोः रचनाशैलीसाम्यम् –

---

[149] श्री. येषू. मा., पृ. १७.

[150] तत्रैव, पृ. १८-१९.

| *खृष्टसंगीता* | *श्रीयेषूखृष्टमाहात्म्यम्* |
|---|---|
| एष शूल ऋजुभ्यां तु दारुभ्यां परिनिर्म्मितः।<br>विज्ञेयः स्तम्भवत्त्वेकं तयोरन्यच्च<br>दिङ्मुखम्॥४.१२.६॥<br>सप्तहस्तमितं पूर्व्वं स्तम्भवत् स्थापितं भुवि।<br>तच्चूडान्तिकलग्नं चु मध्यमन्यस्य<br>दारुणः॥४.१२.७॥<br>इदं व्याममितं त्वस्ति दिङ्मुखं किल संस्थितम्।<br>नद्धुं तदग्रयोर्हस्तौ<br>तत्रोत्तोलितदोषिणः॥४.१२.८॥<br>तस्य दण्डायमानस्य देहं तु स्तम्भदारुणि।<br>लग्नं नद्धौ पदौ<br>चास्मिंस्तलाद्धस्तत्रयान्तरे॥४.१२.९॥<br>रज्जुभिस्तु तमुत्तुल्य पूर्व्वं कीलैस्ततः पदौ।<br>स्तम्भदारुण्यविध्यंस्ते तथा हस्तौ च<br>दिङ्मुखे॥४.१२.१०॥<br>चतुरङ्गेषु विद्धं तु तथोर्व्युत्तोलितं नरम्।<br>नान्यत्कृत्वात्यजन्नुग्रमृतिप्राप्त्यै शनैः<br>शनैः॥४.१२.११॥ | शूलस्तै रोमिभिर्द्वाभ्यां दारुभ्यां निरमीयत।<br>तदेकं लम्बमन्यच्च तिर्यक् काष्ठं<br>तस्मिन्नन्नह्यत॥५.९४॥<br>यंत्रस्याधस्तने भागे दृढमारोपिते भुवि।<br>सार्द्धव्यामोन्नतं तस्थौ तिर्यक् काष्ठं<br>महीतलात्॥५.९५॥<br>तस्मिंस्तिरश्चिकाष्ठे तु विततौ दोषिणः<br>करौ।<br>लौहैः कीलैरवध्येतां पादौ लम्बे च<br>दारुणि॥५.९६॥<br>विद्धाङ्घ्रिपाणयस्तद्वल्लम्बमानाश्च<br>दोषिणः।<br>सुतीव्रां वेदनां भुक्त्वा शनैः<br>पंचत्वमाप्नुवन्॥५.९७॥<br>श्रीयेषूं तद्विधे शूले विव्यधुर्दण्डपाशिकाः।<br>द्वयोस्तस्करयोर्मध्ये<br>दोषवन्तमिवानघम्॥५.९८॥ |

एतद्व्यतिरिच्य, कविना इयेट्स-पादस्य ‘Sanskrit New Testament’ इति ग्रन्थस्यापि केचन श्लोका अत्रोद्धृताः, तत्रत्यान् श्लोकान् कांश्चिद्वानुसृत्यात्र प्रस्तुताः। तथाहि तयोराभारं व्यक्तीकुर्वता म्यूरपादैः *श्रीयेषूखृष्टमाहात्म्यम्* इति ग्रन्थस्य प्रास्ताविके स्पष्टमवादि यत् –

"Free use has been made of the renderings of terms in Dr. Mill's Christa Sangītā and in Dr. Yate's Sanskrit New Testament, and some entire Slokas of the former have been employed."[151] इति।

श्रीकृष्णरिव श्रीयेषूरपि जगति धर्मप्रतिष्ठापनायैवावतीर्णोऽभूत्। तस्मादिह प्राधान्येन 'श्रीमद्भगवद्गीता'याः प्रभावोऽस्माभिरालक्ष्यते। तद्रचनानुगा रचनापीह न दुर्लभा। तथाहि अपराधानां समाप्तये यज्ञानां प्रारब्धये पापस्य शोधनाय जगति च सततं धर्मस्यैव प्रवर्तनाय श्रीखृष्टस्याविर्भावोऽभवदिति कवेर्मतम्। अतः *श्रीयेषूखृष्टमाहात्म्यस्य महामोक्तृप्रतीक्षाख्ये* प्रथमाध्याय एव दृश्यते, भगवतः श्रीयेष्वो धराधाम्न्याविर्भावोऽभवत्कथमिति जिज्ञासायामुच्यते –

"रोधनायापराधानां यज्ञानां च समाप्तये।
पापस्य शोधनार्थाय नित्यधर्मप्रवृत्तये।।"[152] इति।

बहुविधानां भारतीयशास्त्राणामध्ययनं तु कविवरेण कृतमित्यत्र नास्ति सन्देहः। तथाहि तेषां शास्त्राणामुद्धृतिर्बहुत्रैव तेन विहितेति तच्छास्त्राणां प्रभावस्तल्लेखन्यां नितरामेवासीदिति तु न्यूनमेव प्रमाणीभवति। यथा वेदादीनां शास्त्राणां ब्रह्ममुखोत्पत्तिं वर्णयता कविना *भागवतपुराणस्य* तृतीयस्कन्धस्य द्वादशाध्यायतः श्लोकाः समुद्धृताः। तथाहि *मतपरीक्षाया*ः प्रथमे खण्डे वयं तद्वर्णनं द्रष्टुं शक्नुमः –

"कदाचिद् ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात्।
कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा।।
ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः।
शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात् क्रमात्।।

---

151 श्री. येषू. मा., Preface, p. iii.

152 तत्रैव, पृ. १६.

इतिहासपुराणानि पञ्चमं वेदमीश्वरः।

सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनं।।"[153] इति।

श्रुतेः प्रामाण्यं प्रमाणयता जैमिनिना मीमांसाशास्त्रे यदुक्तं, तदपि सम्यक्तया स्वकाव्ये तेन म्यूरपादेन प्रतिपादितमित्येव कवेर्विशेषता। तथाह्याह म्यूरः –

"तथा च पूर्वमीमांसासूत्रकृज्जैमिनिर्मुनिः।

श्रुतेः प्रामाण्यमेताभिः साधयत्येव युक्तिभिः।।"

"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य

ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे

तत् प्रमाणं बादरायणस्यानपेक्षत्वात्।।

वेदांश्चैके सन्निकर्षं पुरुषाख्याः।। अनित्यदर्शनाच्च।।

उक्तन्तु शब्दपूर्वत्वम्।। व्याख्याप्रवचनात्।।

परन्तु श्रुतिसामान्यम्।।"[154] इति।

एवमेव न्यायसूत्रवृत्तिकारस्य विश्वनाथस्यापि मतं स्थान एव समुपस्थापितम्। तथा च प्रसङ्गगत्या ऋग्वेदस्य ऋचां, रामायणस्य महाभारतस्य मनुसंहितायाः वा श्लोकानां, विष्णुपुराणस्य मत्स्यपुराणस्य भागवतपुराणस्य ब्रह्मवैवर्त्तपुराणस्य लिङ्गपुराणस्य वा श्लोकानां, भगवद्गीताया विष्णुधर्मतन्त्रस्य वा मतानां, रघुवंशादिकाव्येभ्यः श्लोकानां वा समुद्धृतिस्तेन विहितेति म्यूरकाव्येषु भारतीयशास्त्राणां भूयान् प्रभावोऽस्तीत्यत्र नास्ति कश्चन सन्देहावसरः।

---

153 *मतपरीक्षा (भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः)*, पृ. ३-४.

154 तत्रैव, पृ. ५.

## ६.४. श्री-जान्-म्यूरस्य जीवनदर्शनम्

समग्रमपि स्वजीवनं व्याप्य कवेः श्रीम्यूरस्य खृष्टधर्मप्रचारात्मकमेकमेवोद्देश्यमासीत्। तदीयेषु सर्वेषु काव्येष्वेव खृष्टधर्मीयमतान्येव तेन प्रयुक्तानि। तदर्थं तेन संस्कृतभाषाया एव प्रयोगो विहितः। तथा कृते हिन्दुजनास्तत्काव्यं पठेयुः, खृष्टधर्मीयतत्त्वानि जानीयुः, क्वचिच्च तद्वचोभिः प्रभाविताः सन्तः खृष्टधर्मं च स्वीकुर्युरित्यासीत्तदीया वाञ्छा। अतः संस्कृतखृष्टीयसाहित्ये विद्यमानानां प्रायः सर्वेषां काव्यानां लक्ष्यं तु तदेवासीदिति केषाञ्चिद्विदुषां मतम्। यथा *The Indian Christiad* इति ग्रन्थे समालोचकाभ्यामुच्यते –

"It is true that the Christian missionaries learned the Sanskrit language with a purpose – as an effective means of presenting the Christian message to the people of India…"[155] इति।

श्रीजान्-म्यूरः थमासनीय-सम्प्रदायस्य (James Thomason, Lieut.-Governor of the North-Western Provinces; 1843-53) अन्यतमत्वेन सर्वदैव प्रादेशिकैः खृष्टधर्मीयसम्प्रदायकर्तृभिः समं खृष्टधर्मप्रचाराय तत्परो बभूव। तदर्थं च बहवः प्रबन्धा अपि तेनालिखिताः, ये खलु तदानीं प्रादेशिकपत्रिकासु प्रकाशिता अभवन्। सामाजिककर्मस्वपि स व्यापृत आसीत्सदा। यथा दुर्भिक्षकवलिते भारते तेन खाद्यौषधादिद्रव्यप्रदानेन भारतवर्षीयेभ्यः साधारणजनेभ्यः प्रभूतं साहाय्यं विहितम्। प्रादेशिकभाषया विद्यालयीयपुस्तकानां प्रणयने तथा पाठप्रदानेऽपि तदीयमवदानं नितान्तमेवानन्यमासीत्। वाराणस्यां संस्कृतमहाविद्यालयस्याध्यक्षत्वेनापि स यदा कार्यरत आसीत्, तदा संस्कृतस्योन्नतये बहूनि प्रशंसार्हाणि कर्माण्यकार्षीत्सः। संस्कृतेन च नैकानि काव्यान्यपि तेन प्रणीतानीति तदानीन्तने काले संस्कृतसाहित्यसमाजे जान्-म्यूरस्य नाम नितरामेव प्रथितमासीदित्यत्र मन्ये न कस्यापि विप्रतिपत्तिरस्ति। तथाहि श्रीरिचार्ड-इयङ्ग-पादेन तदीयायां समीक्षायां यदवाचि, तत्त्ववश्यमेवानुसन्धेयमस्माभिः –

155 Ind. Christ., p. 106.

“He was in fact gradually becoming prominent and exceptional for his skills as a Sanskritist, one who moreover wished to contribute his knowledge of that language to missionary endeavor.”[156] इति।

खृष्टीयतत्त्वप्रचारात्मकं यज्जीवनदर्शनं जान्म्यूराभिप्रेतमासीत्, तस्य सर्वथा विस्ताराय तेन खृष्टीयसम्प्रदायानां प्रचारकेभ्यः पौनःपुण्येन प्रार्थितं यत्ते संस्कृतेन काव्यरचनया खृष्टीयमतानि भारते प्रचारयेयुरिति। परन्तु तादृशः कोऽपि सम्मुखं नागत इति दृष्ट्वा स स्वकस्कन्धे तत्कर्मभारं स्वीकृत्य प्रायः त्रयोदशसंस्कृतखृष्टीयकाव्यानि प्रणिनायेति तु नितान्तमेवानितरसाधारणं कार्यं कृतं तेन। तथाहि सुतरामेव दुःखेन इयङ्गवर्यो वक्ति यत् –

“Time after time, Muir issued this kind of appeal, urging that at least some of the missionaries ought to devote themselves to acquiring at least a modicum of the same “ripe and affluent scholarship” that Mill had so assiduously cultivated. None did, besides Yates and Wenger, who anyway were already preoccupied with their own projects, and therefore Muir tired of trying to arouse the enthusiasm of others and decided to heed his own call.”[157] इति।

श्रीजान्-म्यूरः स्वजीवनस्यान्तिमदिनं यावत् सर्वत्र विशेषतया स्वीयदेशे संस्कृतस्य प्रसाराय प्रचाराय यत्नपरो बभूवेति प्रकृतकर्मयोगिनः सर्वेऽपि गुणास्तस्मिन्नासीदित्युच्येत चेन्नात्युक्तिर्भवेदिति मतिर्मे निश्चिता।

**६.५. प्रकाण्डज्ञाननिधिः श्री-जान्-म्यूरः**

“कविता म्यूरपादस्य सविता च जगत्पतेः।

अद्भुता सृष्टिरुद्भूता मनःपद्मप्रबोधने।।”

[156] Ind. Christ., p. 79.

[157] तत्रैव, पृ. ८०.

- इति कालिदासस्तुतिं किञ्चित्परिवर्त्य म्यूरपादविषयेऽपि श्लोकोऽयमुदाहर्तुं शक्यते। अद्यापि कवेस्तस्य कीर्तिः समुद्रपारमागतापि वाडवाग्निज्वालेव निर्वाणं नैति। विद्वज्जनजनन्या वीणातन्त्रीमास्फालयन्त्या भगवत्या सुरभारत्या सरस्वत्यानुदिनमेव तदीया कीर्तिगीतिर्गीयत इति काचिन्नात्युक्तिः। किं बहुना, स्रष्टुः सृष्टिरचनाचातुरी विरमति श्रीजान्-म्यूर-वर्येण प्रणीतानां काव्यानां निर्माणप्रणालीं विचिन्त्य।

प्रसादगुणगुम्फिता महाकवेः रचनाप्रकृतिरितस्ततोऽटति चित्तहरं झंकारं श्रावयन्ती। येष्वो मुखनिःसृतकथाकलापकूजितै रसिकमनांसि समुल्लासयन्तो, सर्वदिग्गामिभिः ध्वनिभिः दिक्करिकर्णरन्ध्राणि आस्फोटयन्तो, धर्मकथां श्रोतुमिप्सुभ्यः सदुपदेशं प्रयच्छन्तः कं प्राणिनममन्दानन्दसन्दोहसमन्वितं कर्तुं न प्रभवाः सन्ति कविवरकोकिलाः ?

भारतीयदर्शनशास्त्रेष्वगाधं पाण्डित्यं श्रीजान्-म्यूरस्य प्रकाण्डज्ञाननिधित्वं सम्यक् स्फुटयति। सांख्ये, न्याये, वैशेषिके, योगे तथा वेदान्ते सर्वत्रैव तस्याबाधं विचरणम्। न केवलं दर्शनशास्त्रे, अपि तु वाल्मीकिव्यासकालिदासादीनां काव्यानामपि निरन्तरमध्ययनं तु तेनावश्यं साधितम्। परन्तु विशेषतया पुराणानां रचनाशैली कविमधिकमनुप्रेरयतीत्यत्र तत्प्रणीतानि काव्यान्येव प्रमाणम्। तथाहि प्रायः सर्वेष्वपि तदीयकाव्येषु गुरुणा साकं शिष्यस्य संवादमाध्यमेनैव काव्यधारा प्रवहति। व्याकरणशास्त्रस्यापि ज्ञानं तस्य सम्यगासीदित्यत्र नास्ति संशीतिः। स्वकाव्येषु लिट्लकारस्य रम्यः प्रयोगस्तस्य वैयाकरणप्रज्ञाया एव निदर्शनमिति नात्युक्तिर्भवेत्। स्मृतिशास्त्रतोऽपि विशेषतया *मनुसंहिता*याः पौनःपुण्येनोद्धृतिस्तत्काव्ये परिलक्ष्यते। यथा तत्प्रणीते *शर्म्मपद्धतिः* इति काव्ये दृश्यते *मनुसंहिता*या द्वितीयाध्यायस्य सप्तपञ्चाशत्तमः श्लोकः –

“अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनं।

अपुण्यं लोकविद्विष्टं तस्मात् तत् परिवर्ज्जयेदिति।।”[158] इति।

---

158 *शर्म्मपद्धतिः*, पृ. ३.

एतद्व्यतीत्य *प्रायश्चित्ततत्त्व* - *पूजापद्धति* - प्रभृतिशास्त्राणामपि पाठस्तेन कृत इत्यत्र नास्ति सन्देहावसरः। तथाहि म्यूरप्रणीते *पापमोचनीययथार्थोपायप्रदर्शनम्* इत्याख्ये ग्रन्थे तेन गङ्गास्नानेनाङ्घोदूरीकरणरूपं तत्त्वं खण्डयितुं भारतीयशास्त्रेभ्यो विविधेभ्यः प्रसङ्गानुसारं श्लोकानुद्धृतवान्।

खृष्टीयमतानां तावकं सम्यज्ज्ञानं तु सुतरामेव स्वाभाविकमित्यनायासेनैव भारतीयधर्मीयतत्त्वानां खण्डनाय तेन खृष्टीयधर्मतत्त्वानां व्यवहारो विहितः। मूलबाइबेलादीनां धर्मपुस्तकानां पाठो यथा तेन कृत आसीत्तथैव तदानीन्तने काले श्रीकेरीवर्येणानूदितस्य संस्कृत-*बाइबेल*स्यापि सम्यगध्ययनं तेन विहितम्। बहुत्रैव तेन म्यूरेण केरीमहोदयस्य संस्कृत-*बाइबेल*-संस्करणादुद्धृतिः स्वीकृता, स्वककाव्येषु च सन्निवेशिता।

संस्कृतछन्दसां प्रयोगेऽपि तस्य दाक्ष्यं सर्वैरेवानुसन्धेयम्। वस्तुतो रसानुसारेण काव्ये छन्दसां यथार्थः प्रयोगः कर्तव्य इति तु स जानाति स्म। तथाहि धर्मप्रचाराय प्रवृत्तः स सर्वदैव लघुच्छन्दसां व्यवहारो विहितः। तथा कृते साधारणजनेषु धर्मीयतत्त्वानां प्रचारः तथा बोधः सम्यग्भवतीति बुद्ध्या तेन अनुष्टुपः प्रयोगः सर्वाधिकतया कृतः। ततश्च इन्द्रवंशा, कदापि वा इन्दव्रज्रा, क्वचिदुपेन्द्रवज्रा क्वचिद्वा उपजातिः व्यवहृता। तथाहि *मतपरीक्षाया*ः द्वितीयखण्डे यदा वाराणस्यां वसन्ततौ गुरुशिष्ययोः सत्यार्थिवेदविदुषोः साक्षात्कारो भवति, ततश्च ग्रीष्मवर्षयोर्दृश्यं रम्यं कविर्वर्णयति नितरामेव माधुर्येण वाग्विन्यासेन इन्द्रवंशा-वंशस्थविलयोर्मिश्रणेन उपजातिच्छन्दसा। तदुच्यते –

"वसन्तकाले कुसुमान्विते गते

ग्रीष्मर्त्तुरुत्तप्तमहीतलोऽन्वगात्।

चण्डाः समीरा रजसाऽऽविला ववुः

सिताऽब्दमाला च नभस्यराजत।।

गते तु मासद्वितये प्रतापने

वर्षर्त्तुरग्रेऽनुददात्मनो गणान्।

श्यामाः पयोदा वसुधां सिसिक्षवः

समस्तमावव्रुरनन्तमण्डलम्।।”[159] इति।

द्वादशाक्षरयुत-इन्द्रवंशा-वृत्तेन श्लोकप्रणयने सुतरामेव सिद्धहस्तोऽयं कविवरः। तदुदाहरणं यथा *मतपरीक्षा*यां मनुष्यजातेः पित्रोः सृष्टिवर्णनावसरे –

“एकां पृथिव्यां धिषणावतीं वरां

जातिं सिसृक्षन् भजनार्थमात्मनः।

सिद्धौ नृजातेः पितरौ सुमेधसाव्

उत्पाद्य भूमौ निदधौ स ईश्वरः।।”[160] इति।

अलङ्काराणामपि प्रयोगे तद्वाक्ष्यमस्तीति तत्काव्यानां सूक्ष्मेक्षिकया समीक्षणात्प्रतीयते। न केवलम् अनुप्रासादीनां शब्दालङ्काराणाम्, उपमारूपकादीनाम् अर्थालङ्काराणामपि यथायथप्रयोगेऽपि कवेः श्रीम्यूरवर्यस्य प्रतिभावश्यमस्माभिः स्वीकार्या। यथा *मतपरीक्षा*याः प्रथमे भारतीयमतविचारात्मके खण्डे प्रभुमुखनिःसृतवचसां विक्रिया केन प्रकारेण जायत इति वर्णनावसरे कविः उपमाया रमणीयं प्रयोगं चकार –

“निर्गच्छद् उत्साद् विमलाज्जलस्य

स्रोतोऽस्ति सम्यङ्मलहीनमादौ।

वेगेन तत्तु प्रवहद् मृदादेः

सम्मिश्रणाद् आविलतां प्रयाति।।

---

159 *मतपरीक्षा (ख्रिस्तीयमतप्रदर्शनात्मको द्वितीयः खण्डः)*, पृ. २.

160 तत्रैव, पृ. १.

तद्वत् प्रवक्तुर्विमलाद् मुखोत्सात्

स्वच्छानि निर्गत्य कथात्मकानि।

स्रोतांसि वार्त्तान्तरमिश्रणेन

मिथ्याविलानि क्रमशो भवन्ति।।"[161] इति।

संस्कृतकाव्यानां प्रणयनं व्यतिरिच्य आङ्गलभाषया विरचितानां प्रबन्धानां ग्रन्थानां वा समीक्षया स्पष्टमिदं प्रतीतिर्भवेद्यत् प्रकाण्डज्ञानसम्पन्नो विविधशास्त्रवेत्तासीत्स इति। यथा कालिदासस्य सर्वस्वम् *अभिज्ञानशकुन्तलम्* इत्युच्यते, तथैव जान्-म्यूरवर्यस्य जीवनस्य प्रधानतमो ग्रन्थो हि *Original Sanskrit Texts on the Origin and History of the People of India, Their Religion and Institutions* इति। पञ्चखण्डोपेतस्यास्य महत्त्वपूर्णग्रन्थस्य प्रत्येकं खण्डे के के विषयाः खलु समालोचिता इत्यधस्तात्क्रमशस्तेषां नामग्राहं समुपन्यस्यते, तेनैव म्यूरीयं सर्वशास्त्रीयं ज्ञानं सम्यक् प्रकाशितं स्यादिति मामकं मतम्।

प्रथमे खण्डे – *Mythical and Legendary Accounts of the Origin of Caste, with an Enquiry into its Existence in the Vedic Age.*

द्वितीये खण्डे – *Inquiry whether the Hindus are of Trans-Himalayan Origin, and Akin to the Western Branches of the Indo-European Race.*

तृतीये खण्डे – *The Vedas: Opinions of their Authors, and of Later Indian Writers, in Regard to their Origin, Inspiration, and Authority.*

चतुर्थे खण्डे – *Comparison of the Vedic with the Later Representations of the Principal Indian Deities.*

---

[161] *मतपरीक्षा (भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः)*, पृ. ६.

पञ्चमे खण्डे – *Contributions to a Knowledge of the Cosmogony, Mythology, Religious Ideas, Life and Manners of the Indians in the Vedic Age.*

तथाह्यध्यायस्यान्तिमे वैदिकशास्त्राणामभूतपूर्वं विद्वांसं श्रीजान्-म्यूरमाश्रित्य प्रख्यातया इतिहासवेत्त्र्या ड.एभ्रिल-पाओयेल-वर्यया यन्मतं प्रस्तुतं सम्पूर्णस्यापि तज्जीवनस्य पुङ्खानुपुङ्खम् अध्ययनमनु, तत्तु समेषामेव सहृदयानां समक्षं समुपस्थापयितुमीहे –

"John's scholarly reputation over the century and a quarter since his death reinforces in many respects an image of the scholar his own contemporaries would recognize. His *magnum opus*, the *OST* has continued to be treated respectfully, the Indian editor of a 1970s reprint adjudging it 'the most sought after one among similar works in the field'. Many seem to regard it as an easily accessible compendium of translated Sanskrit sources, useful for providing footnote support on particular issues, particularly on the 'stages' through which the various castes emerged. Such a respected place in scholarly footnotes, but absence from the headlines, is probably where the overly modest John would be content to rest. Overshadowed in his own lifetime by the more ebullient Max Müller, his works have remained significant too for Western Indologists, but as one respectfully anticipated, chiefly as a 'mine of information', ever furthering the advances of others, but not opening up any entirely new seams."[162] इति।

इति

समाप्तः षष्ठोऽध्यायः।

[162] Powell, Avril A. *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire*, 2010, p. 282.

श्रीः

# क्रिस्तुभागवतम् ।

(महाकाव्यम्)

# KRISTUBHAGAVATAM

A MAHAKAVYA IN SANSKRIT BASED ON
THE LIFE OF JESUS CHRIST

By

**Prof. P. C. DEVASSIA**

Published by:

JAYABHARATAM - TRIVANDRUM-15

KERALA, INDIA.

# ORIGINAL SANSKRIT TEXTS

ON THE

## ORIGIN AND HISTORY

OF

# THE PEOPLE OF INDIA,

## THEIR RELIGION AND INSTITUTIONS.

COLLECTED, TRANSLATED, AND ILLUSTRATED,

BY

J. MUIR, D.C.L., LL.D.

---

VOLUME FIRST.

MYTHICAL AND LEGENDARY ACCOUNTS OF THE ORIGIN OF CASTE, WITH AN ENQUIRY INTO ITS EXISTENCE IN THE VEDIC AGE.

THIRD EDITION.

LONDON:
TRÜBNER & CO., LUDGATE HILL.

1890.

(*All rights reserved.*)

# REASONS

FOR THE

# ESTABLISHMENT OF A SANSKRIT CHAIR

IN THE

# UNIVERSITY OF EDINBURGH.

BY J. MUIR, D.C.L.
LATE OF THE BENGAL CIVIL SERVICE.

TO WHICH IS PREFIXED
A DECLARATION OF CONCURRENCE SIGNED BY NUMEROUS
SCOTTISH PROFESSORS AND PHILOLOGISTS.

EDINBURGH: THOMAS CONSTABLE AND CO.
HAMILTON, ADAMS, AND CO., LONDON.
MDCCCLX.

Digitized by Google
Original from
HARVARD UNIVERSITY

# RELIGIOUS AND MORAL SENTIMENTS

METRICALLY RENDERED

## FROM SANSKRIT WRITERS,

*WITH AN INTRODUCTION, AND AN APPENDIX CONTAINING EXACT TRANSLATIONS IN PROSE.*

BY

J. MUIR, D.C.L., LL.D., PH.D.

WILLIAMS & NORGATE,
14 HENRIETTA STREET, COVENT GARDEN, LONDON; AND
20 SOUTH FREDERICK STREET, EDINBURGH.
1875.

# NOTES

OF

# A TRIP TO KEDARNATH

AND OTHER PARTS OF THE SNOWY RANGE OF THE HIMALAYAS
IN THE AUTUMN OF 1853.

WITH SOME ACCOUNT OF

# A JOURNEY FROM AGRA TO BOMBAY

BY WAY OF AJUNTA, ELLORA, AND CARLEE IN 1854.

BY J. MUIR, ESQ.

PRINTED FOR PRIVATE CIRCULATION.

EDINBURGH: PRINTED BY THOMAS CONSTABLE,
PRINTER TO HER MAJESTY.

MDCCCLV.

Digitized by Google

UNIVERSITY OF CHICAGO

# ।। उपसंहृतिः ।।

# ।। उपसंहृतिः ।।

सरितः सदा स्वोत्पत्तिस्थलमेव समुपयन्ति। न केवलं सरितोऽपि तु जागतिकानि विश्वानि वस्तूनि स्वस्वकारणकलापैर्नियतं प्रत्यावर्तन्ते। तथैव जीवोऽपि यस्मात्खलु समुद्भूतस्तस्मिन्नेव सत्यशिवसुन्दरात्मके परमात्मनि विलीयते। तदुच्यते – 'परात्परं पुरुषमुपैति दिव्यम्।' इति। अज्ञाततयैव स स्वकारणस्वरूपेण परमात्मना समं मिलितुं जन्मजन्मान्तरस्य सुदीर्घाध्वानं परिक्रामति। संसारदशायां यद्यपि तेन स्वस्वरूपं विस्मर्यते, तथापि सत्यसुन्दरज्ञानाय काचिन्न्यूनातिन्यूना वासना तस्मिन्नन्तःसलिलेव प्रवाहिता भवति। तस्मादेव संस्काराज्जागर्ति तदीयः सौन्दर्यबोधः। सौन्दर्यं प्रति सहजाताया अस्या आकाङ्क्षायाः कारणादेव स कदाचित् पत्रपुष्पद्वारात्मानमलञ्चक्रे। पत्राणि पुष्पाण्येवासन् तस्य सौन्दर्यचर्चाया आद्युपकरणानि अलंकारा वा। परन्तु देहादिवस्तुमयस्य बाह्यप्रपञ्चस्यालंकरणेनैव तदीया सौन्दर्यपिपासा न प्रशमिता। अखण्डजीवस्य कदापि खण्डमध्ये परिवृत्तिर्न जायते। अतो वस्तुमयं जगदतिरिच्य सूक्ष्मभावसम्पन्ने जगति तद्दृष्टिर्निपतिता। स्वमनोमुकुरे राशीकृतभावव्यूहान् वाणीरूपप्रदानाय सचेष्टोऽभूत्सः। तदैवालौकिकप्रेरणया धराधाम्न्याविर्भूतोऽभवत्कविः। तस्य कण्ठनिःसृता सरस्वती छन्दोमयी सालंकारा च। लोकविलक्षणा सैव कविवाक् प्रतिक्षणं परिवर्तनशीले पञ्चतत्त्वाञ्चिते प्रपञ्चेऽस्मिन् काव्याख्यया प्रसिद्धिं गता। एवमेव काव्येन साकं कवेरच्छेद्यं तादात्म्यं संस्थापितम्।

भारतीयप्रज्ञाया विशिष्टं महत्त्वं निश्चयेन वरीवर्तते विश्वस्यास्य विस्तृतज्ञानविज्ञानसमीक्षणपरम्परासु इत्यत्र नास्ति विप्रतिपत्तिर्विदुषाम्। शास्त्राणां काव्यानां च विरचनेऽस्याः प्रज्ञायाश्चरमोत्कर्षं कल्पयामो वयम्। तत्रापि साहित्यशास्त्रस्य स्थानं सुतरामेवानन्यं तथापूर्वं वर्तत इत्यत्र नास्ति संशीतिः। तथाहि चतसृणां विद्यानां निष्यन्दत्वेन पञ्चमी साहित्यविद्या राजशेखरेण प्रपञ्चिता। अलङ्कारशास्त्रमित्यस्य नामान्तरम्। अतो वेदाङ्गेषु षट्सु भृशमुपकारकत्वादलङ्कारः सप्तममङ्गमिति स्वीकार्यम्। तथैव विद्यास्थानानां चतुर्दशत्वमनङ्गीकृत्य साहित्यशास्त्रस्य तत्रान्तर्भुक्त्या तेषां पञ्चदशत्वमवश्यमङ्गीकार्यमिति राजशेखरमतिः।

काव्यशास्त्रीयाचार्यपरम्परायां बहुषु मौलिभूतेष्वाचार्येष्वन्यतमेन काव्यतत्त्वपरमरहस्यवेदिना कुन्तकाचार्येण तात्त्विकदृष्ट्या काव्यस्वरूपं प्रकाशयता तल्लक्षणमेवं निगदितम् –

"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।"[163] इति।

तथाहि काव्यज्ञानामाह्लाददायिनि वक्रोक्तियुक्ते वाक्यात्मके विन्यासे वैशिष्ट्ययुक्ततयावस्थितौ शब्दार्थौ एव काव्यम्। अत्र स्वत एवोदेति प्रश्नो यत् काव्यस्य किंविधं विशेष्यतावच्छेदकमितरभेदसाधकञ्च लक्षणं कवेरभिप्रेतम् ? अत्रोच्यते कुन्तकाचार्येण –

'विशिष्टमेवेह साहित्यमभिप्रेतम्। कीदृशम् ?

वक्रताविचित्रगुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहः।'[164] इति।

तथाहि वक्रकविव्यापारेण शब्दार्थयोर्विलक्षणं किमपि साहित्यमुपजायते येन तत्साहित्यं काव्यपदवीमाधत्ते। तस्मात्पुनः काव्ये प्रयुज्यमानः शब्दस्तथार्थश्चेत्युभयमेव सौन्दर्यसम्पदा परस्परस्पर्धि भवेत्। तथाह्यभ्यधायि कुन्तकाचार्येण –

"समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ।

परस्परस्य शोभायै शब्दार्थौ भवतो यथा।।"[165] इति।

आधुनिकसंस्कृतसाहित्याकाशे शश्वद्विराजमानानां कविपुरन्दराणां काव्येषु शब्दार्थयोरीदृशी स्पर्धा सदैव दृग्गोचरतामुपैतीत्यत्र न संशीतिः काचित्। परन्तु वैदेशिकाः पण्डितमूर्धन्याः

---

[163] व. जी., पृ. ७.

[164] तत्रैव, वृत्तौ, पृ. १०.

[165] तत्रैव, पृ. ११.

संस्कृतमजानन्तोऽप्यत्यन्ताध्यवसायवशादात्तव्युत्पत्तयोऽनयैव गिरा संस्कृतकाव्यानि चकबिरे इत्याश्चर्यम्। तेषु कविवरेष्वन्यतमत्वं भजते स्कटल्याण्ड-वास्तव्यः श्री-जान्-म्यूर-पादः।

पूर्वजन्मसिद्धा स्वाभाविकी प्रतिभा, शास्त्राणां सदुपदेशेन सम्यगनुशीलनजनिता व्युत्पत्तिस्तथा पौनःपुण्येन काव्यविरचने प्रवृत्तिरभ्यासो वेति समुदायः काव्योत्पत्तेः कारणमिति काव्यकारणविषये हेतुत्रितयवादी तावन्मम्मटाचार्यः। तथाहि तन्मते काव्यकारणं तावत् –

"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।"[166] इति।

अतः शक्तिः, व्युत्पत्तिस्तथाभ्यासश्चेत्येतत्त्रयं समुदितं सत् काव्यस्योद्भवे निर्माणे समुल्लासे च कारणम्। न केनाप्येकेन काव्योत्पत्तिः सम्भवति। तथाहि वृत्तावुच्यते –

'त्रयः समुदिताः, न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः।'[167] इति।

तत्र लोकशास्त्रकाव्याद्यवेक्षणात् निपुणता काव्यस्योद्भवे नितरामावश्यिकी। अवेक्षणशब्दस्यात्र प्रत्येकं योगः। लोकशब्देन स्थावरजङ्गमात्मकं लोकवृत्तमुच्यते। काव्यशब्देन महाकविविरचिता रामायणमहाभारतादयो गम्यन्ते। शास्त्रपदेन यद्यपि केवलं वेदानां तथा तन्मूलकानां ग्रन्थानामेवावबोधो भवेत्, तथापि लक्षणया परम्परया च शास्त्रोपकारकाणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादीनां लक्षणग्रन्थानामपि ज्ञानं स्यात्। एतेषां लोकशास्त्रकाव्यादीनां वारं वारमनुशीलनेन निपुणता जायते। अतः सा हि काव्यस्योद्भवेऽवश्यमावश्यिकी।

प्रख्यातप्राच्यतत्त्वविदो जान्-म्यूर-वर्यस्य सर्वासु एव रचनासु तदीया परिशीलितज्ञानच्छटा परिलक्ष्यते। भारतीयदर्शनशास्त्रेषु, रामायण-महाभारत-पुराणादिषु तथा व्याकरणशास्त्रेषु नितरामेव निष्णातः स कविवर्यः काव्यविरचने प्रवृत्तः, तत्कर्मण्यपि नितान्तं निष्णातोऽभवत्।

---

166 का. प्र., १.३.

167 तत्रैव, वृत्तौ।

तथाहि तत्प्रणीतानां मौलिकसंस्कृतकाव्यानां संख्या मत्प्राप्ततथ्यानुसारं प्रायः त्रयोदश। एतदतिरिच्य तद्विरचितान्याङ्गलभाषोपनिबद्धग्रन्थरत्नानि तथा बहूनि प्रबन्धकुसुमानि तन्महाकवेः प्रकाण्डपाण्डित्यप्रकर्षोत्कर्षत्वमेव निश्चप्रचमातनोतीति मामकी निःसन्दिग्धा मतिः।

- **ऐतिह्याधुनिकतयोः समन्वयः**

संस्कृतसाहित्याकाशे समकालिकसमस्यानां सुप्रकाशरूपमैतिह्यं तु सुप्राचीनमेव। नाट्यशास्त्रेऽपि तदर्थमवलोक्यते यत् साधारणमनुजनूनां पुरत आद्यानामृषीणां तथा तदानीन्तनसमाजस्य विशिष्टव्यक्तिवर्गाणां तिमिरावृतावस्थाप्रकाशनत्वात्सामाजिकदौरात्म्यप्रदर्शनत्वाच्च शापिताः खलु भरतात्मजा इति। तथाह्याह भरतः –

“कस्यचित्त्वथ कालस्य शिल्पकं ग्राम्यधर्मकम्।

ऋषीणां व्यङ्गकरणं कुर्वद्भिर्गणसंश्रयम्।।

तच्छ्रुत्वा मुनयः सर्वे भीमरोषप्रकम्पिताः।

ऊचुस्तान् भरतान् क्रुद्धा निर्दहन्त इवाग्नयः।।”[168] इति।

अतः संस्कृतकाव्यानि न केवलं राजवंशानामैतिहासिकं वृत्तमेव प्रस्तुतीकुर्वते, अपि तु दारुणवास्तवताचलोपलोपरि प्रतिष्ठितमेकं महार्घ्यं रत्नम्। कालिदासप्रणीतानि त्रीणि नाटकानि, शूद्रकस्य *मृच्छकटिकम्*, भवभूतेः *उत्तररामचरितम्* इत्यादीन्यत्र प्रमाणपदवीमधिरोहन्ति।

अष्टादश-ऊनविंश-शतकयोः समाजस्य दुदर्शा तु विविधानां कवीनां लेखन्यङ्किता सती काव्येषु प्रतिफलितावलोक्यते। तदर्थं तदा नैकेषां सिद्धसाधकानामप्याविर्भावोऽस्माभिः प्रत्यक्षीक्रियते। समाजे धर्मसंस्थापनार्थाय तेषामवदानं तु वाचामगोचरम्। तथाहि तदानीन्तनकविभिरपि तेषां पवित्रं जीवनमाश्रित्य दृश्य-श्रव्यमयानि काव्यानि नैकानि प्रणीतानि। तथाह्यधस्तात् साधारणजनानां पापतापापहर्तॄणां साधकानां पूततमानि चरितान्युपजीव्य रचितानां काव्यानां काचन सूची प्रदीयते –

---

[168] ना. शा. (नागर.), चतुर्थ-भागः, पृ. ४८५.

| | | |
|---|---|---|
| क) *क्रिस्तुभागवतम्* | (1977) | पि. सि. देवस्यः |
| ख) *रामकृष्ण-परमहंसः* | (1964) | श्री. भा. वर्णेकरः |
| ग) *विवेकानन्दविजयम्* | (1972) | श्री. भा. वर्णेकरः |
| घ) *तुकारामचरितम्* | (1950) | क्षमा-रावः |
| ङ) *रामदासचरितम्* | (1953) | क्षमा-रावः |
| च) *ज्ञानेश्वरचरितम्* | (1954) | क्षमा-रावः |
| छ) *रामदासः* | (1960) | सूर्यनारायणशास्त्री |
| ज) *विवेकानन्दचरितम्* | (1970-71) | गजानन-बाळकृष्ण-पळसुले |
| झ) *विवेकानन्दचरितम्* | (1974) | त्र्यम्बक-भाण्डारकरः |
| ञ) *शिलकैवल्यचरितम्* | (1950) | व्ही. एम. केकिणी |
| ट) *गुरुदेवकथामृतम्* | (1971) | व्ही. टी. आप्टे |
| ठ) *नारायणस्वामिचरितम्* | (1962) | आत्माराम-जेरे |

वङ्गेष्वपि बहुभिः कविभिर्महापुरुषाणां चरित्रमुपजीव्य विरचितानि खलु काव्यानि। तथाह्येवमेव रोधनायापराधानां, यज्ञानां च समाप्तये, पापस्य शोधनार्थाय नित्यधर्मप्रवृत्तये च धराधाम्नि प्रादुर्भूतं श्रीयेषूखृष्टमाधारीकृत्याप्यस्मिन् समये कविना जान्-म्यूर-पादैः *श्रीयेषूखृष्टमाहात्म्यम्* इत्याख्यं महाकाव्यं प्रणीतम्। तथैव प्रणीतं *श्रीपौलचरित्रम्* इति काव्यं महाप्रभोः श्रीयेष्वो मुख्यशिष्येष्वन्यतमस्य साधकस्य श्रीपौलस्य जीवनवृत्तमाश्रित्य। अत्रालङ्कारिकाणां मतानि यथा प्रायः प्रतिफलितानि तथैव विषयगतदिशाप्यस्याधुनिकत्वमङ्गीकार्यम्। तेनात्र ऐतिह्याधुनिकतयोः समन्वयो दृष्टिपथमुपेतः।

छन्दसः प्रयोगे, भाषाया व्यवहारे, रचनायाः कौशले यद्यपि तेन भारतीयकाव्यशास्त्रेषु प्रोक्ता रीतय एव समाश्रितास्तथापि वस्तुगतदृष्ट्या, महाकाव्यलक्षणस्य विविधस्थलेष्वस्य नवीनत्वमालक्ष्यते। यथा महाकाव्यस्य परिच्छेदाः सर्गनाम्ना परिचीयन्ते। परन्तु तेन तु अध्यायपदेन तेषां प्रयोगो विहित इत्याधुनिकत्वम्। महाकाव्ये नायकस्य वधो नैव दर्शनीयस्तथा च काव्यान्ते नायकस्य

मृत्युप्रदर्शनमपि निषिद्धमस्ति। किन्तु *श्रीयेषूखृष्टमाहात्म्यम्* इति महाकाव्ये यथा येषूखृष्टस्य शूलारोपणसमये करुणातिकरुणं वृत्तं कविना प्रदर्शितं, यथा च *श्रीपौलचरित्रम्* इत्यत्र पौलस्य वधदृश्यं कविनाङ्किकतं, तथैव काव्यान्ते नायकस्य श्रीयेषूखृष्टस्य तथा पौलस्य स्वर्गमनमपि तेन भासस्य 'उरुभङ्गा'नुसरणेनावलीलया साधितमित्युभयत्रैवाधुनिकतायाः सुस्पष्टः प्रभावो लक्ष्यत इत्यस्ति विशेषत्वम्।

आदावेव प्रतिभाया द्वैविध्यं राजशेखरमतमनुसृत्योररीकृत्य पुनः वक्तुमिष्यते यत्स ह्युभययोरेव कारयित्री-भावयित्र्योः प्रतिभयोरनन्योऽपूर्वश्च कश्चन महाकविरिति। तदुच्यतेऽग्निपुराणे –

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।

कवित्वं दुर्लभं तत्र शक्तिस्तत्र च दुर्लभा।।"[169] इति।

अस्या एव दुर्लभायाः प्रतिभाया असामान्योऽपूर्वश्च कश्चनाधिकारी हि जान्-म्यूर-वर्यः। राजशेखरोक्तेषु कविविभागेषु मूलतो बभूव स शास्त्रकविः, यतस्तस्य काव्येषु प्राधान्येन शास्त्रीया विषया एव विचारपदमाप्ताः।

कवेरस्य जीवितव्यापिन्याः सारस्वतसाधनाया फलं तावद् बहवो मौलिकसंस्कृतकाव्यग्रन्थाः, नैके आङ्गलभाषानिबद्धा शास्त्रीयग्रन्थाः, अनेके च प्रबन्धा, ये खल्वनाविष्कृततयैव कुत्रचिद् ग्रन्थागारेषु जराजीर्णावस्थां समाश्रयन्तोऽवहेलितास्तथानालोचिताः सन्तोऽवतिष्ठन्ते मौनमालम्ब्यैवेति ह्यस्माकं खेदकारणम्। तस्मादेवास्माभिरेतेषां जान्म्यूरवर्यैर्विरचितानां तथा च संस्कृतखृष्टीयसाहित्यं पुष्टीकुर्वतां नैकानां संस्कृतग्रन्थरत्नानामुद्धरणं तथा च तेषां गवेषणाधर्मी पाठो निष्ठासहकारं विधेयः। तेनानेक एव सहृदया गवेषकास्तथा सुधीजना उपकृता भवेयुस्तथा नूतनस्य दिगन्तस्यैकस्योन्मोचनं स्यात्, नवारुणकिरणप्रभादीप्तस्य साहित्यप्रभातस्य चोदयो भवेदिति मे मतिर्मे दृढा।

[169] अग्नि. पु., ३३६.३-४.

कविः जान्-म्यूरः लोकचक्षुषामन्तरालस्थितममूल्यं रत्नमेकं, लोकचक्षुषामलक्ष्ये पतितमेकं सुगन्धि पुष्पमिति मदीयाचार्यावाचमङ्गीकृत्य वक्तुं शक्यते। सोऽयं विस्मृतो महाकविरविवाहित एव स्वतनुं तत्याज द्व्यशीत्यधिकाष्टादशशततमे (१८८२) खृष्टाब्दे स्कटल्याण्ड-देशस्य एडिनवार्ग-नगरे। पाञ्चभौतिकं देहं त्यक्त्वा यद्यपि स पारलौकिकं देहं दधार, तथापि तदीयकृतिततिना स सर्वदैव जीवन्नस्ति गवेषकाणामस्मद्दृशां चित्तेष्वित्यत्र नास्ति किमपि चित्रम्।

- **भाव्यगवेषणावकाशः (Scope of Further Research)**

क) संस्कृतखृष्टीयसाहित्यं तावद्विशालं तथा विस्तृतम्। मया केवलमस्मिन् गवेषणाभिसन्दर्भे श्री-जान्-म्यूर-प्रणीतेषु संस्कृतखृष्टीयकाव्येषु षण्णामेव काव्यानां साहित्यिकं समीक्षणं विहितम्। परन्तु तेन प्रणीतानामन्यानां काव्यानामालोचनं त्वधुनाप्यवशिष्टानि सन्तीति गवेषणेप्सवो विषयमिममाश्रित्य भाविनि शोधकार्यं कर्तुमर्हन्ति।

ख) गवेषणाबन्धस्य *संस्कृतखृष्टीयसाहित्यम्* इति संज्ञके प्रथमेऽध्याये मया सुरगिरा रचितानां खृष्टीयकाव्यानां या खलु सूची प्रस्तुता, तत्र तावदाद्यत्वं तथा मुख्यत्वं भजते श्रीमता उइलियम-हज-मिल-वर्येण प्रणीतं पर्वसु चतुर्षु प्रविभक्तं *श्रीखृष्टसंगीता* इत्याख्यं विशालं महाकाव्यम्। विषयगाम्भीर्येण रचनापाटवेन काव्यमिदमपूर्वं वर्तते। पुनश्च काव्यमिदमाधारीकृत्य न किमपि गवेषणाकार्यं नयनयोः पान्थायते। अस्य काव्यस्य रचयिता मिल-वर्यः संस्कृतखृष्टीयकाव्यवाङ्मयस्य कालिदासत्वेन प्रख्यातबङ्गीयपण्डितेन श्री-कमलाकान्त-विद्यालङ्कारेण सभाजितः। काव्यस्यास्य संस्कृतालङ्कारिकदिशा तथा चैतिहासिकदृष्ट्या विमर्शनं नितरामेव काङ्क्षितमस्ति, यतो हि काव्यमिदं वाङ्मयस्यास्य सर्वोत्कृष्टं निदर्शनमिति प्रायः समेषां विदुषां राद्धान्तः। तथाह्युच्यते –

"...he would become the author of a fervently devotional work of epic proportions on the life of Jesus in Sanskrit, or one that so nearly approximates the ideals of literary perfection that indigenous writers themselves have established. Mill is ... a great craftsman of elegant and impeccable Sanskrit verse who, although much neglected and underevaluated, seemed intuitively to understand the idiom of *bhakti* that would enhance the appeal of the Christian faith in a Hindu perspective."[170] इति।

[170] Ind. Christ., p. 40.

ग) प्रख्यातप्राच्यतत्त्ववेदिना श्री-उइलियम-केरी-महोदयेन देशीयविद्वद्वर्याणां साहाय्येन खृष्टीयधर्मस्य प्रधानभूतशास्त्रस्य *बाइबेल* इत्यस्य मूलभाषातो यः संस्कृतानुवादोऽस्मत्पुरतः प्रस्तुतस्तद्विषयमाश्रित्यापि समीक्षावश्यं भवितुमर्हति। तुलनात्मिकया दृष्ट्या समालोचनेन समं भाषागता विमृष्टिरपि तत्रापेक्षते। अपि च, खृष्टीयधर्मीयग्रन्थान्तराणामपि समालोचनं तथा तदनुवादोत्कर्षताविषयकं विमर्शनमप्यवश्यं कार्यमस्ति।

घ) खृष्टचरित्रं तथा खृष्टधर्ममाश्रित्य यानि काव्यानि प्राच्यैः पाश्चात्यैश्च कविवरैः प्रणीतानि, तेषु मन्ये सर्वबृहद्वर्तते श्री-पि.-सि.-देवस्य-वर्येण विरचितं त्रयस्त्रिंशत्सर्गोपेतं महाकाव्यं *क्रिस्तुभागवतम्* इति। काव्यस्यास्य प्रणयनाय कविवर्यः १९८०-संवत्सरे संस्कृतविभागे साहित्य-अकादेमी-पुरस्कारेण सम्मानितोऽभवत्। वैदर्भीरीत्या विरचितेऽस्मिन् महाकाव्ये खृष्टजीवने घटितानां वृत्तानां यथा पुङ्खानुपुङ्खतया वर्णनं समालक्ष्यते तथैव कविकल्पनामाधुर्याः सन्निवेशोऽपि दृग्गोचरीभवति। अतः काव्यस्यास्य महाकाव्यत्वसमीक्षा सुतरामेवापेक्षते गवेषकैरिति संस्कृतखृष्टीयसाहित्यपरिसरे विद्यमानोऽयं भाव्यगवेषणाविषयश्चमत्कारः। काव्यमिदं प्रशंसता श्रीसत्यव्रतशास्त्रिणा निगदितं यत् –

“Although in narrating the story of the Lord the author relies on the versions of the Gospels and some reputed biographies of Christ and is faithful to incidents as recorded there, yet he shows his freedom and imagination as a poet to introduce poetic elements which however do not dilute the authenticity of the narrative. The poem is simple and straightforward, composed in the much-valued Vaidarbhī style.”[171] इति।

ङ) श्रीयेषूखृष्टजीवनमुपजीव्य प्रणीतेषु खण्डकाव्येष्वन्यतमत्वं भजते श्रीसोमवर्मराजरचितं सर्गचतुष्टययुतं *श्रीयेशुसौरभम्* इति। कालिदासीय-रघुवंश-कुमारसम्भवादिकाव्यानां सुस्पष्टप्रभावः दिव्यभक्तिमिश्रिते काव्येऽस्मिन्नालक्ष्यते। असंस्कृतपदानां संस्कृतकरणेऽपि तदीयं दाक्ष्यं प्रशस्यमेव। अतो गवेषणाया अपूर्वोऽवकाशोऽस्ति सहृहयहृदयहारिणि काव्येऽस्मिन्नित्यत्र नास्ति किमपि चित्रम्। तदुच्यते सत्यव्रतशास्त्रिवर्येण -

---

171 खृष्टसाहित्य., पृ. ५.३१५.

"A spirit of the divine and a sense of devotion pervade the whole of the Sreeyesusourabham which is indeed a happy blend of simplicity and profundity. It reflects the glorious and the heavenly personality of Lord Christ in a most impressive manner and amply reveals the poet in the author whose Khaṇḍakāvya – it is to this category that his work belongs according to rhetoricians – makes a very pleasant reading. There are Similies, Metaphors and Fancies here which do tickle the Sahṛdaya, the connoisseur and add further charm to the work."[172] इति।

क) हिन्दु-खृष्टीय-धर्मदर्शनयोर्मिथः तौलनिकी समीक्षा कृता श्रीमता जे. आर. व्यालाण्टाइन्-वर्येण तदीये गद्यकारतामापन्ने *खृष्टधर्मकौमुदी* इत्याख्ये ग्रन्थे। ग्रन्थस्यास्य समालोचनमपि विहितं बङ्गीयसमीक्षकेण श्रीमता व्रजलालमुखोपाध्यायमहोदयेन। तेन विरचितो ग्रन्थो भवति – *खृष्टधर्मकौमुदीसमालोचना* इति। अतो ग्रन्थद्वयमाश्रित्य धर्मतत्त्वमीमांसा त्ववश्यं भवितुमर्हतीति मामकीनं मतम्।

ख) श्रीयेषूखृष्टस्य जीविताश्रितमपरमेकं सार्थकं गद्यकाव्यं भवति *येशुचरितम्* इति। कविना मार्सलाचार्येति नाम्ना नितरां प्राञ्जलेन वचोविन्यासेन प्रभोः सम्पूर्णमपि पवित्रं जीवनमिह समुपवर्णितं पञ्चभिरध्यायैः। तस्माद्गद्यकाव्यमिदमपि गवेषणार्थमवश्यमनुसन्धेयमनुसन्धित्सुभिः।

ग) खृष्टीयभावानां संस्कृतसंस्कृतौ प्रकाशनाद् यद्वैचित्र्यं समापतितं तत्तु श्री-जिन्-क्यालमेट्-वर्येण (Jean Calmette) प्रणीते *सत्यवेदसारसंग्रहे* द्रष्टुं शक्यते। ग्रन्थस्यास्य द्विविधं संस्करणं प्राप्यते। तथाहि काव्यस्यास्य जे. एलेन-पादेन (Fr. J. Aelen) १९३१-खृष्टाब्दे सम्पादिते संस्करणे सन्ति साकल्येन पञ्चनवत्यधिकैकशतसंख्यकाः श्लोकाः। तथा च पि. रायन्ना-वर्येण (Fr. P. Rayanna) १९७९-संवत्सरे सम्पादितेऽस्य संस्करणे द्वासप्तत्युत्तरैकशतसंख्यकाः सन्ति श्लोकाः। काव्यमिदमाश्रित्य नितान्तमेव गुरुत्वावहं गवेषणाकार्यं भवितुमलम्। अनुष्टुब्वृत्ताधिक्यस्य काव्यस्यास्य गुणगरिमाणं तथा वैशिष्ट्यं प्रतिपादयता *The Indian Christiad* इत्याख्ये ग्रन्थे निगद्यते –

"The literary merit of these writings in Sanskrit, if one grants them this credit, will remain in history as a Christian contribution to Sanskrit literature. And the Christian

172 खृष्टसाहित्य., पृ. ५.३१८.

message thus presented in Sanskritic culture will make it transcultural and more universal than its original appearance in a particular judeo-Christian culture. In that process the Christian message – its language and even its conceptual framework – undergoes a change."[173] इति।

इत्थं कांश्चन भाव्यगवेषणाविषयान् समुपस्थाप्यान्तिमे तु विंशशतकस्य प्रख्यातबङ्गीयमहाकवेः महामहोपाध्यायस्य भारताचार्यस्य श्रीहरिदाससिद्धान्तवागीशभट्टाचार्यस्य *मिवारप्रतापम्* इति नाटकस्य सुललिता सुरभारती सश्रद्धं स्मर्यते –

"नवं नारिकेलं नवीनञ्च चेलं

रमाञ्चापि नव्यां गृहं नूतनञ्च।

वचश्चाप्यपूर्व्वं विशेषेण सर्व्वे

रसज्ञाः पुराणाच्चिरायाद्रियन्ते।।"[174]

इति स्वल्पबुद्धिना मयका यद्यपूर्वा काचिदपि वागत्रभवतां भवतां सकाशे समुपन्यस्ता, तदा तस्याः समादरः सुतरामाकाङ्क्ष्यत इत्यलमतिपल्लवितेनेति शिवम्।

**इति**

**समाप्तोऽयं गवेषणाभिसन्दर्भः।**

[173] Ind. Christ., p. 106.

[174] चट्टोपाध्याय, ऋता. *महामहोपाध्याय हरिदास सिद्धान्तवागीशेर सारस्वत साधना*, संस्कृत साहित्य परिषत् एवं संस्कृत पुस्तक भाण्डार, कोलकाता, २०१३, पृ. २१३.




**Epitaph of John Muir**

# परिशिष्टम् - क

## ।। श्री-जान्-म्यूर-वंशतालिका[175] ।।




---

175 तालिकेयं ड.एभ्रिल.ए.पाओयेल-वर्यया प्रणीतस्य *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire* (२०१०) इति ग्रन्थस्य 'Muir family networks: intermarriages with other Ayrshire merchant families' इत्यंशान्मया कृतज्ञतापुरःसरं संगृहीता ।

# परिशिष्टम् - ख

## ।। श्रीजान्-म्यूर-प्रणीते संस्कृतखृष्टीयसाहित्ये सुभाषितानि ।।

### ।। *श्रीपौलचरित्रे* सुभाषितानि ।।

१. स्वबुद्धिकल्पितं ज्ञानं निस्ताराय न कल्पते।
तत्सर्वं मूर्खतामात्रमीश्वराग्रे प्रतीयते।। (९.५८)

२. क्व ज्ञानी क्व च शास्त्रज्ञः क्व विवादी च लौकिकः।
परेशो लौकिकं ज्ञानं मूर्खत्वीकृतवान् न किं।। (९.६३)

३. अतः पाप्मा न युष्माकं शरीराणि नियच्छतु।
शारीरिकाभिलाषाणां वशीभावं न गच्छत।। (९.७८)

४. तदादेशेन धीरत्वं धर्म्ममीश्वरसेवनं।
समाचरेम संसारे कामान् निहत्य लौकिकान्।। (९.८१)

५. शरीरमैहिकं स्वर्गमधिकर्तुं न शक्नुयात्।
कदापि ह्यविनाश्यत्वे नाधिकारो विनाशिनः।। (९.१४१)

६. मृत्योर्हि कण्टकं पापमेव ज्ञेयं सुदुष्फलं।
पुनश्च पाप्मनः शक्तिर्व्यवस्था दण्डदायिनी।। (९.१४६)

७. दासश्च स्वामिनः स्वस्य सर्वथाऽऽज्ञां प्रपालयेत्।
न दृष्टिसेवया किन्तु खृष्टदास इवोद्यतः।। (९.१६३)

